
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥प्रयोगरत्नप्रारंभः॥

प्र॰त्न॰
१

श्रीगणेशाय नमः ॥ ॥ श्रीरामं सपरीवारं गणेशं च सरस्वतीं ॥ आश्वलायनताछि॰ष्यान्श्रराम्यपित
रं गुरुं १ भट्टरामेश्वरसूनो भट्टनारायणः सुधीः ॥ प्रयोगरत्नं कुरुते काश्यां शिष्टेष्टतुष्टये २ ग्रंथेष्वि
न्गुणगणावत्वमुच्यते चेत्स्वग्रंथं गुणगणावंतमाह को नागतत्स्संततः शिष्टस्मृतां ललितकया चेष्टाध्येतत्सद
सद्विहेच्यते मयायतत् ३ अथ संस्काराः ॥ ते चाष्टाचत्वारिंशत् ॥ तथा च गौतमः ॥ गर्भाधानं पुंसवनं सीमंतोन्न
यनं जातकर्म नामकरणं ऽन्नप्राशनं चौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पं
चानां यज्ञानामनुष्ठानमष्टकापार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकसंस्था ॥ अ
न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञ
संस्था अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमयज्ञसंस्था इत्ये
ते चत्वारिंशत्संस्कारा अष्टावात्मगुणाः ॥ दया सर्वभूतेषु क्षांतिरनसूया शौचमनायासो मांगल्यम

राम॰
१

कार्यनामस्यादेतिय स्यैते चत्वारिंशत्संस्काराः अष्टावात्मगुणाश्च स ब्रह्मणः सायुज्यमाप्नोतीति॥ पार्वणः पार्वण
स्थालीपाकः॥ श्राद्धमासाचास्यादि॥ श्रावणी तत्र कर्त्तव्यं श्रवणाकर्म॥ आग्रहायणी तत्र कर्त्तव्यं प्रत्यवरो
हणं॥ चैत्री तत्र कर्त्तव्यः शूलगवः॥ आश्वयुजी तत्र कर्त्तव्यमाश्वयुजीकर्मेति॥ हरदत्तो व्याचख्यौ॥ अंगि
रसा तु पंचविंशति संस्कारैः संस्कृता ये द्विजातयः॥ ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयंत्रिताः॥
आदिशब्दाद्याजनादौ॥ गर्भाधानं पुंसवनं सीमंतो बलिरेव च॥ बलिर्विष्णुबलिः॥ जातकृत्यं नामकर्म
निष्क्रामोन्नप्राशनं परं॥ चौलकर्मोपनयनं तद्व्रतानां चतुष्टयं॥ तच्छब्देन प्रसिद्धत्वाद्वेदग्रहणात द्व्रतानां
वेदव्रतानमित्यर्थः॥ स्नानोद्वाहौ चाग्रयणमष्टका च यथा तथं॥ श्रावण्यामाश्वयुज्यां च मार्ग[illegible]
शीर्षे च पार्वणं॥ उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यशः॥ संस्कारा नियता ह्येते ब्राह्मणस्य विशेषत
इति॥ श्रावणं पाश्रवणाकर्मोदीत्यादि पर्वैव व्याख्येयं॥ नियता नित्याः॥ एतेषां पंचविंशतीनां नैमित्तिक

वार्षिकमासिकनित्यभेदेन चातुर्विध्यमाहाश्वलायनः ॥ नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः ॥ सैतेवा
ग्रयणाद्याश्च संस्कारा वार्षिका मताः ॥ मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकं ॥ महायज्ञास्तु नित्यास्सु
ःसंध्यावच्चाग्निहोत्रवदिति ॥ अत्र गर्भाधानाद्या उपनयनांता एव सर्वेषां नियताः ॥ न तु स्नानाद्याः ॥ तेन ब्र
ह्मचर्यादेव प्रव्रजेदित्यादिनं विरुध्यते ॥ एते च द्विजानामेव समंत्रकाः ॥ यदाह याज्ञवल्क्यः ॥ ब्रह्मक्षत्रिय
विट्शूद्रावर्णास्त्वाद्यास्त्रयो द्विजाः ॥ निषेकाद्याः श्मशानांतास्तेषां वै मंत्रतः क्रियाः इति वै एव ॥ अत्र ते
षामेव मंत्रः क्रियाः इति वदन् शूद्रस्याऽमंत्रतः क्रियाः इति सूचयति ॥ अत एव ॥ अत्र तेषामेव मंत्रतः
क्रियाः इति वदन् शूद्रस्याऽमंत्रतः क्रियाः इति सूचयति ॥ अत एव संस्कारानधिकृत्याह यमः ॥ शूद्रोप्येवं
विधिः कार्यो विना मंत्रेण संपूज्य गंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत् ॥ धर्मे कर्मणि मांगल्ये संग्रा
माद्भुतदर्शने ॥ महापरिशिष्टे ॥ अथ स्वस्तिवाचनमृद्धिपूर्तेषु ॥ ऋद्धिर्विवाहांता अपत्यसंस्काराः ॥ म

तिष्ठो द्यापनेष्टौ तत्कर्मणाम्न्वाधानयोः कुर्यादिति ॥ आश्वलायनस्मृतिः ॥ वैदिके तौत्रिके चाद्यौ ततः पुराणा
हृद्यते ॥ शौनकः ॥ पुराणाहवाचविधिं वक्ष्यामो यथाविधि ॥ प्रयोक्तुः कर्मणामादावंते चोदयसिद्धय
सिद्धय इति ॥ तच्च कर्मप्रयोगांतर्गतमिति केचित् ॥ बहवस्तु प्रयोगाद्बहिर्भूतमिति ॥ आद्यपक्षे कर्मप्रयोग
संकल्पं कृत्वा कार्यं द्वितीये तु तत्कृत्वा कर्मसंकल्पः ॥ ॥ अथ प्रयोगः ॥ ॥ प्रयोगपारिजातानुसारेणो
च्यते ॥ यजमानः कृताभ्यंगादिः स्वलंकृतो दर्भपाणिः शुचिर्भूत्वा मंगलसंभारान्संभृत्य स्वलंकृते गृहे
गोमयोपलिप्तभूमौ सोत्तरच्छदे भद्रासने उदङ्मुख उपविश्य स्वदक्षिणपार्श्वे संस्कार्यमुदङ्मुखमुपवे
श्य रंगवल्लिकायुक्ते भूतले मस्थपरिमितस्य शक्त्यान्यूनस्य वा धान्यस्योपरि दक्षिणोत्तरयोः सुवर्ण
रजतताम्रमृन्मयान्यतमकलशद्वयमव्रणं मनोहरमलंकृतं शुद्धपुराण्यजलपूरितं सपल्लवं निधाय स्व
त्रवेष्टितकलशोपचरतो निनिक्षिप्यतदुपरिस्थितेतु खपूरितं सफलं पात्रं निधाय तत्पश्चिमदेशे प्रश

(३)

प्र०ल०
३

स्तान्प्रतिवचनसमर्थोस्तद्दिवसेप्याद्यारिष्ठमुक्तवतो निषिद्धप्रतिग्रहान्निवृत्तान्शुचीन्सोत्तरीयान्दर्भेपवि
त्रपाणीयुग्मान्ब्राह्मणान्प्राङ्मुखानासने उपवेश्य गंधपुष्पादिभिरभ्यर्च्य यथाचारं सुमुखश्चेत्यादिभि
र्गणपतिं स्मृत्वा षोडशोपचारैरभ्यर्च्य तत्र कलशे देवता आवाहयेत् ॥ तद्यथा ॥ कलशस्य मुखे वि
ष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वी
पा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः
॥ पुष्टिः शांतिश्च गायत्री सावित्री च सरस्वती ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ एवमेतास्समा
वाह्य कलशे देवतास्ततः ॥ एतन्मंत्रस्थितान्देवान्संपूज्य प्रार्थयेत्क्रमात् ॥ ततः सर्वेषु कार्येषु समस्तदे
शेषु ॥ यत्र योगीश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ अनन्याश्चिं
तयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ स्मृते सकलकल्याणः ॥

लम०
३

सर्वेषारंभकार्येषु०॥ सर्वमंगलमांगल्ये०॥ तद्देवलग्नमित्यादि यथाचारं पठित्वा॥ लक्ष्मीनारायणौ नत्वा
॥ ॐ दुर्गायै नमः इति प्रणवादि चतुर्थ्यंत नमोंत नामभिर्दुर्गां क्षेत्रपालं वास्तुपुरुषं मातॄः पितॄन्नाचार्यान्
इष्टदेवताः कुलदेवता ग्रामदेवताः सर्वा देवताः सर्वान्ब्राह्मणान्प्रत्येकं नत्वा प्राणानायम्य देशकालौ संकी
र्त्यऽमुककर्म कर्तुमादौ शुद्धिवृद्ध्याभ्युदयसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ब्राह्मणैः सह स्वस्तिपुण्या
हवाचनं करिष्य इति संकल्पयेत॥ ततः सर्वे ब्राह्मणाश्चायम्य देशकालौ संकीः प्राङ्मुखास्तिष्ठेत॥ अय
ः॥ तद्दक्षिणतः कर्ता तरकलशं बिभ्रदुदङ्मुखस्तिष्ठेत॥ कर्तुर्दक्षिणपार्श्वे संस्कार्यश्चोदङ्मुखस्तिष्ठेत॥
प अथ कर्ता ओं इत्युक्त्वा शिवा आपः संत्विति विप्रान्वाचयित्वा गंधा इत्युक्त्वा सुगंधाः पांत्विति वाचयित्वा
सुमनस इत्युक्त्वा सौमनस्यमस्त्विति वाचयित्वा अक्षतमित्युक्त्वा अक्षतं चारिष्टं चास्त्विति वाचयित्वा द
क्षिणा इत्युक्त्वा स्वस्ति दक्षिणाः पांतु बह्वदेयमस्त्विति वाचयित्वा तं कलशं पूर्ववन्निधाय दक्षिणां न्ना

प्र०त्न०
४

नुभूमौनिपात्योदङ्मुखःप्रद्धयेत्यादिसूक्तंजपित्वापुनस्तंकलशमादायोत्थायोदङ्मुखोमनःसमाधीय.
तामित्युक्त्वा॥समाहितमनसःस्मइतितैरुक्ते॥प्रसीदंतुभवंतइत्युक्त्वाप्रसन्नाःस्मइतितैरुक्ते॥सर्वैःसहशां
तिरस्तुपुष्टिरस्तुतुष्टिरस्तुवृद्धिरस्तुअविघ्नमस्तुआयुष्यमस्तुआरोग्यमस्तुस्वस्तिस्वस्तिशिवंकर्मास्तु
कर्मसिद्धिरस्तुधर्मसमृद्धिरस्तुपुत्रसमृद्धिरस्तुवेदसमृद्धिरस्तुशास्त्रसमृद्धिरस्तुधनधान्यसमृद्धिर
स्तुपुत्रसमृद्धिरस्तुपुत्रसमृद्धिरस्तुवेदसमृद्धिरस्तुशास्त्रसमृद्धिरस्तुधनधान्यसमृद्धिरस्तु॥इष्टसंपद
स्त्वितिपंचदशवाक्यान्युक्त्वास्वयंकर्मदेवतात्मकोभगवान्प्रजापतिःप्रीयतामित्युक्त्वावान्कर्मदेवता
त्मकःप्रजापतिरितितेवाचयिष्येत्वापुण्याहंवाचयिष्येइत्युक्त्वावाच्यतामितितैरुक्ते॥उन्नतेवशकुने
सामगायसीतिरुचंसर्वैःसहपठित्वा॥ॐपुण्याहंभवंतोब्रुवंत्वितिस्वयंमंद्रस्वरेणोक्त्वाब्राह्मणैरों
पुण्याहमितितथोक्ते॥पुनरेवंमध्यमस्वरेणोक्त्वातथैवतैरुक्ते॥पुनरेवमुच्चस्वरेणोक्तेतथैवतैरुक्ते

राम०
४

॥ स्वस्ति न इन्द्रो वृद्धश्रवा इत्यस्य चं सर्वैः सह पठित्वा ॥ ॐ स्वस्ति भवंतो ब्रुवंत्विति पूर्ववदुक्त्वा ॐ स्वस्तीति तैस्तथैव
तैः प्रत्युक्ते स्वस्त्यमुककर्मणो भवंतो ब्रुवंत्विति करिष्यमाणाकर्मणोम पूर्ववदुक्त्वाऽमुककर्मणे स्वस्तीति तैः पूर्व
वदुक्ते ॥ ऋध्यास्तोममित्यस्य चं सर्वैः सह पठित्वा ऋद्धिं भवंतो ब्रुवंत्विति पूर्ववदुक्ते ॥ ॐ ऋध्यतामिति तैस्तथैव
प्रत्युक्ते ॥ सामात्यः प्राङ्मुख उपविशेत् ॥ शौनकमते ॥ गृह्यपरिशिष्टे तु ॥ स्वस्त्यमुककर्मणा इत्युत्तरं प्रत्युत्त
रेण स्वतः ॥ ततो विप्रा उदङ्मुखा उपविश्य मद्ध्ये कलशोदकं विशाखेताग्रादिपात्रे निनीय यजमानं सामात्यं
मंत्रैरभिषिंचेयुः ॥ ते च मंत्राः ॥ तत्सवितुर्वरेण्यमित्यस्य विश्वामित्रः सविता गायत्री ॥ आपो हि ष्ठेति नवर्चस्य सू
क्तस्याम्बरीषः सिंधुद्वीप आपो गायत्री पंचमी वर्धमाना सप्तमी प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ ॥ आ नो भद्रा इति
दशर्चस्य राहूगणपुत्रो गोतमो विश्वेदेवा अंत्ये पंचाद्याः सप्तमी च जगत्यः षष्ठी विराट्स्थाना शिष्टास्त्रिष्टुभ
॥ अप नः शोशुचदघमित्यष्टर्चस्य कुत्सोऽग्निर्गायत्री ॥ एतोन्विंद्रमिति तृचस्याङ्गिरसस्तिरश्चिरिंद्रोनु

ष्टुप्॥त्वां हि स्वयेति दश र्चस्य मधुच्छंदाः पवमानसोमो गायत्री॥तरत्स मंदीति ऋक्चतुष्टयस्य अवत्सारः प
वमानसोमो गायत्री॥स्तुची वो हव्यति मंत्रस्य वसिष्ठो मरुतस्त्रिष्टुप्॥परं तियच्चेति वर्गद्वयस्य श्यावाश्व वसि
ष्ठ ऋषिः शिष्टा नामेकादशानां पवित्रवसिष्ठा वृषी पवमानसोमो गायत्री मर्चिषीति द्वे अग्निर्देवते॥उभा
भ्यां देव सवितरिति सवितृदेवत्या॥त्रिभिष्ट्वमित्यग्निसवितृदेवत्या॥पुनंतु मामिति वैश्वदेवी॥प्रप्याय स्वेति
पुरउष्णिक्॥पुनंतु मामिति यः पावमानीरिति पावमानीरिति यः पावमानीर्यो अध्येतीति चानुष्टुभः॥अग्निः शु
चिव्रततम इति विहूयोग्निर्गायत्री॥समुद्रज्येष्ठा इति चतसृणां वसिष्ठ आपस्त्रिष्टुप्॥आयं नो मितित्वचस्य
सप्तर्षयो विश्वेदेवा अनुष्टुप्॥इमा आपः॥शिवतमा इत्येतेन त्वचा नरेवस्यत्वेति च यजुषाभ्युक्षः त्वेरिते
ताभिश्च व्याहृतिभिः कुशाग्रैः सपल्लवैरभिषिंचेयुः॥ततः सुवासिनीभिर्नीराजनं कार्यं यथाचारं॥ततो ब्रा
ह्मणानां वैदिकमंत्राशिषो ग्राह्याः॥कर्मांते पिष्टनैवेद्यं कार्यं॥ ॥इति जयंतादिसमंत्रः प्रयोगपारिजात रणम०

प्रोक्तः पुण्याहवाचनविधिः॥ ॥अथ हेमाद्रौ दानकांडे बह्वृच गृह्य परिशिष्टोक्तत्वेनोक्तः सकलसाधारणा शि
ष्टाचार प्राप्तस्त्वपुण्याहवाचनप्रयोगः॥ ॥कृतमंगलस्नानः स्वलंकृतः कृताचमनः प्राङ्मुखो यजमानो वस्त्रा
च्छादिते पीठ उपविश्य पत्नीस्वदक्षिणतः प्राङ्मुखीमुपवेश्य संकार्यं चतथैवोपवेश्य॥ ॐ सुमुखश्चैकदंतश्च
कपिलो गजकर्णकः॥ लंबोदरश्च विकटो विघ्ननाशो गणाधिपः॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः॥
वक्रतुंडः शूर्पकर्णो हेरंबः स्कंदपूर्वजः॥ षोडशैतानि नामानि यः पठेच्छृणुयादपि॥ विद्यारंभे विवाहे च प्रवे
शे निर्गमे तथा॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजं॥ प्रसन्न
वदनं ध्यायेत्सर्वविघ्नोपशांतये॥ अभीप्सितार्थसिध्यर्थं पूजितो यः सुरासुरैः॥ सर्वविघ्नच्छिदे तस्मै
गणाधिपतये नमः॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधके॥ शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते॥
सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं॥ येषां हृदिस्थो भगवान्मंगलायतनं हरिः॥ तदेव लग्नं सुदिनं च

देवताबलं चंद्रबलं तदेव॥ विद्याबलं दैवबलं तदेव लक्ष्मीपते तेहृदयं स्मरामि॥ यत्र योगेश्वरः कृष्णो यत्र पा
र्थो धनुर्धरः॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः॥ देवा दिशंतु नः
सिद्धिं ब्रह्मेशानजनार्दनाः॥ इति श्लोकान्पठित्वा॥ ॐ लक्ष्मीनारायणाभ्यां नमः॥ उमामहेश्वराभ्यां नमः॥ श
चीपुरंदराभ्यां नमः॥ मातापितृभ्यां नमः॥ इष्टदेवताभ्यो ब्राह्मणेभ्यो नमः॥ कुलदेवताभ्यो नमः॥ स्थानदेवता
भ्यो नमः॥ ग्रामदेवताभ्यो नमः॥ वास्तुदेवताभ्यो नमः॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः॥ आचमन प्राणायामौ कृ
त्वा देशकालौ संकीर्त्य ऽमुकफलसिध्यर्थमद्यो ऽद्यवा ऽमुककर्म करिष्य इति संकल्प्य॥ तदंगतयादौ पुण्याप
हवाचनादि करिष्य इति संकल्पयेत्॥ यदा तु प्रयोगाद्बहिर्भूतं पुण्याहवाचनाद्यंगं तदामुकफलसिध्यर्थं
ममुककर्म कर्तुमेगभूतमादौ पुण्याहवाचनादि करिष्य इति प्रत्येकं संकल्प्य॥ प्रधानसंकल्पत्वसर्वं कृ
त्वा तद्दिन एव श्वो वा कार्यं॥ ततो यजमानः षोडशोपचारैर्गणपतिमभ्यर्च्य प्रार्थयेत्॥ ततः कर्त्ता स्वपुरतः ग्रम०

पं.

॥मही द्यौः पृथिवी च न इति मंत्रावृत्या दक्षिणेन तरतो भूमिं स्पृष्ट्वा॥ मही द्यौः पृथिवी च न॥ ऋ० १ ओषधयः
समिति तत्रैव तंडुलपुंजौ कृत्वा॥ आ कलशेषु धावति पुंजोपरि द्वौ सलक्षणौ धातुमयौ मृन्मयौ कलशौ निधाय॥
इमं मे गंग इति तीर्थजलेन प्रत्येकं पूरयित्वा॥ गंधद्वारामिति गंधं कलशयोः प्रक्षिप्य चंदनादिना तावनुलिप्य पुष्प
माल्याभूषितौ तौ कृत्वा॥ पररिवृक्षौ इति सतंडुलाभ्यां सफलाभ्यां सफलाभ्यां पात्राभ्यां कलशयोराननेऽपिधा
नं॥ सर्वत्र प्रतिकलशं मंत्रावृत्तिरुत्तरसंस्था च॥ ततः तत्त्वा यामि शुनःशेपो वरुणस्त्रिष्टुप्॥ कलशे वरुणावाहने
विनियोगः॥ ॐ तत्त्वा यामि ब्रह्मणा वंदमानः ऋ० १ इति मंत्रेणोत्तरकलशे वरुणमावाहयेत्॥ चंदनादिना
पूजयेच्च॥ पुराणपाठवाचने चैवेयं कुर्यात्कलशार्चनं [illegible]॥ दक्षिणः स्थः स्थिरः श्चैव उत्तरस्तु चरस्तु चरस्तथा
॥ने चालयेद्देवता येद्दक्षिणास्थ उत्तरस्थस्तु चालयेत्॥ अन्यथाधर्मे द्दृमिः स्यादेष धर्मः सनातनः॥ ततः उत्तरक
लशे देवता आवाहये देवं॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः॥

ःस्मृताः॥ कुक्षौतु सागराः सर्वे सप्तद्वीपा वसुंधरा॥ ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः॥ अंगैश्च सहिताः सर्वे
कलशंतु समाश्रिताः॥ अत्र गायत्रसावित्री शांतिः पुष्टीकरीतथा॥ आयांतुममशांत्यर्थं दुरितःक्षयकारकाः॥
सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः॥ आपातुममशांत्यर्थं दुरितःक्षयकारकाः॥ इति॥ ततः अवनिकृतजा
नुमंडलः कमलमुकुलसदृशमंजलिंशिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा आशिष
ःप्रार्थयंते॥ प्रार्थनामाह॥ एताः सत्या आशिषः संतु॥ दीर्घानागानघोगिरयः स्त्रीणिविष्णुपदानि च तेनायुः
प्रमाणेन पुण्याहं दीर्घमायुरस्तु॥ शिवा आपः संतु॥ सौमनस्यमस्तु॥ अक्षतं चारिष्टं चास्तु॥ गंधाः पातु
सुमंगल्यं चास्तु॥ अक्षताः पातु आयुष्यमस्तु॥ पुष्पाणिपांतु सौश्रियमस्तु॥ तांबूलानिपांतु ऐश्वर्यमस्तु
॥ दक्षिणाः पातु सुमंगल्यं चास्तु॥ अक्षताः पांतु आयुष्यमस्तु॥ पुष्पाणिपांतु सौश्रियमस्तु॥ तांबूलानि
पांतु ऐश्वर्यमस्तु॥ दक्षिणाः पांतु बहुदेयं चास्तु॥ दीर्घमायुः शांतिः पुष्टिरस्तु तुष्टिश्चास्तु॥ श्रीर्यशोविद्याविन

योवित्तंबऊपुत्रंचायुष्यंचास्तु॥ अत्र सर्वत्र ब्राह्मणैरस्त्विति प्रत्युत्तरं देयं॥ यं कृत्वा सर्ववेद यत्क्रियाकरण
कर्मारंभाः शुभाः शोभनाः प्रवर्त्तंते तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं संविज्ञातं भ
वद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये॥ विप्राः वाच्यतामिति वदेयुः॥ एवमुत्तरत्रापि यथायोग्यं प्रत्युत्तरं
देयं॥ गतेतोयजमानः॥ भद्रंकर्णेभिः॥ ऋ० क० १ द्रविणोदा द्रविणसः० ऋ० क० सविता पश्चातात्० ऋ० क० १ नवो
नवो भवति० ऋ० क० १३ उच्चादिवि० ऋ० क० १ आपउंदंतु जीवसे दीर्घायुत्वाय वर्चसे॥ यस्त्वा हृदा कीरिणा मन्य
मान० ऋ० क० १ ~~संत्वासिंचामि यजुषा प्रजामायुर्धनं च यजमानः॥ भद्रं कर्णेभिः० ऋ० क० १ आपउंदंतु जीवसे~~
यस्मै त्वं सुकृते जातवेदः० ऋ० क० १ संत्वा सिंचामि यजुषा प्रजामायुर्धनं च॥ व्रतनियमतपःस्वाध्यायक्र
तुदमदानविशिष्टानां ब्राह्मणानां मनः समाधीयतां॥ विप्राः॥ समाहितमनसः स्मः॥ यजमानः॥ प्रसी
दंतु भवंतः॥ विप्राः प्रसन्नाः स्मः॥ यजमानः॥ शांतिरस्तु॥ पुष्टिरस्तु० तुष्टिरस्तु० वृद्धिरस्तु० अविघ्न

२ पुत्रसमृध्दिरस्तु॰ ३ भिवर्धिर २ यत्पापं तत्प्रतिहतमस्तु॰

प्र॰ र॰ लो॰

८

मस्तु॰ आयुष्यमस्तु॰ आरोग्यमस्तु॰ शिवं कर्मास्तु॰ कर्मसमृद्धिरस्तु॰ धर्मसमृद्धिरस्तु॰ वेदसमृद्धिरस्तु॰ शास्त्रसमृद्धिरस्तु॰ धनधान्यसमृद्धिरस्तु॰ इष्टसंपदस्तु॰ अरिष्टनिरसनमस्तु॰ यच्छ्रेयस्तदस्तु॰ उत्तरे कर्मण्यविघ्नमस्तु॰ उत्तरोत्तरमहरहरस्तु॰ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां॰ तिथिकरणमुहूर्तनक्षत्रसंपदस्तु॰ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां॰ तिथिकरणमुहूर्तनक्षत्रसग्रहैः सदैवतैः प्रीयेतां॥ दुर्गापांचाल्यौ प्रीयेतां॥ अग्निपुरोगा विश्वेदेवाः प्रीयंतां॥ इंद्रपुरोगा मरुद्गणाः प्रीयंतां॥ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां॥ विष्णुपुरोगाः सर्वे देवाः प्रीयंतां॥ [illegible] माहेश्वरीपुरोगा उमामातरः प्रीयंतां॥ वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां॥ पुरोगाः ऋकपत्न्यः प्रीयंतां॥ ऋषयश्छंदांस्याचार्या वेदा यज्ञाश्च प्रीयंतां॥ ब्रह्म च ब्राह्मणाश्च प्रीयंतां॥ श्रीसरस्वत्यौ प्रीयेतां॥ श्रद्धामेधे प्रीयेतां॥ भगवती पुष्टिकरी प्रीयतां॥ भगवती तुष्टिकरा प्रीयतां॥ भगवती ऋद्धिकरी प्रीयेतां॥ भगवती वृद्धि

२ भगवती कात्यायनी प्रीय॰ भगव

२ ती माहेश्वरी प्रीय॰

(margin:) २ दृष्टाः कामाः संपद्यंतां

(margin:) अरुंधतीपुरोगा

(margin:) राम॰

८

२ सर्वाइष्टदेवताः प्रीयं

करी प्रीयतां॥ भगवंतौ विघ्नविनायकौ प्रीयेतां॥ भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थान
गतः प्रीयतां॥ हरिहर हिरण्यगर्भाः प्रीयंतां॥ सर्वा ग्रामदेवताः प्रीयंतां॥ सर्वाः कुलदेवताः प्रीयतां॥ हरिहरहिर
ण्यगर्भाः प्रीयंतां॥ सर्वा ग्रामदे प्रीयंतां॥ ब्रह्म॥ हताश्च ब्रह्मद्विषः॥ हताः [illegible] ः परिपंथिनः॥ हताश्च
स्यक [illegible] मे रोग विघ्नकर्तारः शत्रवः पराभवं यांतु॥ शाम्यंतु घोराणि॥ शाम्यंतु पापानि॥ शाम्यंत्वित
यः॥ पात्रमध्ये॥ शुभानि वर्द्धंतां॥ शिवा आपः संतु॥ शिवा ऋतवः संतु॥ शिवा अग्नयः संतु॥ शिवा आहुतयः संतु
॥ शिवा ओषधयः संतु॥ शिवा वनस्पतयः संतु॥ शिवा अतिथयः संतु॥ अहोरात्रे शिवे स्यातां॥ निकामेनः
पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यंतां॥ योगक्षेमो नः कल्पतां॥ योगक्षेमो नः कल्पतां॥ [illegible]
॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतु सोमसहिताः आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां॥ भगवा
न्नारायणः प्रीयतां॥ भगवान्पर्जन्यः प्रीयतां॥ भगवान्स्वामी महासेनः पुण्याहकालान्वाचयिष्ये॥ वाच्यातां

१ प्रीयतां — ७२

देवताः

निकामे

५ पाशीर्वचनमपेक्षमाणा

प्र०स्व०
९

मितिविप्राः॥७ ऊतेवशकुनेसामगायन्ति० ऋकु१ योऽस्य यायजति प्रतिवैया ज्यापुण्येवलक्ष्मीः पुण्यामेव
ते लक्ष्मीं संभावयति पुण्याहलक्ष्मीसंस्कुरुते॥ यस्तु पुण्याहेन कृत्वं॥ न्तद्दृकुर्वीतायस्मुषे॥ यदा वैस्त्र यं उद्देति॥ अ
थने कृतं नेति॥ यावन्तितत्र स्त्र्योगच्छेत॥ पत्रमुद्यन्यं पश्येत॥ तावतिकुर्वीत यत्कारी स्यात॥ पुण्याहएवं
कुरुते॥ ता नि वाएता नियमनकृत्वाणि॥ यान्येवदेवनकृत्राणि॥ तेषु कुर्वीत यत्कारी स्यात॥ पुण्याह
एवकुरुते॥ महांसहकुटुंबिनेमहाजनोन्नमस्कुर्वाणोंवाः॥ मुककर्मणः पुण्याहं भवंतो ब्रुवंत्विति त्रिः
ब्रिदेत॥ ॐ पुण्याहमिति त्रिर्विप्राः॥ ॐ स्वस्त [illegible] येवायमुपब्रवामहे० ऋकु१ आदित्यरुद्र
नीयः पथ्येवेतः स्वस्त्याप्रयंतिय था स्वस्तिमभ्युघंतिस्वस्तिमवतः प्रयंतिस्वस्त्युघंतिस्वस्त्युघं ति॥ स्वस्तिनइंद्रो
वृद्धश्रवाः० ऋकु१ अ षो देवा व सोम्यासः॥ चतस्त्रो देवीरजराः श्रविष्ठाः॥ तेयज्ञंपांतु रजसः पुरस्ता
त॥ संवत्सराणांममतं स्वस्ति॥ महर्षिमादिकर्मणाः स्वंतं पर्ववत्॥ स्वस्तिभवंतोब्रुवंत्विति त्रिः॥ ॐ आ

राम०
९

युष्मते स्वस्तीति प्रतिवचनं त्रिः ॥ ऋध्याम स्तोमं सनुयाम वाजं ॥ रु॰ कं॰ १ सर्वाम् ऋद्धिम् ऋध्नुयामिति तं वै तेजसैव पुर
स्तात्पर्यभवच्छंदोभिर्मध्यतो ॥ रु॰ ३ रूपरिष्टाद्गायत्र्या सर्वतो द्वादशाहं परिभ्रयत्सर्वाम् ऋद्धिमार्ध्नोत्सर्वाम् ऋद्धिम् ऋध्नो
ति य एवं वेद ॥ ऋध्यास्म हव्यैर्नमसोपसद्य ॥ मित्रं देवं मित्रधेयं नो अस्तु ॥ अनूराधान्हविषा वर्द्धयंतः ॥ शतं
जीवेम शरदः सवीराः ॥ त्रीणि त्रीणि वै देवानाम् ऋद्धानि ॥ त्रीणि छंदांसि ॥ त्रीणि सवनानि ॥ त्रय इमे लोकाः ॥
ऋध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति ॥ मद्यमित्यादि अस्य कर्मणः ॥ रु॰ ऋद्धिं भवंतोऽनुब्रुवंत्विति त्रिः ॥ ॐ ऋध्य
तामिति प्रतिवचनं त्रिः ॥ ॐ श्रिये जातः श्रिय आनिरियाय ॥ रु॰ कं॰ १ श्रिय एवैनं तच्छ्रियामादधाति संततम्
चावषट्कृत्यं संतत्यै संधीयते प्रजया पशुभिर्य एवं वेद ॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् ॥ अमुं च लोकमि
दमू च सर्वं ॥ तन्नो नक्षत्रमभिजिद्विजित्य ॥ श्रियं दधात्वहृणीयमानं ॥ अहे बुध्निय मंत्रं मे गोपाय ॥ यम् ऋष
मो॰ यस्त्रैविदा विदुः ॥ ऋचः सामानि यजूंषि ॥ सा हि श्रीरमृता सतां ॥ एतैर्मंत्रैर्मंत्रैर्न... राजानं कारयंति ॥ मद्य

मित्यादि पूर्ववत्॥ अमुककर्मणः श्रीरस्त्विति भवंतो ब्रुवंत्विति त्रिर्ब्रूयात्॥ अस्तु श्रीरिति विप्रास्त्रिः॥ वर्षशतं पूर्णं
मस्तु॥ शिवं कर्मास्तु॥ गोत्राभिवृद्धिरस्तु॥ प्रजापतिः प्रीयतां॥ मुकेभिरंगैरजस्रा आततन्वान्‌० ऋ०क०१ तदप्येष
श्लोकोभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे॥ आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥ तत
न्तरं कलशं दक्षिणहस्ते दक्षिणकलशं वामहस्ते गृहीत्वा तांधाराद्वयं संततं यात्रेभिषिंचेदेभिर्मंत्रैः॥ अ
वात्तो ष्यते प्रतिजानीयस्मात्‌० ऋ०क०४ शिवं शिवं॥ ततः कर्तुर्वामतः पत्नीमुपवेश्य पात्रयाति तन्नत्वेनप
ल्लवहूर्वादिभिरुदक्षु रवा विप्राः अभिषिंचेयुस्तिष्ठंतः॥ तत्र मंत्राः॥ ॐ समुद्रज्येष्ठाः सलिलस्य मध्यात्‌० ऋ०क
४ त्रायंतामिह देवाः० ऋ०क०३ इमा आपः शिवतमा इमाः सर्वस्य भेषजीः॥ इमा राष्ट्रस्य वर्द्धनीरिमा राष्ट्रभृतो मृ
ताः॥ याभिरिंद्रमभ्यषिंचत्प्रजापतिः सोमं राजानं वरुणं यमं मनुं॥ ताभिरद्भिरभिषिंचामि त्वामहं राज्ञां त्वमधि
राजो भवेह॥ महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥ देवस्य त्वा सवितुः प्रसवे ए०म०

महांतं त्वा

श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि ॥ बलाय श्रियै यशसेन्नाद्याय ॥ ॐ भूर्भुवः स्वः ॥ इंद्रियं वा एतदस्मिन्लोके यद्दधि ० सुरखं शिवं मुपस्थ शस्त्रादिस्व स इति ब्रह्मणः ॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते ॥ आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः ॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः ॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचंतु ँ श्च तर्पिताः ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ९ इति पो

राहुः केतु

पश्चि१

11

प्र०र०ल०
११

रारमान् श्लोकानपि पठं त्वाभिषेके॥ तच्छयोरिति मंत्रांते अमृताभिषेको स्त्विति वदेयुः॥ ततश्चाचारप्राप्तं वस्त्रादि
दानं तत्परिधानं च॥ एवं बह्वृच परिशिष्टोक्तं शिष्टाचारप्राप्तं चैकीकृत्य पुराणाह्ववचनमुक्तं॥ ॥इति प्रयोगर
त्ने सकलकर्मोपयोगि पुण्याहवचन प्रयोगः॥ ॥अथ लोकानुसारेणानुकल्प पक्षमाश्रित्य पुण्याहवाचनक
र्म प्रयोगः॥ गर्भाधानादि नामकर्मांत कर्माणि हित्वा अन्नप्राशनादि विवाहांतानि यत्संस्कारेषु अन्येषु च न
वागार प्रवेशादि शुभकर्मसु समंत्रा कुर्यात् पुण्याहं कुर्यात्॥ तत्रैवं॥ देशकालौ स्मृत्वा मुकक कर्मसाफल्यनिरंतर शु
भत्व सिद्धि द्वारा श्री परमेश्वर प्रीत्यर्थं पुण्याहं करिष्य इति संकल्प्य॥ शुद्ध भूमि गृहप्रवेशादि शुभकर्म
साफल्य निरंतर शुभत्व सिद्धि द्वारा श्री परमेश्वर प्रीत्यर्थं मे कुरार्यं पुण्याहं करिष्य इति संकल्प्य॥ शुद्ध भूमि गोम
येनोपलिप्य रंगवल्यादिभिरलंकृत्य तत्रासिता हृता व्रम कीर्य किंचि दुंभीरं नव वेणुपात्रं स्त्रेण वेष्टिते देव
फालिका त्वेन संस्थाप्य वल्मीकमृदं कर्दमं पंकं शुष्क गोमयं च संचित तत्र प्राकृत्य पालिकामूलं स्वेतत्तंदु

एम
११

लैः पूरयित्वा दूर्वांकुराश्वत्थशिरीषबिल्वपत्राण्युपरि स्थमेसु कृत्वैतैर्व्रणुपात्रं प्रक्षिप्य तत्र सितरक्तहरितव
र्णानि पुष्पाण्यपवे कीर्य मध्यादिपंचस्थानेषु देवान्पूजयेत्॥ तत्र ब्रह्मयज्ञानेकक्तुभो ब्रह्मात्रिष्टुप्॥ अनेन
पालिकामध्ये ब्रह्माणमावाहयेत्॥ यत इंद्र भयामहे प्रगाथो भर्गइंद्रो बृहती॥ अनेन पूर्वभागे इंद्रमावा
हयेत्॥ नाकेसुपर्णं भार्गवो वरुणो यमस्त्रिष्टुप्॥ अनेन दक्षिणे यमं॥ तत्त्वायामि वाहयेत्॥ नाकेसुप
र्णं भार्गवो वरुणो यमस्त्रिष्टुप्॥ अनेन दक्षिणे ब्रह्मणो अजीगर्तिः शुनःशेपो वरुणो यमस्त्रिष्टुप्॥ अ
नेन पश्चिमे वरुणं सोमो धेनुं राहूगणो गोतमः सोमस्त्रिष्टुप्॥ अनेन उत्तरे सोममावाहयेत्॥ ततः ब्रह्मणो
नमः आसनमित्यादिके मे शाषोडशोपचारैः पंचदेवताः सम्यगभ्यर्च्य॥ पालिकापश्चिमतः प्राङ्मुखस्तिष्ठन्नु
पतिष्ठेत॥ इंद्रशंपतान्नमस्यामि सर्वकामफलमदान्॥ कुर्वंतु सफलं कर्म कुर्वंतु सततं शुभमिति॥ ततः स्वे
ततं दुलान्तोयेन प्रक्षाल्य प्राच्यादि चतुर्दिक्षु वीजप्रतिनिधित्वेन समंत्रं वापयेत्॥ तत्र॥ यत इंद्र भयामहे त्यादि

यश्चारे मंत्राः प्रागुक्ताः॥ ॥इति नारायणभट्टकृते प्रयोगरत्ने मघोंकुरार्पण प्रयोगः॥ ॥अथाभ्युदयिकश्राद्ध
विधिः॥ ॥तत्र गर्भाधानादिषु गुर्भसंस्कारेषु जातकर्मादिषु पत्यसंस्कारेषु अग्न्याधानादिषु श्रौतकर्मसु स्मा
र्त्तकर्मादिषु वापीकूपतडागा ऽऽरामाध्यापनादिषु देवप्रतिष्ठायां वानप्रस्थाश्रमसंन्यासस्वीकारे तुला
पुरुषादि महादानादौ नवगृहप्रवेशे महानाम्न्यादि वेदव्रतेषु राज्याभिषेके शांतिक पौष्टिकेषु च सर्वेषु उपाक
र्मोत्सर्जनयोरप्येकेन वीनयोर्वा ऽनयोर्वा ऽनयोरन्यत्राप्येवं विधे कार्यं॥ इदमाभ्युदयिकश्राद्धं वत्सरमाणं
च मात्र एतन्नमेकस्यानेक संस्कारेषु एककर्तृकेषु युगपदुपस्थितेषु सर्वादौ सकृदेव तंत्रेण कार्यं॥ न
तु प्रति संस्कारमावृत्या यथा दैवादकृत जातकर्मादिकस्योपनयनकाले जातकर्माद्यनुष्ठाने देशांतरगत
स्य मृत बुध्या कृतौर्ध्वदेहिकस्यागतस्यागतस्य पुनर्जातकर्मादि संस्काराणां विहितानां युगपदनुष्ठाने
वा॥ तदनुष्ठाने कर्मनाशाजलस्पर्शादिनो प्रायश्चित्ततया पुनः संस्काराणां युगपदनुष्ठाने वा॥ तदुक्तं ब्र

स्मृपुराणे॥ गणेशः क्रियमाणानां मातृभ्यः पूजनं सकृत्॥ सह देवमवेक्ष्याद्यमारैर्नयप्रयागादिष्विति॥ तत्रासु
रयिकस्माद्दैकर्तव्ये मानुष्या दैवस्तद्द्विधा मातर आरोपण्याः॥ तत्र मानुष्या मातरो ष्टौ मातृपितामही प्रपिताम
ह्यः॥ मातामही मातुः पितामही मातुः प्रपितामहीति षट् पितृष्वसा मातृष्वसा चेति॥ ब्रह्माण्या चास्तथा सप्त
गौ क्षेत्रपालगणाधिपान्॥ ब्रह्माण्याद्याः॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही च तथेन्द्रा
णी चामुण्डा सप्त मातरः॥ दुर्गां क्षेत्राधिपतिं गणाधिपतिं च पूजयेत्॥ तथा कात्यायनः॥ कुड्यलग्ना वसो
र्धाराः पंच धारा घृतेन तु॥ कारयेत्सप्त चा धारा नातिनीचा न चोच्छ्रिता॥ गौरी पद्मा शची मेधा सावित्री वि
जया जया॥ देवसेना स्वाहा मातरो लोकमातरः॥ धृतिः पुष्टिरात्मनः कुलदेवता सहेति॥ आत्मदेवता आ
त्मदेवता आत्मकुलदेवता॥ आयुष्याणि च शान्त्यर्थं जपेदत्र यथा तेन समाहितः॥ आयुष्याणि आ नो भद्रा इत्या
दीनि गतत्वः हृद्विस्राद्दनव दैवतं पार्वणात्रयात्मकं॥ तत्र क्रमम आश्वलायनाचार्यः॥ माता पितामही चैव

स्वधा

स्तथातुष्टि

संपत्न्याः प्रपितामही ॥ पित्रादयस्त्रयश्चैव मातुः पित्रादयस्त्रयः ॥ एतेन वाचनीयास्तु पितरोऽभ्युदये द्विजैरिति ॥ यत्तु
वृद्धवसिष्ठः ॥ नांदीमुखे विवाहे च प्रपितामहपूर्वकं ॥ नाम संकीर्तयेद्विद्वानन्यत्र पितृपूर्वकमिति ॥ समत्यर्थसा
रस्थ ॥ वृद्धमुख्याश्च पितरो वृद्धिश्राद्धेषु भुंजते इति ॥ तच्छाखांतरविषयं ॥ आश्वलायनानां तु आत्तु सोम्येन मा
त्रादिक्रमेणैव ॥ आश्वलायनाचार्यवचनात् ॥ यत्तु ब्रह्मपुराणे ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥
त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः ॥ तेभ्यः पूर्वे त्रयो ये तु नांदीमुखाः स्मृता इति ॥ तन्महालयप्रकरण
पठितप्रोष्ठपदपौर्णमासीनिमित्तकश्राद्धविष्णुपुराणे ॥ कन्याविवाहादीनन्तु क्रमप्यनांदीमुखाः स्मृता इ
ति ॥ तन्महालयप्रकरणपठितप्रोष्ठपदपौर्णमासीनिमित्तकश्राद्धविषयं तत्प्रकरणपाठादित्यवं हेमाद्री
दयस्तु चिरे ॥ इह च नांदीमुखे संहितकान्मातादानुद्दिशेत् ॥ विष्णुपुराणे ॥ कन्याविवाहादीनन्तु क्रमप्यनांदी
मुखान्पितृन्नांदीतर्पयेत्स्वयतो गृहीस्तुकेः ॥ ब्रह्मपुराणे च ॥ अन्नाद्यन क्रमप्यपितृन्नांदीमुखान्तामतर्पय राम०

त्। विधिपूर्वकमित्युक्तेः॥ हद्वपराशरेण तु देवानामपि नांदीमुखविशेषणामुक्तमत्र॥ नांदीमुखेभ्यो देवेभ्यः मरीचि
णां कुशासनमिति॥ वृद्धिश्राद्धे च कालः॥ कर्माहात्पूर्वे षष्ठेऽप्य पर्वमेतत्पार्वणं॥ कर्माहे पितृपार्वणं॥ कर्मांत
राहे मातामहपार्वणमिति॥ अस्यासंभवे पूर्वेद्युरेव पूर्वेद्युरेव पूर्वाह्णे मातृकं मध्याह्ने पैतृकमपराह्णे मा
तामहानां॥ अस्याप्यसंभवे आह स्व दमनुः॥ अयामे श्राद्धं कामानां नांदीश्राद्धं त्रयं बुधः॥ पूर्वेद्युरेव कुर्व
तपूर्वाह्णे मातृपूर्वकमिति॥ इदं च महत्सु कर्मसु अल्पेषु तु कर्माहे एव श्राद्धं॥ पुत्रजन्मनि तद्दिने वा
चौवा मुक्तवतोपवासिना वा पुत्रजन्मानंतरमेव कार्यं॥ अत्र संकल्पादौ विशेषः संग्रहे॥ पुभायप्रथमां
तेन हेम्ना संकल्प्यमाचरेत्॥ न षष्ठ्यां यदि वा कुर्यान्महादोषोऽभिजायते॥ अनेनैव च दृष्टश्राद्धानाम रूपाणामजो
त्रिणां॥ अमावास्यामतिलादेषु नांदीश्राद्धं च सव्यवत्॥ कारिकारिका च॥ संबंधनामरूपाणि वर्जयेदत्र
कर्मणि॥ अत्र सत्यवसू विश्वेदेवौ तत्स्थाने दैवविप्रौ॥ मात्रादीनां प्रत्येकं द्वौ द्वौ एवं विंशति ब्राह्मणाः॥ य

15

प्र०रत्न०
१८

द्वामात्रादीनां त्रयाणां द्वौ द्वौ एव मध्ये ॥ अत्र नाप्यसव्यं तिलैश्च कुर्यात् ॥ पृथ्वीस्थाने यवा एव ॥ सुधास्थाने त्वाह
शौनकः सव्यज्ञानुनिपातनाभावः ॥ नान्नस्थापनं प्राङ्मुख एव कुर्यात् ॥ प्रदक्षिणमुपचारोऽत्र जुद्दर्भैः ॥ किंचेत्यादयो
विशेषो ग्रंथांतरतो ज्ञेयाः ॥ पिंडदाने कुलदेशाचारतो व्यवस्था भविष्यपुराणे ॥ पिंडनिर्वपणं कुर्यान्नवा कुर्या
न्नराधिप ॥ वृद्धिश्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु ॥ पिंडदानपरे विशेषो वसिष्ठेनोक्तः ॥ दधिकर्कंधुसंमि
श्रान्पिंडान्दद्याद्यथाक्रमम् ॥ कर्कंधु बदरीफलं ॥ तथा एकैकस्मै पिंडद्वयं देयं ॥ एकेनाप्याऽपरत्र हेमाद्रावा
पिंडद्वयं बुधः इति चतुर्विंशतिमतात् ॥ अन्ये च बहवो विशेषा ग्रंथांतरतो ज्ञेयाः ॥ दक्षिणात्यानां विस्तरतन्त्र वृद्धि
श्राद्धाचाराभावान्नेहोच्यंते ॥ अथाभ्युदयिके कर्तृनिर्णयः ॥ ॥समायणाये॥ ॥ नांदीश्राद्धं पिता कुर्यादाद्ये
पाणिग्रहे पुनः ॥ अतऊर्ध्वं प्रकुर्वीत स्वयमेव यशीयं वं तु नांदिकं ॥ द्वितीयपाणिग्रहे त्वादौ वर एव कुर्यादित्यर्थ
॥ कात्यायनः ॥ स्वापितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ॥ पिंडानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात्

रत्न०
१८

॥ तेषां सुतानामुद्वाहनात्मयमविवाहपर्यंतं पितास्वपितृणां यत्क्रमस्तेन क्रमेणाधिभ्यः पिंडान्नं तदुपलक्षितं
वृद्धिश्राद्धं कुर्यात् ॥ तस्य पितुरभावे तु तस्य संस्कार्यस्य पितृणां यत्क्रमस्तेन क्रमेणापितृव्यादावर्धमातुलादिः
श्राद्धं दद्यान्न स्वपितृभ्य इति हेमाद्रिणा व्याख्यातं ॥ जीवत्पितृकस्तु पितुर्मात्रादिभ्यो वृद्धिश्राद्धं दद्यान्न स्व
पितृभ्य इति हेमाद्रिणा व्याख्यातं ॥ जीवत्पितृकस्तु पितुर्मात्रादिभ्यो वृद्धिश्राद्धं दद्यान्नैः कुर्यात् ॥ वृद्धोनी
थ्यै च सन्यस्ततातेच मतितेसति ॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥ एतत्साग्निकविषयमित्येके ॥ वि
द्वत्सु ॥ पितरिजीवति यः श्राद्धं कुर्यात्स येषां पिता कुर्यात्तेषां कुर्यात्पितरि पितामहे च येषां प्रपितामहः ॥ पितरि
पितामहे प्रपितामहे चैनेव दद्यादिति ॥ आश्वलायनगृह्यपरिशिष्टे तु ॥ जीवत्पितास्तु तत्संस्कारेषु मातृमा
तामहयोः कुर्यात् ॥ तस्यां जीवत्यां मातामहस्यैव कुर्यादिति ॥ ॥ अथास्य शिष्टप्रचुराचारपरिगृहीतः संक
त्यविधिना प्रयोगः ॥ ॥ उपनयनादिमहत्सु कर्मसु पर्वेषु जातकर्मादिष्वल्पकर्मसु तदङ्गरूपं नान्दीश्राद्धं

कुर्यात् ॥ तत्रादौ कर्त्ता कृतमांगलिकस्नानो धौतवासाः कृतस्वस्त्ययनो नांदीश्राद्धपर्वांगं मातृकापूजनं कु
र्यात् ॥ तच्चेत्थं ॥ गोमयोपलिप्ते रंगमालादिभिरलंकृते श्राद्धस्थले प्रतिमासु कृतपुंजेषु द्विजातिषु वा यथा
लाभं संकल्पपूर्वकं मातृपितामहीप्रपितामहीमातामहीमातृपितामहीपितृष्वसृमातृष्वस्रात्माग्रजे
मानुषमातॄर्यथासंभवं ॥ यद्वा पर्वोक्ता विनायकाद्याः षण्मातृप्रपितामहीपितृष्वसृमातृष्वस्रात्माग्र
ष्ठामानुषमातॄर्यथासंभवं ॥ यद्वा पर्वोक्ता विनायकाद्या गौर्यादिषोडशमातॄः ब्राह्म्यादिसप्तमातॄः दुर्गां क्षे
त्रपालं गणाधिपं च प्रत्येकं कांडानुसमयेन पदार्थानुसमयेन वा प्रणवादिनमोंतनाममिर्मंत्रैरावाहनादिभिर
भ्यर्चयेत् ॥ यद्वा ॥ गौर्यादिषोडशमातृभ्यो नमः ॥ ब्राह्म्यादिसप्तमातृभ्यो नम इति संक्षेपेण समुदितरूपे
णार्चयेत् ॥ ततः आनोभद्रा इत्यादि शतं जीव इत्यादि च सूक्तं पठित्वा नांदीश्राद्धसंकल्पं कुर्यात् ॥ तत्रोपवी
ती प्राङ्मुखस्तिथ्यादि संकीर्त्य सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः मातृपितामहीप्रपितामह्यः अ

मुकगोत्राः नांदीमुखाः पितृपितामहप्रपितामहा अमुकगोत्राः नांदीमुखाः मातामहमातुःपितामहमातुःप्र
पितामहा अमुकगोत्राः सपत्नीकाः नांदीमुखा एतानुद्दिश्य संकल्पविधिना नांदीश्राद्धं करिष्ये इति संकल्प
लक्षणालक्षितान्विंशतिःसंख्याकान् षट्संख्याकान्वा ब्राह्मणान्पूर्वेद्युः सद्यो वा देवपूर्वकं निमंत्र्य कृताभ्यं
गस्नातानन्यवीक्षितपरिवारकेण गाचार्यं संबुध्योत्तया तेषां पादान्प्रक्षाल्य प्राङ्मुखानुपवेश्य षष्ठ्या विभक्त्यान्तर्के
केतु दर्भयुग्मासनं प्रदायापः प्रदाय कृतांदत्वाऽद्वितीययाऽमंत्रकमावाह्य गंधपुष्पमाल्यधूपदीपाच्छा
दनाभरणानि प्रथमया द्विर्द्विर्दत्वा मधुरद्रव्यसहिताः मनस्सममन्नं परिविष्य पृथिवीते पात्रमित्याद्युक्त्वा
चतुर्थ्योक्त्वा स्वाहा हव्यं न ममेति सर्वत्र त्यक्त्वा ॥ तथैवरूपास्मिन् पृथिवीते पात्रमित्याद्युक्त्वा चतुर्थ्योक्त्वा स्वा
हा हव्यं न ममेति सर्वत्र सक्त्वा ॥ यते तिपंचानां काश्यपोसितः सोमो गायत्री ॥ जपे विनियोगः ॥ एताः पंचर्च
ः श्रावयित्वा तेन्नरापोशनादौ कृते हस्तप्रक्षाल्य दिक्कं कृत्वा द्राक्षामलकेतन्निष्क्रयं वा दक्षिणां दत्वा ॥ भा

प्रं०र ल

१६

तापितामहीचैवतथैवप्रपितामही॥पितापितामहश्चैवतथैवप्रपितामहः॥मातामहस्तत्पिताचप्रमातामहकादयः॥
एतेभवंतुमेप्रीताःप्रयछंतुचमंगलमित्युक्त्वाकृतांजलिःसंप्रा ॰ र्थ्यप्रणिपत्यब्राह्मणान्विसृज्याचम्यगौर्या
दीन्विसर्जयेत्॥ ॥अथोतोपिसंक्षिप्तःशिष्टैःक्रियमाणोनांदीश्राद्धप्रयोगः॥ ॥एवंयज्ञोपवीतीनांदीश्राद्धस्यादौ
नांचपदांक्षाल्यासदर्भोकुशान्कृत्वाजलंचादायसत्यवसुसंज्ञकाविश्वेदेवानांदीमुखाःभूर्भुवःस्वःइदंवःपा
द्यं॥मातृपितामहीप्रपितामह्यःनांदीमुख्यःभूर्भुवःस्वःइदंवःपाद्यं॥मातृपितामह्यःनांदीमुख्यःभूर्भुवःस्व
ःइदंवःपाद्यं॥पितृपितामहप्रपितामहाःनांदीमुखाःभूर्भुवःस्वःइदंवःपाद्यं॥मातामहमातुःपितामहमातुःप्रपिता
महाःसपत्नीकाःभूर्भुवःस्वःइदंवःपाद्यं॥इत्युक्त्वासर्वत्रपात्रेसदर्भोदकंजलंक्षिपेत्॥एवंभवत्पुनःसत्या
दीन्विश्वान्देवान्मात्रादीःपित्रादीन्मातामहादींश्चत्रिःसंबुध्यात्वापूर्ववद्घ्राह्म्येतिभिरिदमासनंगंधाद्युप
चारकल्पनेस्वाहानममेतिदर्भीकृतगंधपुष्पजलानिप्रत्येकंपात्रेक्षिपेत॥ततोविनायकाद्याःगौर्यादिषोड

रामं०

१६

शमातरोन्नात्यादिसप्तमातरश्च भूर्भुवःस्वःइदं दास्यमानं वायुगमब्राह्मणभोजनपर्याप्तममन्नं यथाशक्ति सोप
स्करममृतरूपेण स्वाहा न ममेति हृत्वा दीन्निक्षिपेत्॥ एवं विश्वेभ्यो देवेभ्यो मात्रादिभ्यः पित्रादिभ्यो मातामहादिभ्यः
सपत्नीकेभ्यः संबुध्यारघात॥ स्वन्नासंभवे स्वन्नपरस्थाने इदं दास्यमानं वा सोपस्करमामभिति वदेत्॥ तच्चतुर्गु
णं द्विगुणं द्विगुणं समं वा हिरण्यप्रतिनिधिभूतं द्रव्यं वेति वदन् शाक्त्या संकल्पयेत्॥ ततः पूर्ववदुपास्मै इत्यादि पं
चर्चः श्रावयित्वा कृतस्य हृद्धिश्राद्धस्य संपूर्णतासिद्ध्यर्थं यामलकेन्नस्मातिनिधित्वेन द्रव्यं वा दक्षिणां सं
प्रददे न मम इत्युक्त्वा प्रजापते न त्वदिति मंत्रं जपित्वा अनेन नांदीश्राद्धेन नांदीमुखदेवताः प्रीयंतां वृद्धिरस्तु॥ मा
तापितामही चैवेत्युक्तं श्लोकद्वयं जपेत्॥ ततस्त्वाचारतः किंचिद्द्रव्यं इलामग्न इति मंत्रं जपन् संकल्प्यपात्रेण सं
घट्टनेन शाब्दं कुर्यादिति॥ ततो मातृकाविसर्जयेत्॥ जीवन्मातृकस्य न मातृपार्वणं॥ जीवन्मातामहस्य न माता
महपार्वणं॥ द्वारलोपा पार्वणं द्वारलोपात्॥ जीवत्पितृकस्य येभ्यः पिता दद्यादित्युक्तमेव॥ ॥इति श्रीभट्टरामेश्व

प्र०र०

२

रस्तुतश्रीनारायणात्मद्विजविरचिते प्रयोगरत्ने वृद्धिश्राद्धप्रयोगः ॥ ॥अथ कौतुकबंधप्रयोगः ॥ ॥स च प्रस्तुताचारा
भावात्संक्षेपतः सूत्रादिमात्रं गृहीत्वा लिख्यते ॥ आचार्यो दर्भमयकूर्चं उदकुंभं निधाय सात्कृतकांस्यपात्रे पं
चगुणीकृतं कार्पाससूत्रं निधाय तत्समीपे प्राङ्मुखयजमानमुपवेश्य सकुशहस्तैः सह कुंभोदकेन तत्सूत्रं मंत्रैर
भिषिंचेत ॥ ते च मंत्राः ॥ तत्सवितुर्विश्वामित्रः सविता गायत्री ॥ अग्निमीळे मधुच्छंदा अग्निर्गायत्री ॥ सूत्रप्रो
क्षणे विनियोगः ॥ एवमुत्तरत्र ॥ इषे त्वोर्जे त्वा ॥ अग्न आयाहि वीतये ॥ शं नो देवीरभिष्टये ॥ आपो हि ष्ठेति न
वर्चस्य सूक्तस्यांबरीषः सिंधुद्वीप आपो गायत्री ॥ पंचमी वर्द्धमाना सप्तमी प्रतिष्ठा ॥ त्र्यंत्ये द्वे अनुष्टुभौ ॥ ए
तोन्विंद्रं मो गिरसस्तिरश्चिरिंद्रोनुष्टुप् ॥ ऋतं चेति तृचस्याघमर्षणो भाववृत्तोनुष्टुप् ॥ प्रशर्द्धायश्यावा
श्वामरुतो जगती ॥ स्वस्ति नो मिमीतामिति स्वस्त्यात्रेयो विश्वेदेवास्त्रिष्टुप् ॥ स्वादिष्ठयेति दशर्चस्य सूक्तस्य सूक्त
स्य मधुच्छंदाः पवमानः सोमो गायत्री ॥ रक्षोहणमिति पंचविंशत्यृचस्य सूक्तस्य सूक्तस्य बौधरःकुछिभारद्वा

रामं

१७

जः पायुरक्षोहाग्निस्त्रिष्टुप् ॥ अंत्याश्चतस्रोनुष्टुभः ॥ रात्री व्यख्यदित्यष्टर्चस्य सूक्तस्य सोभरः कुशिको रा
त्रिर्वा भारद्वाजी रात्री रात्रिस्तवं गायत्र्यः ॥ उपतिष्ठेति पंचदशर्चस्य सूक्तस्य वामदेवो रक्षोहा त्रिष्टुप् ॥ तरत्समंदीति चर्गा तु
मवत्सारः पवमानसोमो गायत्री ॥ सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायणः पुरुषोनुष्टुबंत्या त्रिष्टुप् ॥ वि
ष्णोर्नुकमिति षडृचस्य सूक्तस्य औचथ्यो दीर्घतमा विष्णुस्त्रिष्टुप् ॥ अतो देवा इति षडृचस्य सूक्तस्य का
ण्वो मेधातिथिर्विष्णुर्गायत्री ॥ परो मात्रयेति सप्तर्चस्य सूक्तस्य [illegible] मैत्रावरुणो
वसिष्ठो विष्णुस्त्रिष्टुप् ॥ हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्यानंदकर्दमचिक्लीतेंदिरासुतास्त्रयः
॥ श्रीर्देवताद्यास्तिस्रोनुष्टुभः ॥ कांसोस्मितामिति बृहती ॥ ग्नरयो त्रिष्टुप् ॥ अष्टावनुष्टुभोंत्या प्रस्ता
रपंक्तिः ॥ यज्जाग्रतो दूरमित्याद्याः शिवसंकल्पाख्याः षण्मंत्राः परशाखीयाः ॥ विहि होत्रेति पंचर्चस्य सू
क्तस्य वामदेवो गौतमो वायुरनुष्टुप् ॥ मुंचामि त्वेति पंचर्चस्य सूक्तस्य प्राजापत्यो यक्ष्मनाशन इंद्रस्त्रिष्टुप् ॥

प्र०रत्न०

१८

अतोदेवा इति षडृचस्य सूक्तस्य काण्वो मेधातिथिर्विष्णुर्गायत्री ॥ परो मात्रयेति सप्तर्चस्य सूक्तस्य मैत्रावरुणो व
सिष्ठो विष्णुस्त्रिष्टुप् ॥ हिरण्यवर्णा मिति पंचदशर्चस्य सूक्तस्यानंदकर्मदंचिक्लीतेंदिरासुत ऋषयः ॥ श्री
र्देवता आद्यास्तिस्रोनुष्टुभः ॥ कांसोस्मितामिति बृहती ॥ उत्तरयोस्त्रिष्टुप् ॥ अष्टावनुष्टुभोत्याप्रस्तारपंक्ति
॥ यज्जाग्रतो दूरमित्याद्याः शिवसंकल्पाख्याः षराभवाः परशाखीयाः ॥ विहि होत्रेति पंचर्चस्य सूक्तस्य वा
मदेवो गोतमो वा पुरउष्णिक् ॥ मुंचामि त्वेति पंचर्चस्य सूक्तस्य प्राजापत्यो यक्ष्मनाशन इंद्रस्त्रिष्टुप् ॥ अंत्या
नुष्टुप् ॥ स्योना पृथिवीति मेधातिथिर्भूमिर्गायत्री ॥ इदं विष्णुरिति काण्वो मेधातिथिर्विष्णुर्गायत्री ॥ द्रविणोदा आंगिरसः कुत्सो द्रविणोदा अग्निस्त्रिष्टुप् ॥
विद्युन्न या पतंती पुरूरवा उर्वशी त्रिष्टुप् ॥ उलूकयातुं वसिष्ठ इंद्रस्त्रिष्टुप् ॥ पिशंगभृष्टिमंभृणमिति देवो
दासिः पुरुरूप इंद्रो गायत्री ॥ एतैः सर्वैर्मंत्रैः स्नात्रमभिषिंच्य ॥ जातवेदसे मारीचः कश्यपो जातवेदा अग्निस्त्रि
ष्टुप् ॥ अनेन गंधेन सूत्रं विलिप्य ॥ विश्वेत्ता ते भार्गवो नेम इंद्रो जगती ॥ अनेन पुंसो दक्षिणहस्ते बध्नीयात् ॥ एम०

१८

तत आचार्यो ऋत्विजश्च यजमानस्य रक्षां कुर्युः ॥ ते च मंत्राः ॥ शतंजीवेति द्वयोः प्राजापत्यो यक्ष्मनाशन ऋंद्रा त्रि
ष्टुप् ॥ अंत्यानुष्टुप् ॥ येयहेनेत्यष्टर्चस्य स्तकस्य मानवो नाभानेदिष्ठो विश्वेदेवा आद्याश्चतस्रो जगत्यः पंचम्य
नुष्टुप् षष्ठी बृहती सप्तमी सतो बृहती अष्टम्यनुष्टुप् ॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् ॥ एतैर्मंत्रै रक्षायां कृतायां ॥ य
जमानः कृतकर्मसाद्गुण्यायमाचार्याय ऋत्विग्भ्यश्च यथाशक्ति दक्षिणां दद्यात् ॥ अन्येभ्योपि ब्रा यसी दद्यादिति
॥ ॥ इति प्रयोगरत्ने कौतुकबंधप्रयोगः ॥ ॥ अथ ग्रहयज्ञप्रयोगः ॥ ॥ स च नित्यनैमित्तिककाम्यभेदेन त्रे
धा ॥ अयनविषुवोपरागादिषु नित्यः ॥ गर्भाधानादिकर्मप्रारंभेषु नैमित्तिकः ॥ विपदपगमसंपदादिकामनासु
कामनास्तु काम्यः ॥ अत्र मत्स्यलौन्याकरतो ह्येयानि ॥ ग्रहरूपादि ज्ञात्वा कर्म कार्यं ॥ अन्यथा विफलं ॥ तदाहाश्व
लायनाचार्यः ॥ रूपवर्णायुधस्थानमंडलासनवाहनान् ॥ समिल्लुंडोयहारांश्च पुष्परत्नाकृतीरपि ॥ गायत्रीमु
ख मंत्रांश्च नाममंत्रांश्च केवलान् ॥ अधिपत्याधिदेवानां मंत्रांश्च ऋष्यादिसंयुतान् ॥ तत्तन्मूर्तिश्च जानीयाद्धोम

न्तर्चेन्नवग्रहान्॥ऋत्वास्त्वेवपुमानिष्फ्रात त्फलं नैव विंदति गदुःखं चाप्नोति सुमहद्यत्नाद्रि स्थाप्य वित्पुमान्द्र
ति॥अथ यत्रीग्रहणायत्री प्रयोगो॥ वक्ष्यस्यते॥ वरुणोदयश्च॥ मंडपकुंडादि च कार्यं यथोक्तं कार्यं॥ नित्यनैमित्ति
कयोस्तु त्रानित्यं॥ नित्यं नैमित्तिकं हित्वा सर्वमन्यत्समंडपामिति मात्स्योक्तेः॥ कुंडे वा स्थंडिलेऽपि वेति आचार्यो
क्तेश्च॥ मंडपलक्षणं हेमाद्रौ मत्स्यपुराणे॥ गृहस्योत्तरपूर्वेशामंडपं कारयेद्बुधः॥ रुद्रायतनभूमौ वा च
त्वारिकर्तव्या निविचक्षणैः॥ कुंडं च स्कंदपुराणे॥ नवग्रहमखे कुंडं हस्तमात्रं समंततः॥ चतुरस्रमधो हस्तं
योनिवक्त्रं समेखलं॥ चतुरंगुलविस्तारा मेखला तद्वदुच्छ्रिताः॥ मात्स्ये॥ वितस्तिमात्रा योनिः स्यात्षट्सप्तांगु
लाविस्तृता॥ कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता॥ गजोष्ठसदृशी तद्वदायताच्छिद्रसंयुता॥ मेखलो
परि सर्वत्र अश्वत्थदलसंनिभा॥ गजोष्ठतुल्या अश्वत्थदलतुल्या वेति विकल्पः॥ स च योनिः पश्चिमतः का
र्या॥ पश्चिमे मध्यभागे तु योनिं कुर्याद्विधानतः इति गर्गोक्तेः॥ मात्स्ये॥ मानहीनाधिकं कुंडमनेकभयदं म

वेत ॥ तस्य चोत्तरपूर्वे तु स्थंडिलं हस्तमात्रकं ॥ विप्रे चतुरस्रं च वितस्तुच्छ्रायसंमतं ॥ स्थंडिले वेदिः ॥ वप्रा मे
खलाः ॥ द्विरंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः ॥ अग्रयोच्छ्रायसंयुक्तैव प्रद्वयमथापरि ॥ द्व्यंगुलस्तत्र विस्तारः
सर्वेषां कथितो बुधैरिति ॥ अन्यत्सर्वं वृत्तोद्देशनामादिप्रयोगस्य स्पष्टीभविष्यति ॥ ॥ अथ ग्रहयज्ञप्रयोगः ॥
॥ यजमानः स्नात्वा नित्यकर्म निर्वर्त्य मौहूर्तिकोक्ते काले देशकालौ संकीर्त्य अयनादिनित्यकालेषु संक
ल्पयेत ॥ ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्य इति ॥ गर्भाधानादिनिमित्तेषु अमुक
कर्मकर्तुमादौ आदित्यादिग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्य इति ॥ विपदपगमा
दिकामनायां तु अमुककामनासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्य इति ॥ ततः संभारान्संभरेत् ॥ अत्र
नित्यनैमित्तिकयोः प्रतिपदोक्तवस्तूनि तदभावे ऽनुकूल्यरूपाणि वा यथायथा शक्तिसंपादयेत ॥ काम्ये तु प्र
तिनिध्यभावात् प्रतिपदोक्तवस्तून्येव ॥ तत्र आचार्यादिवरणं ॥ तत्र विधिवित्तं त्वशाखाविधिं स्वशाखाविदं सा

प्र०र त्न०

२०

चारमेकमस्मिन् यह्यन्नमखेत्वमाचार्यकं कर्विति ॥ पाणिना पाणिना पाणिमुपस्पृश्य पद्गृणुयात् ॥ अन्यानर्त्वि
ज्यं कुर्विति प्रत्येकं हणुयात् ॥ ते च होमान्तु सारेण चत्वारो द्वौ षोडश वा ॥ ते च करिष्यामीत्युक्त्वा आचार्यमेयुः ॥
ततो यजमानः त्वान्यथाशक्त्या चर्ययेत् ॥ ततः आचार्यः कर्म संकल्प्य पूर्वं कं ग्रहान्दुत्तरतः ऐशान्यां वा कृतायां चतु
दिक्षु हस्तमात्रावरणायां चतुरस्रं वीयतु लममाशात्रिभूमिकायां ग्रहवेद्याम्सु क्ष्कुम्नी हितंडुलैः सकर्णिकमष्ट
लमंबुजमुल्लिरव्य कर्णिकायां दलेषु च वर्तुलादि ग्रहपीठानि तत्तद्वर्णाकाकृतैर्यथोपपन्नैर्वा कुर्यात् ॥ तानी
त्थं ॥ मध्ये रक्ताकृतैर्वर्त्तुलं ॥ आग्नेय दले श्वेताकृतैश्चतुरस्रं ॥ दक्षिण दले रक्ताकृतैस्त्रिकोणं ॥ ईशान दले ह
रिताकृतैर्बाणाकारं ॥ उत्तर दले हरिताकृतैर्दीर्घचतुरस्रं ॥ पूर्व दले श्वेताकृतैः पंचकोणं ॥ पश्चिम दले
कृष्णाकृतैः श्वायाकारं ॥ नैर्ऋत्य दले कृष्णाकृतैः सूर्याकारं ॥ वायव्य दले चित्राकृतैर्ध्वजाकारमिति ॥ तत
उदीच्यां रंगवल्लिकारंजितपरिधानपत्त धान्यपीठे नवमंत्र शामकालंकं तेज संप्रम्नयेवानुलिप्तमसंस्कृतंस्तुभ रा०म०

२०

मभिषेककुंभं निधाय॥ इमं मे गंगे इत्यस्य सिंधुक्षित्प्रयमेधो नदीस्तुतिर्जगती॥ अनेन पुरायजलेन पूरयित्वा न
वस्त्रेणावस्त्रयुग्मेन वा वेष्टः॥ हयगजवल्मीकक्रुदगोष्ठराजद्वारचतुष्पथमृदं॥ उद्धृतासि वराहेणाकृष्णेन शत
तबाहुना॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति कुंभे निक्षिप्य॥ इत्यृचि भीम इत्यस्य वैश्वामित्रो रेणुः पवमान
सोमो जगती॥ अनेन न्यग्रोधाश्वत्थप्लक्षजंबूचूततरुत्वचः॥ प्रचोयते घृतपस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप्॥
अनेन तेषां पल्लवान्निक्षिप्य॥ आप्यायस्वेत्यस्य गोतमः सोमो गायत्री॥ अनेन गोक्षीरं॥ दधिक्राव्ण इति
स्य गोतमो वामदेवो दधिक्रावानुष्टुप्॥ अनेन दधि॥ शुक्रमसि ज्योतिरसि तेजोसीत्याज्यं॥ गंधद्वारेत्यस्यान
दः श्रीरनुष्टुप्॥ अनेन गोमयं॥ गायत्र्या गाथिनो विश्वामित्रः सविता गायत्रीनेन नवरत्नानि॥ या ओषधी
रित्यस्याथर्वणो भिषगोषधयोनुष्टुप्॥ अनेन शतौषधानि॥ तदभावे दश मूलानि तदभावे सुवर्णं वा॥ गं
धद्वारामिति गंधं निक्षिप्य॥ सर्वे समुद्राः सरितः॥ गंगे च यमुने चैति॥ इमं मे गंगे यमुने इत्येतैर्मंत्रैः॥ आयोहि

८१

प्र०रत्न

२१

ष्ठेति नवर्चस्य सूक्तस्याम्बरीषः सिंधुद्वीपश्चार्षो गायत्री चर्मी वर्द्धमाना सप्तमी प्रतिष्ठान्त्ये द्वे अनुष्टुभौ अनेन सूक्ते
न॥ नाद्धितेकृत्र मित्याद्येकविंशत्यर्चस्याजीगर्तिः शुनःशेपो वरुण आद्या द्वादश त्रिष्टुभः शिष्टा गायत्र्यः॥ स्वादिष्ठये
तिरष्टार्चस्य सूक्तस्य मधुच्छंदाः पवमानसोमो गायत्री॥ अनेन सूक्तेन च तं कुंभमभिमंत्रयेत॥ यद्वा कलशाभिमं
त्रणेऽन्यं मंत्रविदं नियुंजीत॥ ततः कर्मसंकर्मसेकस्य विधिवत्स्वस्तिवाचनेन ग्रहवेदिपश्चिमे पीठे यथास्थानं यथा
मुखी ग्रहप्रतिमाः स्थापयित्वा दक्षिणवामपार्श्वयोरधिदेवताप्रत्यधिदेवते तदभिमुखे स्थापयेत्॥ तद
भावे पुष्पाक्षतादिषु वा आवाहयेत्॥ तत्रायं प्रकारः॥ व्यस्तसमस्तव्याहृतीनामत्रिभृगुभरद्वाजप्रजापतयत
य ऋषयः॥ अग्निवायुसूर्यप्रजापतयो देवताः॥ गायत्र्युष्णिगनुष्टुप्बृहत्यश्छंदांसि॥ ॐ भुवरादित्यमावा
हयामि॥ ॐ स्वरादित्यमावाहयामि॥ ॐ भूर्भुवःस्वरादित्यमावाहयामि॥ आकृष्णेनेत्यस्याहिरण्यस्तूपः स
विता त्रिष्टुप्॥ ॐ आकृष्णेनेत्यृचमुच्चार्य॥ भगवन्नादित्य ग्रहाधिपते काश्यपगोत्र कलिंगदेशेश्वर जया

राम०

२१

एष्येपायमां गच्छते द्विभुजं पद्माभयहस्तासिं दूर्वावर्णां बरमाल्यानुलेपनध्वजसन्मालिकायां विचित्राभरणभा
स्वरते जो निधे त्रिलोकप्रकाशक त्रिदेवतामय मूर्तेनम स्ते मन्त्रद्वारु णध्वजपताकोपशोभिते कश्यपगोत्रक
लिंगदेशेश्वर नया प्रनसप्ताश्वरथवाहनेनमेरुं प्रदक्षिणीकुर्वन्नागच्छाग्निरुद्राभ्यां सह यम कर्णिकायांता
म्रप्रतिमां प्राङ्मुखं वी वर्तुलपीठेऽधितिष्ठ पूजार्थं त्वामावाहयेत ॥ तद्दक्षिणपार्श्वे ॥ ॐ भूरादित्याधिदेवमग्नि
मावाहयामि ॥ भुवरादित्याधिदेवमग्निमा० ॥ ॐ स्वरादित्याधिदेवमग्निमा० ॥ ॐ भूर्भुवःस्वरादित्याधिदेवम
मग्निमा ॥ अग्निं दूतमित्यस्य काण्वो मेधातिथिरग्निर्गायत्री ॥ रमं मेत्रमु च्चार्य ॥ पिंगभ्रूश्मश्रुकेशो पिंगाक्षत्रि
नयने अरुणावर्णां छागस्थः साक्षसूत्रे सप्तार्चिषं शक्तिधर वरदहस्तद्वयमादित्याधिदेवमग्निमावाहयामि
॥ तद्वामपार्श्वे ॥ ॐ भूरादित्यप्रत्यधिदेवं रुद्रमावाहयामि ॥ ॐ भुवरादित्यप्रत्यधिदेवं रुद्रमा० ॥ ॐ स्वरादित्य
प्रत्यधिदेवं रुद्रमा० ॐ भूर्भुवःस्वरादित्यप्रत्यधिदेवं रुद्रमा० ॥ ॐ त्र्यंबकमित्यस्य वसिष्ठस्त्र्यंबको नुष्टुप् ॥ रमं

22

मंत्रमुच्चार्य त्रिविलोचनं पंचवक्त्रं वृषारूढं कपालशूलखट्वांगधारिणं चंद्रमौलिं सदा शिवमादित्यप्रत्यधिदेवं रुद्रमावाहयामि ॥ तद्दक्षिणपार्श्वे दले ॥ ॐ भूः सोममावाहयामि ॥ ॐ भुवः सोममा० ॥ ॐ स्वः सोममा० ॥ ॐ भूर्भुवः स्वः सोममा० ॥ आप्यायस्वेत्यस्य गोतमः सोमो गायत्री ॥ इमं मंत्रमुच्चार्य ॥ भगवन्सोम द्विजाधिपते सुधामयशरीर अत्रिगोत्र यमुनादेशेश्वर गोक्षीरधवलांग कांत द्विभुज गदावरदानांकित करद्वय कर्पूरामोदबरमाल्यानुलेपन सर्वांगामुक्तमौक्तिकाभरणारमणीय समस्तलोकाप्यायक देवता हे दाघसंतैनमस्तेस श्वेतध्वलध्वजपताकोपशोभितेन दशश्वेताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छागच्छ इहाग्नेयदले मम यागे (?) अधिस्फाटिकप्रतिमां प्रत्यङ्मुखं चतुरस्रपीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि ॥ तद्दक्षिणपार्श्वे ॥ ॐ भूः अपः आवाहयामि ॥ ॐ भुवः अप आवा० ॥ ॐ स्वः अप आवा० ॥ ॐ भूर्भुवः स्वः अप आवा० ॥ अप्सु मे इत्यस्य सिंधुद्वीप आपो गायत्री ॥ इमं मंत्रमुच्चार्य ॥ स्त्रीरूपधारिण्यः श्वेतवर्णा मकरवाहनाः पाशकलशधारिण्यो मुक्ता

मरणा भूषिताः सोमाधिदेवताअप आवाहयामि॥ वामपार्श्वे॥ ॐ भूः गौरीमावाहयामि॥ ॐ भुवः गौरीमा०॥
ॐ स्वः गौरीमा० ॐ भूर्भुवः स्वः गौरीमावा०॥ गौरी र्मिमाय सलिलानि तक्षती॥ इमं मंत्रमुच्चार्य॥ अरुण
सत्रकमलदर्पणाकमंडलुधारिणीं त्रिदश पूजितां सोमप्रत्यधिदेवतां गौरीमावाहयामि॥ अथ दक्षिणा दक्षि
णा दले॥ ॐ भूः अंगारकमावा०॥ ॐ भुवः अंगारकमावा०॥ ॐ स्वः अंगारकमावा०॥ ॐ भूर्भुवः स्वः अंगारकमा
वा०॥ अग्निर्मूर्द्धेत्यस्य विरूपो गारको गायत्री॥ इमं मंत्रमुच्चार्य॥ भगवन्नंगारकोऽस्याकृते भारद्वाजगोत्रावंति
देशेश्वर रक्तालापुं जीय मांग घृते चतुर्भुज शक्तिशूलगदाखड्गधारिन् चर्मरक्ताम्बरमाल्यानुलेपन प्रवालो
ज्ज्वलाय मांस्य भरणाभूषितसर्वांगस्फुरल्लोक दीप्तेन मत्तेमच्चंदरकंध्वजपताकोपशोभितेन रक्तमेषरथवाहने
न मेरुं प्रदक्षिणी कुर्वन्नागच्छ भूमिस्कंदाभ्यां सह यमरक्षितः स्थलमध्ये क्वचेरन प्रतिमां दक्षिणामुखी त्रि
कोणपीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे॥ ॐ भूः अंगारकाधिदेव भूमिमावाहयामि॥ ॐ

प्र० रत्न०
२३

भुवः अंगारकाधिदेवम्भूमिमावा०॥ ॐ स्वः अंगारकाधिदेवम्भूमिमावा०॥ ॐ भूर्भुवः स्वः अंगारकाधिदेव
भूमिमावा०॥ स्योनापृथिवी नृसमेधा तिथिर्भूमि गायत्री॥ इमम्मंत्रमुच्चार्य॥ स्रुक्स्रुवरांगी द्विव्याभरणाभू
षितां चतुर्भुजां गगपृष्ठगतां अंगारकाधिदेवतां भूमिमावाहयामि॥ तथा मयार्चये॥ ॐ भूः अंगारकप्रत्यधि
देवं स्कंदमावा०॥ ॐ भुवः अंगारकप्रत्यधिदेवं स्कंदमावा०॥ ॐ स्वः अंगारकप्रत्यधिदेवं स्कंदमावा०॥ ॐ
भूर्भुवः स्वः अंगारकप्रत्यधिदेवं स्कंदमावा०॥ कुमारश्चित्पितरम्मित्यस्य गृत्समद स्कंदः त्रिष्टुप्॥ इमम्मंत्रमु
च्चार्य॥ षण्मुखं शिखंडकविभूषणं रक्तांबरधरम्मयूरवाहनं कुक्कुटघंटापताकाशक्त्युपेतं चतुर्भुजं
मंगारकविभूषणं रक्तांबरधरं अप्रत्यधिदेवतां स्कंदमावाहयामि॥ ततः प्रागुत्तरदले॥ ॐ भूः बुधमा
वा०॥ ॐ भुवः बुधमावा०॥ ॐ स्वः बुधमावा०॥ ॐ भूर्भुवः स्वः बुधमावा०॥ उद्बुध्यध्वं
बुधः सौम्यो बुधः त्रिष्टुप्॥ इमम्मंत्रमुच्चार्य॥ भगवन्सौम्य सौम्याङ्गो सर्वतानमयात्रिमोत्तमधटेशोश्वरकुं

राम०
२३

ऊमवर्णांगघृतेचतुर्भुजखड्गखेटगदाशार्ङ्गवरदानांकितपीतांबरमाल्यानुलेपनमरकताभरणालंकृतसर्वांगवि
बुधपतेनमस्तेसन्नद्धपीतपताकोपशोभितेनचतुःसिंहरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छविष्णुपुरुषा
भ्यासहयग्रेशानदलमध्येसुवर्णप्रतिमामुदङ्मुखींवाशाणाकारपीठेऽधितिष्ठयज्ञार्थंत्वामावाहयामि॥तत
त्तदृक्तिमायार्म्वे॥ॐ भूः बुधाधिदेवं विष्णुमावाहयामि॥ॐ भुवः बुधाधिदेवं विष्णुमावा॥ॐ स्वः बुधाधिदेवं
विष्णुमावा॥ॐ भूर्भुवःस्वः बुधाधिदेवं विष्णुमावा॥ इदं विष्णुरित्यस्य काण्वो मेधातिथिर्विष्णुर्गायत्री॥
इमं मंत्रमुच्चार्य॥ कौमोदकीयपद्मशंखचक्रोपेतचतुर्भुजं सौम्याधिदेवतां विष्णुमावा॥ॐ भूः बुधप्रत्यधि
देवं पुरुषमावाहयामि॥ॐ भुवः बुधप्रत्यधिदेवं पुरुषमावाहयामि॥ॐ स्वः बुधप्रत्यधिदेवं पुरुषमावा॥ॐ
भूर्भुवःस्वः बुधप्रत्यधिदेवं पुरुषमावा॥ सहस्रशीर्षेति नारायणः पुरुषोनुष्टुप्॥ इमं मंत्रमुच्चार्य॥ कौमोदकी
पद्मशंखचक्रोपेतचतुर्भुजं सौम्यप्रत्यधिदेवं पुरुषमावाहयामि॥ ततउत्तरदले॥ॐ भूः बृहस्पतिमावा॥ॐ

25

प्र०स्ल०
२५

भुवः बृहस्पतिमावा०॥ ॐ स्वः बृहस्पतिमावा०॥ ॐ भूर्भुवः स्वः बृहस्पतिमावा०॥ बृहस्पतेत्यस्य गृत्समद ऋषिर्बृहस्पतिस्त्रिष्टुप्॥ इमं मंत्रमुच्चार्य॥ भगवन्बृहस्पते समस्तदेवताचार्यांगिरसगोत्र सिंधुदेशेश्वर दीप्तस्तुवर्णसदृशांग प्रियामरशारण्य दीप्तचतुर्भुज दंडकमंडल्वक्षसूत्रवरदानांकित पीतांबरमाल्यानुलेपनपुष्परागभूषाभरणाभरणमणीय समस्तविद्याधिपते नमस्ते सन्नद्धपीतध्वजपताकोपशोभितेन पीताम्बरवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छेंद्रब्रह्मलभ्यो सह पयोन्तरदलमध्ये सुवर्णप्रतिमामुदङ्मुखो दीर्घचतुरस्रपीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे॥ ॐ भूः बृहस्पत्यधिदेवमिंद्रमावाहयामि॥ ॐ भुवः बृहस्पत्यधिदेवमिंद्रमावा०॥ ॐ स्वः बृहस्पत्यधिदेवमिंद्रमावा०॥ ॐ भूर्भुवः स्वः बृहस्पत्यधिदेवमिंद्रमावा०॥ इंद्रश्रेष्ठानीत्यस्य गृत्समद ऋषिः इंद्रस्त्रिष्टुप्॥ इमं मंत्रमुच्चार्य॥ चतुर्दंतगजारूढं वज्रांकुशधरं प्राचीपतिं नानाभरणाभूतं बृहस्पत्यधिदेवतामिंद्रमावाहयामि॥ वामपार्श्वे॥ ॐ भूः बृहस्पतिप्रत्यधिदेवं ब्रह्माणमा

रा०म०
२५

वा०॥ ॐ भुवः बृहस्पतिप्रत्यधिदेवं ब्रह्माणमावा०॥ ॐ स्वः बृहस्पतिप्रत्यधिदेवं ब्रह्माणमावा०॥ ॐ भूर्भुवः
स्वः बृहस्पतिप्रत्यधिदेवं ब्रह्माणमावा०॥ ब्रह्मणा ते ब्रह्मयुजेत्यस्य विश्वामित्रो ब्रह्मा त्रिष्टुप् प्रा० मे मंत्र
मुच्चार्य॥ पद्मासनस्थं जटिलं चतुर्मुखमक्षमालास्रुक्पुस्तककमंडलुधारिणं कृष्णाजिनवाससं
पार्श्वस्थितहंसं बृहस्पतिप्रत्यधिदेवतां ब्रह्माणमावा०॥ ततः पूर्वदले॥ ॐ भूः शुक्रमावाहयामि॥ ॐ भु
वः शुक्रमावा०॥ ॐ स्वः शुक्रमावा०॥ ॐ भूर्भुवः स्वः शुक्रमावा०॥ शुक्रं ते अन्यदित्यस्य भरद्वाजः शुक्रः
त्रिष्टुप् प्रा० मं मेत्र मुच्चार्य॥ भगवन्भार्गव समस्तदैत्यगुरो भार्गवगोत्र भोजकटदेशोद्भव रजतोत्पलांगकांते
चतुर्भुज दंडजटं दंड कमंडल्वक्षसूत्रवरदांकित शुक्लांबरमाल्यानुलेपनवस्त्राभरणभूषित सर्वांगसम
स्तनीतिशास्त्रनिपुण मतेनमस्तेऽस्तु शुक्लध्वजपताकोपशोभितेन शुक्लाश्वसहितेन रथेन मेरुं प्रद
क्षिणीकुर्वन्नागच्छेद्राणीभ्यां सह पश्चिमपूर्वदलमध्ये रजतप्रतिमां प्राङ्मुखीं पंचकोणपीठे स्थिति

प्र०रत्नं०
२५ रत्ना

ष्ठप्रजार्यत्वामावाहयामि॥ तद्दक्षिणपार्श्वे॥ ॐ भूः शुक्राधिदेवमिंद्राणीमावाहयामि॥ ॐ भुवः शुक्राधिदेव
मिंद्राणीमावाहयामि॥ इंद्राणीमाश्वित्यस्य हृषाकपिरिंद्राणी पंक्तिः॥ इमं मंत्रमुच्चार्य॥ संतानमंजरीवरदानध
रद्विभुजां शुक्राधिदेवतामिंद्राणीमावाहयामि॥ वामपार्श्वे॥ ॐ भूः शुक्रप्रत्यधिदेवमिंद्रमावा०॥ ॐ भूर्भुवः
शुक्रप्रत्यधिदेवमिंद्रमावा०॥ इंद्रमिद्देवतातय इत्यस्य मेधातिथिरिंद्रः प्रगाथो बृहती॥ इमं मंत्रमुच्चार्य॥ च
तुर्दंतगजारूढं वज्रांकुशधरं प्राचीपतिं नानाभरणभूषितं भार्गवप्रत्यधिदेवतामिंद्रमावा०॥ पश्चिमदले॥ ॐ भू
:शनिमावा०॥ ॐ भुवः शनिमावा०॥ स्वः शनिमावा०॥ ॐ भूर्भुवः स्वः शनिमावा०॥ शमग्निरग्निभिरित्यस्य
रिंबिठिः शनैश्चरउष्णिक्॥ इमं मंत्रमुच्चार्य॥ भगवन् शनैश्चर भास्करतनय काश्यपगोत्र सुराष्ट्रदेशोद्भ
रकज्जलनीलांगकांते चतुर्भुज चापतूणीर कृपाणाभयांकित नीलांबरमाल्यानुलेपन नीलरत्नभूषणा
लंकृत सर्वांग समस्तभुवनभीषणामर्ष०॥ ॐ स्वः शुक्राधिदेवमीद्राणीमावा०॥ ॐ भूर्भुवः स्वः शुक्राधिप्र

रत्न०
२५

मूर्त्तेन मत्तेसमवद्धनीलध्वजपताकोपशोभितेन नीलगप्रस्थवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ प्रजाय
तिय माभ्यां सहप मपश्चिमदलमध्ये कालायसप्रतिमां प्रत्यङ्मुखी चापाकारपीठेऽधितिष्ठ प्रजार्थं त्वामावा०
तद्दक्षिणपार्श्वे॥ ॐ भूः शनैश्चराधि ङ्मुखी चापाकारपीठेऽधितिष्ठ यमाभ्यां सहप मपश्चिमदलमध्ये का
लायसप्रतिमां प्रत्या देवं प्रजापतिमावा०॥ ॐ भुवः शनैश्चराधिदेवं प्रजापतिमावा०॥ ॐ स्वः शनैश्चराधि
देवं प्रजापतिमावा०॥ ॐ भूर्भुवः स्वः शनैश्चराधिदेवं प्रजापतिमावा०॥ प्रजापतेन त्वदित्यस्य हिरण्यग
र्भ प्रजापतिस्त्रिष्टुप्॥ इमं मंत्रमुच्चार्य॥ यज्ञोपवीतिनं हंसस्थमेकवक्त्रमक्षमालापुस्तककमंडलुसहि
तचतुर्भुजं शनैश्चराधिदेवतां प्रजापतिमावा०॥ वामपार्श्वे॥ ॐ भूः शनैश्चराधिदेवं यममावा०॥ ॐ भुवः
शनैश्चराधिदेवं यममावा०॥ ॐ स्वः शनैश्चराधिदेवं यममावा०॥ ॐ भूर्भुवः स्वः शनैश्चरप्रत्यधिदेवं
यममावा०॥ यमाय सोमं सुनुतेत्यस्य यमो यमोऽनुष्टुप्॥ इमं मंत्रमुच्चार्य॥ ईषत्पीनं दंडहस्तं रक्तसदृशांग्र

28

शाधरं कृष्णवर्णं महीषारूढं सर्वाभरणभूषितं शनैश्चरप्रत्यधिदेवतां यममावाहयामि॥ मत्यग्रहे दक्षिणे
लाग्रे॥ ॐ भूः राउमावाहयामि॥ ॐ भुवः राउमावा०॥ ॐ स्वः राउमावा०॥ ॐ भूर्भुवः स्वः राउमावाह
यामि॥ कयाचि॥ ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥ वामदेवो राउ गायत्री॥ इमं मंत्रमुच्चार्य॥ भगवन् राहो र
विसोममर्दन सिंहिकानंदन नैऋती नासि गोत्र बर्बरदेशोद्भव रक्तवर्ण मेघ कर्त व्याघ्रवदन चतुर्भुज खड्ग
सेव्य शूलवरदाभयोकितकृष्णांबरमाल्यानुलेपन गोमेदिकाभरणभूषित सर्वांगशोभनिधेनम
र्यकालाभ्यां सह यथास्थाने कृत्सवदलमध्ये सीसकप्रतिमा दक्षिणामुखी शूर्पाकार पीठे ऽधितिष्ठ पूजार्थं
त्वामावा०॥ तद्दक्षिणापार्श्वे॥ ॐ भूः रा काधिदेवं सर्पानावा०॥ ॐ भुवः रा काधिदेवं सर्पानावा०॥ ॐ स्वः रा
काधिदेवं सर्पानावा०॥ ॐ भूर्भुवः स्वः रा काधिदेवं सर्पानावा०॥ आयंगौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः॥ सर्पा गायत्री॥

॥ इमं मंत्रमुक्त्वा ॥ ऊर्ध्वस्त्रधरान्कुंडलिकाकारवपुष्युक्तानेकभोगान्भोगधरान्राहुप्रत्यधिदेवताः सर्पा
नावा० ॥ वामपार्श्वे ॥ ॐ भूः राहुप्रत्यु मावा० ॥ ॐ भूर्भुवः ॥ ॐ भुवः राहुप्रत्यधिदेवं सर्पमावा० ॥ ॐ
स्वः राहुप्रत्यधिदेवं स[illegible]पुष्पत्तु मावा० ॥ ॐ भूर्भुवः स्वः राहुप्रत्यधिदेवं सर्पमावा० ॥ परं म
त्यो इत्यस्य मंत्रस्य कुशिको मृत्युस्त्रिष्टुप् ॥ इमं मंत्रमुच्चार्य ॥ करालवदनं नीलांगं भीषणं पाशदंडधरं स
र्पहस्तं विकरालं राहुप्रत्यधिदेवतां कालमावाहयामि ॥ प्रत्यग्रुत्तरे दले ॥ ॐ भूः केतुमावा० ॥ ॐ भुवः
केतुमावा० ॥ ॐ स्वः केतुमावा० ॥ ॐ भूर्भुवः स्वः केतुमावा० ॥ केतुं कृण्वन्नित्यस्य मधुच्छंदाः केतुर्गा
यत्री ॥ इमं मंत्रमुच्चार्य ॥ भगवन्केतो कामरूपजैमिनिगोत्र मध्यदेशेश्वर धूम्रवर्ण ध्वजाकृते द्विभुज
गदावरहस्त[illegible] नानांकित चित्रांबरमाल्यानुलेपन वैडूर्यमयाभरणभूषित सर्वांग चित्रशक्ते नमस्ते सन्नि
धिं विचित्रध्वजपताकोपशोभितेन चित्रकपोतरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ ब्रह्मसवित्रगु

माभ्यां समूहवायव्ययदलमध्ये कांस्यप्रतिमां दक्षिणामुखीं ध्वजाकारपीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे॥ ॐ भूः केत्वधिदेवं ब्रह्माणमावा०॥ ॐ भुवः केत्वधिदेवं ब्रह्माणमावा०॥ ॐ स्वः केत्वधिदेवं ब्रह्माणमावा०॥ ॐ भूर्भुवः स्वः केत्वधिदेवं ब्रह्माणमावा०॥ ब्रह्माणमावा०॥ ब्रह्मयज्ञानमित्यस्य नकुलो ब्रह्मा त्रिष्टुप्॥ इमं मंत्रमुच्चार्य॥ पद्मासनस्थं जटिलं चतुर्मुखमकमला ...लोकं वपुस्तककमंडलुधरं रक्तहंसात्रिनंवास सपार्श्वस्थितं हंस केत्वधिदेवतां ब्रह्माणमावा०॥ वामपार्श्वे॥ ॐ भूः केतुप्रत्यधिदेवं चित्रगुप्तमावा०॥ ॐ भुवः केतुप्रत्यधिदेवं चित्रगुप्तमावा०॥ ॐ स्वः केतुप्रत्यधिदेवं चित्रगुप्तमावा०॥ ॐ भूर्भुवः स्वः केतुप्रत्यधिदेवं चित्रगुप्तमावाम०॥ चित्रमित्यस्य भरद्वाजश्चित्रगुप्तस्त्रिष्टुप्॥ इमं मंत्रमुच्चार्य॥ उदीच्यं वेषं सौम्यदर्शनं लेखनीपात्रोपेतं द्विभुजं केतुप्रत्यधिदेवतां चित्रगुप्तमावाहयामि॥ ॥ अथ कर्मसाद्गुण्यकरदेवताआवाहनं द्विभुजं केतुप्रत्यधि मुकुटं तु सपी

ठेषु कुर्यात् ॥ शनैर्वा पुमरेशे ॥ ॐ भूः विनायकमावा० ॥ ॐ भुवः विनायकमावाहयामि ॥ ॐ स्वः विना
यकमावा० ॥ ॐ भूर्भुवः स्वः विनायकमावाहयामि ॥ आतूनइंद्रत्समस्यकरावः कुसीदी विनायको गायत्री
॥ १ ॥ ममंत्रमुच्चार्य ॥ चतुर्भुजं त्रिनेत्रं नागयज्ञोपवीतिनं चंद्रधरं दंताक्षमालापरशुमोदकोपेतं चतुर्भुजं वि
नायकमावाहयामि ॥ तद्दक्षिणतः ॥ ॐ भूः दुर्गामावा० ॥ ॐ भुवः दुर्गामावा० ॥ ॐ स्वः दुर्गामावा० ॥ ॐ भूर्भु
वः स्वः दुर्गामावा० ॥ जातवेदसइत्यस्य कश्यपो दुर्गा त्रिष्टुप् ॥ १ ॥ ममंत्रमुच्चार्य ॥ शक्तिबाणशूलखड्गच
क्रचंद्रबिंबखेटकपालमुसलंकोपेतं दशभुजां गौर्गृहाहूतां दुर्गा रव्यदेवत्यासुरहारिणीं दुर्गामावाहया
मि ॥ तद्दक्षिणतः ॥ ॐ भूः क्षेत्रपालमावा० ॥ ॐ भुवः क्षेत्रपालमावा० ॥ ॐ स्वः क्षेत्रपालमावा० ॥ ॐ भूर्भु
वः स्वः क्षेत्रपालमावा० ॥ ॐ भुवः क्षेत्रपालमावा० ॥ ॐ स्वः क्षेत्रपालमावा० ॥ ॐ भूर्भुवः स्वः क्षेत्रपालमावा०
॥ क्षेत्रस्य वामदेवः क्षेत्रपतिरनुष्टुप् ॥ १ ॥ ममंत्रमुच्चार्य ॥ ध्यामवर्णं त्रैलोचनमूर्ध्वकेशं सुदंष्ट्रं भ्रकुटिकु

28

प्र०रत्नै०

२८

टिलाननं मप्रुपालं कृतांघ्रिं सर्पमेखलयायुतसर्वांगमति क्रुद्धं क्रुद्धघंटावैबद्धं गुल्फाबलंविकरोटिका
माला धारिणं भुरगकौपीनेचंद्र मौलिं दक्षिणहस्तैः शूलवेतालखड्गडुंडुभीन्दधानं वामहस्तैः कपाल
घंटा चर्म चापान्दधानं घंटाश्वोभीमं दिग्वाससमसितच्छविमूर्तिं क्षेत्रपालमावाहयामि ॥ तद्दक्षिणतः ॥ ॐ भूः
वायुमावा० ॥ ॐ भुवः वायुमावा० ॥ ॐ स्वः वायुमावा० ॥ ॐ भूर्भुवः स्वः वायुमावा० ॥ कारणाद्भिश्च इत्यस्य त्रितो
वायुऋषिः कृगाइ अंमंत्रमुक्त्वा ॥ धावद्धारणाह्वगतेध्वजवरदानधारिणां धूम्रवर्णं वायुमावाहयामि ॥ त
द्दक्षिणतः ॥ ॐ भूः आकाशमावा० ॥ ॐ भुवः आकाशमावा० ॥ ॐ स्वः आकाशमावा० ॥ ॐ भूर्भुवः स्वः
आकाशमावा० ॥ आदित्यत्नस्येत्यस्य वत्सोतरिक्षंगायत्री ॥ इमं मंत्रमुक्त्वा ॥ नीलोत्पलदलाभं नीलांब
रधारिणं चंद्राकोपेतं द्विभुजं घंटमाकाशमावा० ॥ तद्दक्षिणतः ॥ ॐ भूः अश्विनौ आवा० ॥ ॐ भुवः अ
श्विनौ आवा० ॥ ॐ स्वः अश्विनौ आवा० ॥ ॐ भूर्भुवः स्वः अश्विनौ आवा० ॥ अश्विनावर्तिरस्मदेत्यस्य

राहूगरगोशोत मोऽश्विनावुद्दिकृ ॥ इमंमंत्रमुच्चार्य ॥ प्रत्येकमोषधीपुस्तकोपेतदक्षिणवामहस्तावश्वो
न्यसंयुक्तेदेहावेकस्यदक्षिणपार्श्वेऽपरस्यवामपार्श्वेरत्नभांडकरमुक्ताधरधारिनारीयुग्मोपेतौदेवभि
षजावश्विनावावाहयामि ॥ ६ ॥ ॥ अथक्रतुसंरक्षदेवताआवाहने ॥ ॥ पूर्ववत्तंडुलपीठंकुर्यात् ॥ ॥
तत्रैवस्थं ॥ तत्रप्राग्दलाग्रे ॥ ॐ भूः इंद्रमावा० ॥ ॐ भुवः इंद्रमावा० ॥ ॐ स्वः अग्निमावा ॥ ॐ भूर्भुवः स्वः इंद्रमा
वा० ॥ इंद्रवइत्यस्यमधुछंदाइंद्रोगायत्री ॥ इममंत्रमुच्चार्य ॥ स्वर्णवर्णसहस्राक्षवज्रपाणिंशचीप्रियमि
॥ आग्नेयदलाग्रे ॥ ॐ भूः अग्निमावा० ॥ ॐ भुवः अग्निमावा० ॥ ॐ स्वः अग्निमावा० ॥ ॐ भूर्भुवः स्वः अग्नि
मावा० ॥ अग्निमीळइत्यस्यमधुछंदाअग्निर्गायत्री ॥ इमंमंत्रमुच्चार्य ॥ स्वर्णवर्णसप्तार्चिषंसप्तहस्तंशक्त्य
न्नस्रुक्स्रुवतोमरव्यजनघृतपात्राणिदधानंस्वाहाप्रियंमेषवाहनमग्निमावाहयामि ॥ याम्यदलाग्रे ॥ ॐ
भूः यममावा० ॥ ॐ भुवः यममावा० ॥ ॐ स्वः यममावा० ॥ ॐ भूर्भुवः स्वः यममावा० ॥ यमायसोममित्यस्ययमो

प्र०र०त्न० यमो नुष्टुप्॥ इमं मंत्रमुच्चार्य॥ रक्तवर्णो दंडधरः महिषवाहनामित्वा प्रियं यममावाहयामि॥ नैर्ऋत्यदलाग्रे॥ ॐ
भूः नैर्ऋतिमावा०॥ मोषुणा इत्यस्य घोरः कैरावा निर्ऋतिर्गायत्री॥ इमं मंत्रमुच्चार्य॥ नीलवर्णो खड्गचर्मधरः ऊर्ध्व
केशं नरवाहनं कालिकाप्रियं निर्ऋतिमावा०॥ पश्चिमदलाग्रे॥ ॐ भूः वरुणमावा०॥ भुवः वरुणमावा०
॥ ॐ स्वः वरुणमावा०॥ ॐ भूर्भुवः स्वः वरुणमावाहयामि॥ इदुत्तमंमुमुग्धि नइत्यस्य शुनःशेप वरुणो
गायत्री॥ इमं मंत्रमुच्चार्य॥ रक्तभ स्वर्णा नागपाशधरे मकरवाहनं पद्मिनी प्रियं वरुणमावा०॥ वायव्यदला
ग्रे॥ ॐ भूः वायुमावा०॥ ॐ भुवः वायुमावा०॥ ॐ स्वः वायुमावा०॥ ॐ भूर्भुवः स्वः वायुमावा०॥ तववायो इत्य
स्य व्यंगिरसो व्य ष्टो वा [illegible] पुर्गायत्री॥ इमं मंत्रमुच्चार्य॥ श्यामवर्णो हेमदंडधर कृष्णमृगवाहनं जग
त्प्राणरूपं मोहिनी प्रियं वायुमावायुमावा०॥ उत्तरदलाग्रे॥ ॐ भूः सोममावा०॥ ॐ भुवः॥ ॐ भूर्भुवः स्वः
सोममावा०॥ त्वंनः सोमविश्वत इत्यस्य गोतमः सोमो गायत्री॥ इमं मंत्रमुक्त्वा॥ स्वर्णवर्णो निधीश्वरं कुंत एम०

२९

तपाणिमश्ववाहनं चित्रियं कुबेरमावाहयामि॥ ऐशानदत्ताम्ये॥ ॐ भूः ईशानमावा०॥ ॐ भुवः ईशानमावा०
॥ॐ स्वः ईशानमावा०॥ कद्रुद्रायेत्यस्य कण्वो रुद्रो गायत्री॥ इमं मंत्रमुच्चार्य॥ शुद्धस्फटिकवर्णं वरदाभयशू
लांकुशत्रर्धरं वृषवाहनं गौरीप्रियमीशानमावा०॥ ॥एवमेव चत्वारिंशद्देवता आवाह्य कलशे वरुणं पूर्वोक्त
वेदृष्ट्या आवाहनमंत्रैश्चतुर्थ्यंतैः स्वस्वनामभिः क्रमेण पूर्वोक्तद्रव्यैः पुष्पसमर्पणपर्यंतां ग्रहदेवतापूजां कृत्वा
॥कर्मसाद्गुण्यदेवताः क्रतुसंरक्षकदेवता वरुणं च मत्स्ययन्त्र गंधाक्षतपुष्पैः पूजयेत्॥ ॥अथ होमः॥ ॥सचस
मिच्चर्वाज्यैः प्रतिद्रव्यं प्रतिग्रहं एकवारमभिः सहस्रपरामिता कृतिभिर्निमितं शक्त्यनुसारेण प्रधानदशांशेन
पार्श्वदेवतानां तद्धेनितरेतरेषां स्वाहांतैर्नामभिस्तत्तन्मंत्रैर्वा पाणिनैव सकृद्द्वदानेन च रुहोमः॥ तत्र आ
चार्यः प्रत्यगग्नेरासीनः प्राणानायम्य पूर्ववत्संकल्प्य अग्निमुखं वक्ष्यमाणप्रकारेण प्रागुक्तवत्करोति।
उत्संछिद्रे लेवापलेपाद्यग्निप्रतिष्ठापनांतं कृत्वा सौलागन्वारब्धः समिद्द्वयमादाय देशकालौ निर्दिश्य॥ ध

प्र०रत्न०

३०

मत्स्यमाराग्रहहोमेदेवतापरिसंख्यामादित्यमधिदेवतामग्निं प्रत्यधिदेवतां रुद्रमर्कसमिच्चर्वाज्यैर्ग्रहार्थमन्वाधाने कथितेषु॥ अस्मिन्नन्वाहिते आवितारिच हुषी आज्येनेत्येतमुक्त्वा प्रधानदेवतामादित्यमधिदेवतामग्निं प्रत्यधिदेवतां रुद्रमर्क समिच्चर्वाज्यैः॥ प्रधानदेवतां सोममधिदेवतामपः प्रत्यधिदेवतामपः प्रत्यधिदेवतां गौरीं पलाशसमिच्चर्वाज्यैः॥ प्रधानदेवतामंगारकमधिदेवतामपः प्रत्यधिदेवतां गौरीं पलाशसमिच्चर्वाज्यैः॥ प्रधानदेवं बुधमधिदेवं विष्णुं पुरुषं अपामार्गसमिच्चर्वाज्यैः॥ प्रधानदेवं बृहस्पतिमधिदेवमिंद्रं प्रत्यधिदेवं ब्रह्माणमश्वत्थसमिच्चर्वाज्यैः॥ प्रधानदेवं शुक्रमधिदेवमिंद्राणीं प्रत्यधिदेवं इंद्रमौदुंबरसमिच्चर्वाज्यैः॥ प्रधानदेवं शनिमधिदेवं प्रजापतिं प्रत्यधिदेवं यमं शमीसमिच्चर्वाज्यैः॥ प्रधानदेवं राहुमधिदेवं शनिमधिदेवं कालं दूर्वा च चर्वाज्यैः॥ प्रधानदेवं केतुमधिदेवं ब्रह्माणं प्रत्यधिदेवं ब्रह्माणं प्रत्यधिदेवं चित्रगुप्तं कुशश्च चर्वाज्यैः॥ प्रविवर्हितसंख्याकैः प्रधानदेवं केतुमधिदेवं ब्रह्माणं प्रत्यधिदेवं चित्रगुप्तं कुशश्च चर्वाज्यैः॥ विवर्हितैके रत्न०

३०

संख्याकैः पञ्च चित्रगुप्तं कृशरचर्वाज्यैः ॥ विकल्पितसंख्याकैः पार्श्वदेवताः प्रधानदशमांशेन ॥ क्रतुसाद्गुण्य
देवताः विनायकं दुर्गां क्षेत्रपालं वायुमाकाशमश्विनौ ॥ क्रतुसंरक्षदेवताः इंद्रमग्निं यमं निर्ऋतिं वरुणं वायुं
कुबेरमीशानं प्रधानविंशांशेन ॥ अग्न्यग्निर्वायुः सूर्यप्रजापती स्तिलव्रीहिभिर्विकल्पितसंख्यया ॥ सूर्यम
न्येन वपोद्दशवारं अग्निं चतुस्त्रिंशद्वारं ॥ द्वात्रिंशद्वारं रुद्रं ॥ शेषेण स्विष्टकृतमित्यादिकं कुर्यात् ॥ ततो हिमघो
यस्य इत्येतमुक्त्वा ॥ ॐ भूः भुवः स्वः स्वाहेत्यग्नावाधाय प्रजापतय इदं न ममेत्युद्देशत्यागं कुर्यात् ॥ ततो वर्हि
ः सन्नहनाद्याऽन्ये दर्भाग्रद्वयं निधायांतं कृत्वा ॥ लौकिकसिद्धान्नतिलव्रीहिभिः सहाऽऽज्यपात्रैः पर्यग्निं कृत्वाऽन्य
मुद्वास्य बर्हिषि निधाय स्रुक्स्रुवं च संमार्जनं कृत्वा ॥ तं पात्रांतरे प्रणीय कृत्वाऽन्यमुद्वास्य बर्हिषि निधाय स्रुक्स्रु
वसंमार्जनं कृत्वाऽन्यं पात्रांतरे प्रणीय कृत्वाऽग्नावधिश्रित्य स्रुवेणाभिघार्योदगुद्वास्याज्याद्दक्षिणतो
बर्हिष्यासाद्य प्रत्यभिघार्यालंकरणाद्याज्यभागांतं कृत्वा ॥ अग्नेरीशानांते भागे एकचत्वारिंशद्

प्र० रत्न०
३१

वेभ्य आवाहनोत्कैर्त्ता तन्मंत्रैः समिद्भिर्वीज्यैः प्रागुक्तसंख्याकाश्राहुतीर्जुहुयात् ॥ तत्रायंप्रकारः ॥ सैमिधं सूर्य
तो घंयुलं विहाय मध्यमानामिकांगुष्ठैर्गृहीत्वा जुहुयात् ॥ चरुं ग्रासमात्रं पाणिनैव ॥ आज्यं स्रुवेणैव तद
भावे स्रुचस्य पर्णेन वा ॥ ततो व्यस्तसमस्तव्याहृतीभिः प्रभृतिभिः व्रीहीन्याशीनाहुत्वा ॥ सूर्य याच करुद्रा
नाड्येन जुहुयान्मंत्रैः ॥ ते च मंत्राः ॥ सूर्यो न इति पंचर्चस्य सूक्तस्य सूर्यपुत्रश्चक्षुः सूर्यो गायत्री ॥ उदु त्यमि
ति मंत्रस्य कण्वः प्रस्कण्व एकः सूर्यो गायत्री ॥ नमो मित्रस्येति मंत्रस्य सूर्यपुत्रोऽभितपाः सूर्यो जगती ॥ चित्रं
देवानामिति मंत्रस्यांगिरसः कुत्सः सूर्यस्त्रिष्टुप् ॥ उदेति सुभग इति पंचर्चस्य सूर्यो गायत्री ॥ नमो मित्रस्येति मं
त्रस्य सूर्यपुत्रोऽभितपाः सूर्यो जगती ॥ चित्रं देवानामिति मंत्रस्यांगिरसः कुत्सः सूर्यस्त्रिष्टुप् ॥ उदेति सुभग
इति पंचर्चस्य मैत्रावरुणो वसिष्ठः सूर्यस्त्रिष्टुप् ॥ त्वमग्ने प्रथम इत्यष्टादशर्चस्य सूक्तस्यांगिरसो हिरण्य
स्तूपो [illegible] ग्निर्जगती ॥ अंत्याष्टमी षोडश्यस्त्रिष्टुभः ॥ त्वमग्ने द्युभिरिति षोडशर्चस्य गृत्समदोऽग्निर्जग०

३१

गती॥ कद्रुद्रायेति पंचर्चो घोरः क। रुद्रो रुद्रो गायत्री॥ तृतीया मैत्रावरुणी॥ इमा रुद्राय तवसे इत्येकादशर्चे
स्य सूक्तस्य कुत्सो रुद्रो गायत्र्यः तृतीया मैत्रावरुणी अंत्ये त्रिष्टुभौ॥ आ ते पितर्मरुतां मिति पंचदशर्चस्य
सूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप्॥ एतैरेकोनाशीति मंत्रैः प्रतिमंत्रं स्वाहांतैराज्यं हुत्वा॥ घंटादिवादित्रघो
षैर्द्यामाराधितैकच त्वादिश देवताभ्यो बलिमायच धूपदीपनैवेद्यं नाना तांबूलादीन्समर्प्य॥ प्रसीद त्वमेवं त
इति तान्संप्रार्थ्य ऋत्विग्भ्यश्च ब्रह्मरुद्रादिभ्यो विशेषेण स्विष्टकृतं हुत्वा॥ इध्मसंनहनीमग्नौ प्रास्य प्रायश्चि
त्तादि होमशेषं समाप्य यजमानान्वारब्ध आचार्यः पूर्णाहुतिं हुत्वा बलिपात्रे केवलस्य मोरणप्रकारे गाडुत्वा वि
श्वेभ्यो देवेभ्यः संस्रावं हुत्वा प्रणीतापात्रं निनयेत्॥ पश्चान्न परिस्तरणानि विसर्जनं यथा स्मृत्यन्तरं पर्युक्षणाग्न
र्चेन पात्रोत्सर्जनादि कुर्यात्॥ अथ मंडपैशान्ये पंचरंगैः स्वस्तिकं कृत्वा चतुष्पादं दीर्घं चतुरस्रं मानदण्ड
दं तत्र पीठं निधाय तत्र त्रिदिगग्रान्समूलान्कुशानास्तीर्य तत्र सामात्यं यजमानं प्राङ्मुखमुपवे

शपाचार्यैरृत्विग्भिः सह मंगलवाद्यैरभिषेककुंभोदकं पात्रांतरे आदाय प्रत्यक्स्तिष्ठन् सपलाशयोदुंबरपलाशयो
र्दुंबर्याद्वेशाखया सहिरण्यपवित्रया सकुशदूर्वापल्लवया हस्तमंतर्धायोदकप्रक्षिप्तैरब्लिंगाभिर्वारुणीभिः
पावमानीभिरन्याभिश्च शांतिपवित्रलिंगाभिर्ग्रहाभिषेकमंत्रैः सुरास्त्वामिति सूक्तेन मा आपः शिवतमा
इति तृचेन देवस्यत्वेति षड्चेन च यजुषा भूर्भुवःस्वरित्येताभिश्च व्याहृतिभिरभिषिंचेत्॥ तेच मंत्राः॥ आ
पोहिष्ठेति नवर्चस्य सूक्तस्यांबरीषः सिंधुद्वीप आपो गायत्री॥ पंचमी वर्द्धमाना सप्तमी प्रतिष्ठांत्ये द्वे अ
नुष्टुभौ॥ प्रसम्राजं इत्यष्टर्चस्य सूक्तस्य त्रिशिरा त्रिष्टुप् इत्यादि ब्रयतिर्दशर्चस्यैंद्रविस्य मधुच्छंदाः पवमा
नसोमो गायत्री॥ शंन इंद्राग्नी इति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप्॥ पवित्रं ते विततम्
इति पंचर्चस्य सूक्तस्यांगिरसः पवित्रः पवमानसोमो जगती॥ अथ ग्रहमंत्राः॥ ग्रहाणामादि
रादित्यो लोकरक्षणकारकः॥ विषमस्थानसंभूतां पीडां हरतु ते रविः १ रोहिणीशः सुधामूर्तिः सुधा राम

गात्रः सुधाशनः॥ विषस्थानसंभूतो पीडां दहतु ते विधुः॥ २॥ भूमिपुत्रो महातेजा जगतां भयकृत्सदा॥ वृष्टि
कृद्वृष्टिहर्ता च पीडां दहतु ते ऽङ्गजः ३ उत्पातरूपो जगतां चंद्रपुत्रो महाद्युतिः जगतां भयप्रदः॥ सूर्यप्रियक
रो विद्वान्पीडां दहतु ते बुधः ४ देवमंत्री विशालाक्षः सदा लोकहिते रतः॥ अनेकशिष्यसंपूर्णः पी
डां दहतु ते गुरुः ६ ॥ सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः॥ स्थूलतनुश्च मंदचारः प्रसन्नात्मा पीडां द
हतु ते शनिः॥ ७ महाशिरो महावक्त्रो दीर्घदंष्ट्रो महाबलः॥ अतनुश्चोर्ध्वकेशश्च पीडां दहतु ते
तमः॥ ८ ॥ अनेकरूपवर्णैश्च शतशोथ सहस्रशः॥ उत्पातरूपो जगतः पीडां दहतु ते शिखी॥ ९ ॥ ॥
अथ देवमंत्राः॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलोग्निर्भगवान्यमो वै निरृतिस्तथा॥ वरुणः पवनश्चैव
धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्र

ग्र०ले०
३३

द्धा क्रियामतिः॥ बुद्धिर्लज्जावपुःशांतिः कांतिस्तुष्टिश्च मातरः॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥
आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः॥ ग्रहास्त्वामभिषिंचंतु राहुकेतुश्च तर्पिताः॥ देवदानवगंधर्वा
यक्षराक्षसपंनगाः॥ ऋषयो गावो देवमातर एव च॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ अस्त्राणि
सर्वशस्त्राणि राजानो वाहनानि च॥ औषधानि च रत्नानि कालस्यावयवाश्च ये॥ सरितः सागराः शैलास्तीर्थानि
च॥ औषधानि च रत्नानि कालस्यावयवाश्च ये॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥ एते त्वामभिषिंच
तु सर्वकामार्थसिद्धये॥ ॥ एतैर्मंत्रैः प्रतिमंत्रमभिषिच्य॥ श्रीसूक्तेन हिरण्यवर्णामित्यादिना इमा आपः शिवत
मा इत्येतेन तच्चेन देवस्य त्वेति च यजुषा भूर्भुवः स्वरित्योंकारेण ताभिर्व्याहृतिभिश्चाभिषिंचेत्॥ एवमभिषि
क्तो यजमानः श्वेताहतवस्त्रयुग्गंधमाल्याभरणैश्च विभूयात्॥ ततश्चाचार्यादिऋत्विग्भ्यश्च बलिमुत्सृज्य
सुवासिनीभिर्नीराजनं कारयेत्॥ अथ यजमानो ग्रहदेवताभ्यः चतुर्थ्यंतदेवतानामभिः पुष्पाणि समर्प्य चाये

राम०
३३

णाद्याहुत्युच्चारणपूर्वकं ग्रहोद्वासनं कारयित्वा ॥ आचार्यप्रभृतिभ्यः जपहोमफलं गृहीत्वा तेभ्यो दक्षिणां दद्या-
त् ॥ गौः शंखो रक्तोनड्वान् हिरण्यं पीतं वासः श्वेताश्वः कृष्णा गौः कालायसं हस्ती छागो वेति ग्रहक्रमेण ॥ अ-
न्यत्र दक्षिणाया हिरण्येन समा कार्या ॥ आपद्गवाद्यभावे सर्वेभ्यो यथाशक्ति हिरण्यं वा दद्यात् ॥ आ-
चार्याय द्विगुणं ॥ अन्येभ्यस्तु यथाशक्ति भूयसीं ॥ ततः कांस्यपात्रगताज्ये ॥ रूपं रूपो वभूवेति मंत्रेण सकुटुंबं स्व-
मुखरूपं प्रेक्ष्य ॥ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं ॥ आज्यं सुराणामाहारमाज्ये देवाः प्रति रूपं प्रेक्ष्य पः
[illegible] प्रतिष्ठिता इति मंत्रं पठित्वा तदाज्यं सदक्षिणं ब्राह्मणाय दद्यात् ॥ ततोऽपि दक्षिणां दत्वा संकल्प्य वा ॥ एक-
स्मा आकृतेरेकशतस्यैकं सहस्रस्य वा यथाशक्ति ब्राह्मणान्भोजयित्वा तेभ्यः शांतिः पुष्टिश्चास्त्विति आशिषो गृ-
हीत्वा तान्संप्रार्थ्य प्रतिपत्त्या ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युत-
मिति पठित्वा ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति

३४

प्र०र०ला

३४

त्कान्स्नातिभिः क्वचिद्दत्वार्घ्यं यथाशक्ति ॥ अच्युतानंतगोविंदेति नामत्रयजपं कृत्वा ग्रहयज्ञफलं श्रीविष्णवे
समर्प्य ॥ स्वयं हृष्टमना बंधुभिः सह भुंजीत ॥ ॥ अयं यज्ञकर्मप्रचारः आश्वलायनगृह्यपरिशिष्टोक्तो ग्रहमख
स्वयं हृष्टमना बंधुभिः सह भुंजीत ॥ ॥ ७ ब ॥ आश्वलायनानामेव ॥ बह्वृचानां वा स्वगृह्योक्तस्य सकर्मप्रचो
दितं ॥ तस्य तावति शाखेयैः कृते सर्वं कृतो भवेदिति वचनात् ॥ एवमन्येषामपि यदि स्वगृह्ये ग्रहमखोक्तस्तदा
स एव ॥ येषां तु गृह्यादौ नोक्तस्तैर्यात वल्क्यादि स्मृत्युक्तः ॥ मत्स्यपुराणाद्युक्तो वानुष्ठेयः स्मृत्यादेः सा
धारणादिति दिक् ॥ ॥ इति नारायणभट्टकृते प्रयोगरत्ने नवग्रहमखप्रयोगः ॥ ॥ अथ विवाहोत्तरकर्तव्य
व्योपिस्थालीपाकः प्रथममुच्यते ॥ तत्रांभोगानामुक्तानामन्यतमस्य षष्ठिदेशेन प्राप्ते ॥ स च विवाहानंतरं कर्तव्य
गृहप्रवेशनीयहोमोत्तरभाविन्यां पौर्णमास्यामारंभणीयः ॥ नत्वमावास्यायां ॥ चतुर्थीहोमात्प्रागपि पौर्णी
मासी चेत्तदारंभः ॥ यदि चारंभकाले मलमासगुरुशुक्रास्तबाल्यवार्धक्यहानापौष्यमासादि भवति तदा ॥म०

३४

पि प्रारंभः कार्यः ॥ यानि तु तत्रारंभनिषेधकानि ॥ उपरागोधिमासश्चापि प्रथमपर्वाणि ॥ तथा मलिम्लुचे पौ
षे नान्वारंभणीमिष्यंते । गुरुभार्गवयोर्मौढ्ये चंद्रस्सूर्यग्रहे तथेत्यादीनि संग्रहकारादिवचनानि तानि त्वा
रम्भादिनात्वकालानुपक्रांतस्थालीपाकादिप्रारंभविषयाणीति प्रयोगपारिजातकारः ॥ तथा चापरा
र्केत्वं गार्ग्यवचनं उदाहृतं ॥ नामकर्म च दर्शेष्टिं यथाकालं समाचरेत् ॥ अतिपाते सति तयोः प्रशस्तमा
सि तु लग्नभेषजे इति ॥ ॥ इति स्थालीपाकारंभकालः ॥ ॥ अथ पर्वनिर्णयः ॥ ॥ पूर्णिमादर्शाख्यपर्वतत्रान्वाधा
नं प्रतिपदि इष्टिरित्युत्सर्गः ॥ तत्र पर्वचतुर्थांशः प्रतिपदस्त्वाद्यास्त्रयोंशाः सूर्योदयात्तु र मुहूर्तत्रये विद्यमाना
यागकालः ॥ सूर्योदये पर्वयोगत्समानपर्यंतं यत्र पर्वार्धं उतत्र न संदेहः ॥ यदि तु खंडं पर्व तत्र निर्णयः ॥ अप्रो
मे ध्येत तः पूर्वं वा पर्व प्रतिपदोः संधौ तदिष्ट्या गः पूर्वे घारन्वाधाने ॥ मध्याह्नात्परे संधौ तदहरन्वाधानं परेद्यु
र्याग इति ॥ संधिश्च प्रतिपदो द्वाष्टधोर्द्धं पर्वणि प्रक्षिप्यते यः ॥ दृष्टः पर्वणि समाप्तौ तु नेष्टिः कर्त्तव्या

म॰ रत्न॰

३५

पत्नेः॥ सा प्रतिपद्येव समयनीया न पर्वमध्ये॥ अपराह्ण संधौ परेद्युः प्रतिपच्चतुर्थांशेपि यावत् पौर्णमासीन दोष
॥ चंद्रदर्शनदिने इष्टिनिषेधवचनानि निर्णयकानि संभवयोग्यानि॥ यात्तु पौर्णमासी संगवादूर्ध्वं मा
वर्तनात् पूर्वं संधिमती सा सप्तरुका चेत्तिस्यामेवान्वाधानयागश्च॥ अथ विकृतौ निर्णयः॥ आवर्त्तने
ततः पूर्वं वा पर्वसंधौ तदहरादौ प्रकृतियागं कृत्वा पश्चादयनयणादि विकृतिः कार्या॥ परसंधौ तु विकृतियाग
एव संधिदिने प्रकृतिस्तु तदुत्तरदिने इति॥ ॥अथ स्थंडिलकरणादिनिर्णयः॥ तत्र चौलादिहोमा स्थं
डिलौकिके ऽग्नौ॥ पार्वणस्थालीपाकस्रवणाकर्मादि होमो गृह्याग्नि होमेपि गृहप्रवेशवास्तुहोम
श्रूलगवान्वष्टक्यादिषु नियतः॥ मथार्योयतनेतदसंभवात्॥ यादिस्मिदादव ग्निसमारोपस्तदा गृह्या
ग्निकर्तव्येपि स्थालीपाकादौ नियतः॥ एतत्सर्वमभिप्रेत्य यत्र क्वच होष्यन्स्यादिति गृह्योक्ताग्निप्रति
ष्ठापनविधेर्विषयं प्रदर्शयितुमाह कारिकाकारः॥ प्रातेछाय्याथ लेखा स्तु होमायोल्लह विभुंजां॥

रम॰

३५

एतद्देत्तप्रकुर्वीत होमस्यसंस्थापितेनलइति॥ अन्यथासंस्थापितेनलेहोमस्यान्निति व्यर्थंस्यात्॥ एवंस्थं
डिलकरणादिविषयं निर्णयः स्थंडिलादिकुर्वीत॥ तत्र यजमानः कृतनित्यक्रियः शुचिः परिहितधौत
वासाः दर्भपाणिः पीठोपविष्टः प्राङ्मुखो वाग्यतो वा स्वप्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्री
त्यर्थं अमुककर्मांगं करिष्ये तदंगहोमं कर्तुं स्थंडिलादिकं करिष्ये इति संकल्प्य गोमयादिलिप्ते भूप्रदेशे मृदु
देशे शुद्धमृदा ईशान्यारंभमध्यदक्षसंस्थं चतुरंगुलोन्नतमंगुलोन्नतं वा चतुर्दिक्षु मितिं लक्ष्याद्वि सप्तसंगु
लपरिधिकं पालितम् ष्टादशांगुलविस्तृतं होमानुसारेण ततद्धिकं वा न तु ततो न्यूनं मध्योन्नतं स्थंडिलं कु
र्वीत॥ शेषस्यैव मध्ये दर्भेणानुपलिप्य दक्षिणोपक्रमोदीच्यां देश प्राच्यां मध्ये प्रादेशमितं गुल्मानित्य स्कादक्षिणोपक्रमा
मरवेन स्थंडिलप्राग्दशामाग्रामेकां लेखां तस्या दक्षिणोत्तरयोः प्रागायते एवं रेखा प्राग्संमिते तदर्ध्वे लेखे लिखिते रेखे लि
खित्वा तयोर्मध्ये परस्परमसंस्पृष्टा उदक्संस्थाः प्रागायताः प्रादेशसंमितास्तिस्रः इति पट्टे लेखा याति य

प्र० रत्न

३६

शकलमूलेनर्हेत्रिशाहस्तेनोल्लिख्यलेखोस्तुतच्छकलमुत्तरग्रंथिगायस्त्युंडि समाहृत्यमुत्स्यशकलमा
ग्नेयोंनिरस्यपाणिप्रक्षाल्यवाग्यतोभवेत्॥ ततस्तेनसेनासंभवेमन्मयेनवापात्रपुरोमनसंपरीकात्मसु
वाभिन्याश्रोत्रियागारात्स्वगृहाद्वासंभवाद्वानिर्धूममग्निमाहृत्यस्थंडिलादाग्नेयांनिधायानुष्ठोदमूना
आत्रेयोवसुश्रुतोग्निस्त्रिष्टुप्॥ एषवेनेन्द्रगणोगोतमोग्निस्त्रिष्टुप्॥ अग्न्यावाहनेविनियोगः॥ ॐ नु
षेदमूना अतिथिर्दुरोणे॰ ऋ॰ क॰ १ ॐ एषयग्नेर इहहोतानिषीद॰ ऋ॰ क॰ १ इत्य कृतेरावाह्याच्छादनं दृशी कृत्म
ममुस्तेप्याहृतीनांपरमेष्ठीप्रजापतिःप्रजापतिर्बृहती॥ अग्निप्रतिष्ठापनेवि०॥ ॐ भर्भुवःस्वरित्यात्माभिमु
मुखंपाणिभ्यांषट्स्तुलेखोस्तुतन्नक्षामसुविहितनामकंनाम कममुकनामकमग्निंप्रतिष्ठापयामी
तिअग्निंप्रतिष्ठाप्य॥ प्रोक्षितैधनानि निहित्यवेराधमन्याप्रबोध्यप्यायदेवं॥ चत्वारिशृंगागोतमो
वामदेवोग्निस्त्रिष्टुप्॥ अग्निमूर्तिध्यानेवि०॥ ॐ चत्वारिशृंगात्रयोअस्य॰ ऋ॰ क॰ १ इति मंत्रांश्च॥ म

एम०

३६

सहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः॥ त्रिपात्प्रसन्नवदनः शुचिस्मितः॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वा
मे स्वधां तथा॥ बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवं॥ तोमरं व्यजनं वामे घृतपात्रं च धारयन्॥ आ
त्माभिमुखमासीन एवंरूपो हुताशन इति॥ ततो यदि समिदादौ समारोपितोग्निस्तर्हि प्रत्यवरोहणाकार्यं
॥ प्रत्यवरोहेत्यस्य मंत्रस्य हिरण्यगर्भोग्निस्त्रिष्टुप् अग्निप्रत्यवरोहणे वि॥ ॐ प्रत्यवरोह जातवेदः पुनस्त्वं
देवेभ्यो हव्यं वह नः प्रजानन्॥ प्रजां पुष्टिं रयिमस्मासु धेह्यथा भव यजमानाय शंयोरिति मंत्रेण समारोपिता
ग्निं समिधौ स्थापितेग्नौ प्रक्षिपेदिति॥ एतदंतं संस्थापितेग्नौ होमे कार्यं॥ नित्यधारितहोमे तु नैतावत्॥ तु
तः पार्वणस्थालीपाके प्रधानदिनात्पूर्वदिने सद्यस्कालायां पौर्णमास्यामशक्तौ वा प्रधानदिने एव प्रातरौ
पासनं कृत्वा ऽन्वाधानं कुर्यात्॥ तत्रेत्थं॥ आचम्य प्राणानायम्य समिद्द्वयं त्रयं वादाय देशकालौ स्मृत्वा ममो
पात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां स्थालीपाकाभ्यां यक्ष्ये॥ तत्रेदानीं पौर्णमासे

37

प्र०स्त०
३७

नयक्ष्ये॥ दर्शे तु पूर्वं संकल्पितेन दर्शेष्ट्या स्थालीपाकेन यक्ष्ये इति विशेषः तत्र देवतापरिग्रहार्थमन्वाधानं क-
रिष्य इति संकल्प्य॥ समिन्धनान्ताहितेऽग्नौ जातवेदसमग्निमिध्मेन प्रधानदेवं प्रजापतिं प्रजापतिं चाघारदे-
वते आज्येनाग्नीषोमौ च चक्षुषी आज्येन॥ अग्निमग्नीषोमौ च प्रधानदेवतेत्वेन रुद्रं यक्ष्ये॥ दर्शे तु अग्नि-
मिन्द्राग्नी च प्रधानदेवते च रुद्रं यक्ष्ये इति विशेषः॥ शेषेण स्विष्टकृतमिध्मसंनहनेन रुद्रं यथास्थानं देवा-
न्विहतु मग्निं वायुं सूर्यं प्रजापतिं प्रायश्चित्तदेवता आज्येन त्वातां जातवेदो षानिबर्हि सामर्थ्ये त्रिवार माग्निं मरुतश्च
न्येनाव स्वाग्ने वाम्भं त्रावेणायक्ष्ये॥ अंगदेवताः प्रधानदेवताः सर्वाः सन्निहिताः संतु सांगेन कर्मणा यक्ष्ये॥
स यक्ष्या तेन सपोपक्ष्ये इति संकल्प्य इदं सममक्त्वा इति भिर्वासमिद्धोमं कुर्यात्॥ व्याहृति पक्षे व्या-
हृति नामित्यादि प्रवर्तेत॥ अन्वाधानसमिद्धोमे विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहेति प्रजापतये इदं न म-
मेति त्यागः॥ तं चाग्निं धारयेत् मे कटे तु॥ तुभ्यं ता इत्यस्य चाऽज्यं उखेवा समारोपयेत्॥ तद्यथा॥ तुभ्यं ता विरूपा

राम०
३७

ग्निर्गायत्री॥ कृतान्वाधानोग्नेः समारोपाधेकाशर्थं प्रायश्चित्तेनाज्यहोमेकि॥ अं तनुमुम्यंता अग्निरस्तमृ० येमिरे
त्वाहा अग्नयपरदंनमेति॥ ततस्त्रिभिस्त्रिभिः कुशस्तैः सव्यं पाणिमधोदक्षिणं चोपरि कुर्वन्नेव वेदस्यैर्
त्तरदलमूलेस्त्रत्रिसंधिं दक्षिणावर्तं कृत्वा पुनर्दक्षिणमधः सव्यं चोपरि कुर्वन्नेव त्रिगुणयेत॥ अ
ते प्रदक्षिणं ग्रंथिं दद्यात्॥ एवं षट्त्रिंशद्दर्भदलैः कार्यो रज्जुर्भवति॥ ततस्तस्या मूर्द्धगग्रायां प्रादेशमात्रा
न्मुष्टिपरिमितान्दर्भान्निधाय तया बर्हिर्द्राववेष्टयरज्जुग्रवरारज्जुमूलेसकृदावेष्टयतरसमश्रेषं पूर्ववेष्टि
तरज्वा अग्रंधत्ता॥ द्वितीय॥ पवित्रस्तरणार्थं दर्भैः सहृन्मायतेनात्मस्त्रोक्षा गोपतिनिदध्यात्॥ ततोन्ये या
तो यावा दृष्येव कृतयारज्वोपाउरग प्रयाया लाशेखोद्दरं मसंभवेशमीवदार्दिष्व स्त्रियहक्रमयमरत्निमा
त्रं वितस्तिमात्रं वा पंचदशदारुकमिध्मं प्रागग्रं सकृदावेष्टय पूर्ववत्त्रिरध्येत॥ अत्रैवमावर्हिषोर्बधने केचिन्न
त्राविदधति॥ तत्र बर्हिषि॥ रंद्राणीमस्त्रं नह्नेत्यपाते ग्रंथिं बध्नातु॥ सतेमास्थादिति॥ इध्मे॥ मतकृष्णोरूपं क

38

त्वा प्रा विशत्त्वं वनस्पतीन्॥ ततस्त्वां पंचदशधा संभरामि सुसंस्कृता इति॥ एकविंशति घेत्पत्रं पंचदशधेत्यूहेन॥
अस्मै त्वं न्यूह माऽऽ॥ अपरे तु मंत्रौ नेच्छंति॥ ततः पत्नी अग्न्यायतनो लंकरणं कुर्यात्॥ ततो दंपती गंधादिभिः
स्वशरीरे अलंकृत्य॥ ततो दिने कल्ह हकिय किक्रिय॥ प्रहासान्न्तव ऊभावणा॥ चौर्यादि [illegible] स्वशरी [illegible] व्यसनप
र्यंकशयन॥ दंतधावनकर्म कुलिस्य॥ कोद्रव चणक मसूरा॥ वृंताक कूर लवणा॥ कोरदूषक॥ मधुमा
षमांस॥ मद्यपरान्नोपवासा॥ तैलमैथुनानि वर्जयेत्॥ दधि घृत पयो मिश्रं हविष्यान्नं रिवैच सह कदूजीयात्॥
॥ श्राद्धकर्त्तुः श्राद्धशेषं माषापन्नं भुंजीत॥ व्रतलोमेत्रास्यैः सह संवेशने वोप्य त्वमग्ने व्रतपा इत्यृचा ऽन्या
हुतिं जुहुयात्॥ त्वमग्ने इत्यस्य च सोमोग्निर्गायत्री॥ व्रतलोपजनितदोषपरिहारार्थं माज्यहोमे वि०॥ ॐ त्व
मग्ने व्रतपा असि० रू क१ व्रतपायाग्नय इदं०॥ यद्वानिर्वापादि पूर्वकं व्रतपायाग्नये पावेन स्थालीपाक
पाकेन यमानेतं चेच रुं प्रधानात् पूर्वं जुहुयात्॥ ततः प्रतिपदि प्रातः होपासनं कृत्वोऽग्निं परिसमुह्य परिस्तरणी

यात्॥ तत्रैवैत्यां॥ अग्न्यायतनाद् षडंगुलिपरिमिते देशे प्राच्यादिषु परिस्तरणीयात्॥ तत्र प्राच्यां प्रतीच्यां चोदगग्रा
दर्भाः॥ आवाच्यामुदीच्यां च प्रागग्राः॥ पूर्वपश्चात्परिस्तरणमूलयो रूपरि दक्षिणपरिस्तरणस्योत्तराग्राणां॥ उत्तर
परिस्तरणं तु तदग्रयोरधस्तात्॥ ते च दर्भा अनियतसंख्याः एकैकस्यां दिशि चत्वारस्त्वा रस्त्वा रर्हःस्येवं षोडश वा॥ गत
तायेदक्षिणतो ब्रह्मासनं यजमानं तत्रोत्तरतश्च पात्रासादनार्थं कांश्चित्प्रागग्रान्दर्भान्स्तृणीयात्॥ अग्नेरीशान्यां दि
रं भस्मापरिषिंच्योत्तरास्तीर्णेषु दर्भेषु दक्षिणसव्यपाणिभ्यां क्रमेण चरुस्थाली प्रोक्षणी दर्वी प्रणीता
ता आज्यपात्रेध्मा बर्हिः सिमत्सुक्स्रुवौ दिनमुसलं खलं मुसलं चेति द्वंद्वं उदगपवर्गं प्राक्संस्थं च न्युब्जान्या
सादयेत्॥ आज्यमात्रे होमे तु प्रोक्षणीकैवं प्रणीता आज्यपात्रेध्माबर्हिषी चैते तावतामेवासादनं॥ ततः प्रो
क्षणीपात्रमुत्तानं कृत्वा तत्रानंतर्गर्भितं साग्रसमच्छिन्नप्रादेशमात्रकुशद्वयनिर्मिताभ्यामुदगग्रे पव
कृपवित्रे धृत्वा॥ अप आसिच्य तत्पात्राण्युत्तानानि कृत्वा इध्मं च विस्रस्य सर्वाणि पात्राणि त्रिः प्रोक्षेत्॥ उत्ता

37

नेन तु हस्तेन कर्त्तव्यं प्रोक्षणं भवेत् ॥ अवाचीनेन हस्तेन कर्त्तव्यं स्यादवोक्षणं ॥ अभ्युक्षी करोतीति प्रणीय सकृत्कुंभे
मभ्युक्षणमिति स्मृतेः ॥ ता आपः किंचिद्दौ कृपृथिव्ये केशतृणाद्यपोह्य ततो यष्टा कमलकुसुममीशानदिग्भवं ब्रह्माणम
स्मिन्कर्मणि ब्रह्माणं त्वां वृणे इति तत्पाणिं पाणिना गृहीत्वा वृणुयात् ॥ ततो ब्रह्मा वृतोस्मीत्युक्त्वा प्राङ्मुखो
यज्ञोपवीत्याचम्य समस्तपाणिपंगुष्ठो भूत्वा ऽग्रेणाग्निं परीत्य दक्षिणतस्तदङ्मुखः स्थित्वा आसनार्थं दर्भं पुंक्ष्णि
णा भागस्थमेकं दर्भमंगुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा निरस्तः परावसुरिति नैर्ऋत्यां नि
रस्याऽपः स्पृष्ट्वेदमहमर्वावसोः सदने सीदामीत्युक्त्वोदङ्मुख उपविश्य ॥ ततो वागुपविष्टो वसे(?) दक्षिणायोरंसं त्यक्त्वा व्यापविश्य
गंधाक्षतादिभिरर्चितः सन् ॥ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपाय स यज्ञं पाहि स यज्ञ
पतिं पाहि स मां पाहीति जपित्वा स यज्ञमनाः एव वर्त्तेत ॥ ततो यजमानः प्रणीतापात्रमग्नेः पश्चाद्भूमौ धारयित्वा
पवित्रे निधायोत्सृताभिरद्भिः पूरयित्वा गंधपुष्पाक्षतान्निक्षिप्य ब्रह्मन्नपः प्रणेष्यामि ॥ ब्रह्मा भूर्भुवः स्वर्बृहस्प

तिप्रसूत इति जपित्वा॥ ॐ प्रणवेस्वच्चैर्वदेत॥ यजमानः॥ गतस्पात्रमुखसममुद्धृत्याग्रेहत्तरतो दर्भेषु निधाय प

वित्रेण गृहीत्वाऽन्यैर्दर्भैराच्छाद्येत॥ ततः प्रत्यगग्रेः कुशेषु शूर्पं निधाय तत्र प्रागग्रे पवित्रे निधायाऽग्नये त्वा

जुष्टं निर्वपामीति मंत्रावृत्त्या ग्रहीणाय वानो वानं वा चतुरो मुष्टीन् त्रिरूष्णीं अग्नीषोमाभ्यां त्वा जुष्टं निर्वपामीति त

थैव निरूप्य तेप वित्रे गृहीत्वा तामुपरि निधायाऽस्तामिरद्भिरग्नये त्वा जुष्टं प्रोक्षामीति निर्वाप संख्यया प्रो

क्षेत॥ एवमग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामीति तथैव प्रोक्षेत॥ दर्शे तु अग्नीषोमस्थाने इंद्राग्निभ्यां त्वेत्या

दि निर्वापे प्रोक्षणे च विशेषः॥ एवं नाममंत्रक होमे निर्वाप प्रोक्षणं च यथा प्रधान देवतं देवता नामग्रहणे

न कार्य॥ समंत्रक होमे पत्नी तु अवघातं कर्मादौ तत्रूली चतुरः सुतुरो मुष्टीन् निर्वपेत् प्रोक्षेच्च॥ ततः पात्राणा

मुत्तरतः प्राग्ग्रीवमास्तीर्णे ऊर्ध्वलोम्नि कृष्णाजिने निहिते उलूखले मुसलेन पत्न्यवहत्य त्रिः फलीकु

र्यात्॥ तांस्त्रिः प्रक्षालितान्यथ एकपात्रेण कपात्रे वा स्त्रावेदग्धमनवस्त्रावितमंतरूष्मपक्वं सुशृतं चरुं पचेत्॥

ततः पवित्रे आज्यपात्रे निधाय तत्पात्रं पुरतः संस्थाप्य तस्मिन्नाज्यमासिच्याऽग्नेरुत्तरतः स्थितांगारानंभस्मना
सहाग्नेरुदक् परिस्तरणाद्बहिर्निरूह्य तेष्वाज्यपात्रमधिश्रित्य ज्वलता दर्भोल्मुकेनावज्वल्यांगुष्ठपर्वमात्रं
प्रक्षालितं दर्भाग्रद्वयमाज्ये प्रक्षिप्य पुनर्ज्वलता तेनैव दर्भोल्मुकेन च रूपगणासहाज्यं त्रिः पर्यग्निकृत्वा तदु
ल्मुकमपास्यापस्पृश्याऽऽज्यपात्रमुद्विकर्षन्निर्बोदगुद्वास्योऽङ्गारानग्नौ प्रक्षिप्यापः स्पृष्ट्वा तत्रस्थमेवा
ज्यं॥ सवितुष्ट्वा हिरण्यस्तूपः सविता पुरउष्णिक्॥ आज्यस्योत्पवने विनि०॥ ॐ सवितुष्ट्वा०त्रस्थमेवाज्यं
प्रसवउत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति मंत्रेणोत्कृष्टत्वोत्तानाभ्यां तेनैकवारं द्विस्तूष्णीमुत्ता
नपाणिद्वयांगुष्ठोपकनिष्ठिकाभ्यां तयोरसंस्पृष्टगृहीताभ्यां मुदगग्राभ्यां पवित्राभ्यामाग्नुत्पूयते पवित्रे अ
ग्नौ प्रोक्ष्याऽऽग्नौ प्रहरेत्। ततस्तूष्णीं स्रुक्स्रुव[illegible] स्फ्यादायमस्त्वाहेतिवा मंत्रेणेति केचित्॥ अथाग्नेः पश्चात्परिस्तरणाद्बहि
रत्निमात्रे मुत्तो भुवं प्रोक्ष्य तत्र बर्हिः सन्नह्य नोरज्जुमुदगग्रां प्रसार्य तस्यां बर्हिः प्रागग्रमुदगपवर्गमविरलमास्तीर्य

पेतस्मिन्नाज्यपात्रे निधाय स्रुवाग्रं संमार्जयेत् ॥ तद्यथा ॥ दक्षिणहस्तेन स्रुवमुत्तुवौ गृहीत्वा सव्येन कांश्चिद्दर्भा
नादाय समे वाग्नौ प्रताप्य स्रुवं निधाय दक्षिणहस्तेन स्रुवस्य बिलं दर्भाग्रैः प्रागादि प्रागपवर्गं त्रिः संमृज्याध
स्ताद्दर्भाग्रैश्चाभ्यात्मं बिलपृष्ठं त्रिः संमृज्य ततो दर्भाणां मूलैर्दंडस्याधस्तात् स्रुवं बिलपृष्ठादारभ्य यावदु
परिष्ठाद्बिलं तावत्त्रिः संमृज्याद्भिः प्रोक्ष्य स्रुवं निष्टप्याज्यस्थाल्या उत्तरतः स्रुवपृष्ठं निधायोदकं स्पृष्ट्वा ते
वैव दर्भैर्जुहूं चैवमेव संमृज्य स्रुवादुत्तरतो निधाय दर्भानद्भिः क्षालयित्वाग्नावनुप्रहरेत् ॥ ततः स्रुतमवं स्रु
वं गृहीत्वा तेनाज्येनाज्यमभिघार्योदगुद्वास्याग्न्याज्ययोर्मध्येन नीत्वाज्याद्दक्षिणतो बर्हिषि सांतरमासाद्य पु
पुनरप्यभिघार्य न वाभिघार्येह हविः पृथक् करणाय पात्रांतरं च वोऽप्ययोर्मध्ये निधायैकादशांगुलिमिते देशे गं
धाक्षतपुष्पैरग्निं समंत्रकमभ्यर्चयेत् ॥ तत्र मंत्रौ ॥ विश्वानि न इति त्वं च स्यात्रेयो वसुस्कृतोऽग्ने ह्विषु ॥ वामभ्य
मर्चने तयोर्यद्रष्टाने वि ॥ ॐ विश्वानि नो दुर्गहा जातवेदः क क २ ततश्चात्मानं चालंकृत्य हस्तं प्रक्षाल्य धनं

धनरज्जुमिध्मसंछन्नेनेनि धायपाणिना इध्ममादाय पमूलमध्योग्रेषु हुवेणा त्रिरभिघार्य मूलमध्ययोर्मध्यभागेग
हीत्वा ॥ अयंतेवामदेवो जातवेदा अग्निस्त्रिष्टुप् ॥ इध्महवने वि० ॥ ॐ अयंत इध्म आत्मा जातवेदस्तेनेध्यस्व व
र्द्धस्व चेध्द वर्द्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेति इध्ममग्नावाधाय जातवेदसेऽग्नय
इदं न ममेति त्यजेत् ॥ ततः स्रुवेणाज्यमादायाग्नेरायतने स्वावायव्यकोणमारभ्याग्नेयकोणपर्यन्तं प्रजापतय
इति मनसा स्मरन् स्वाहेत्युद्धार्य नैरृतपर्येणाज्यधारामग्नाविध्मदारूपरि हुत्वा ॥ पुनराज्यमादाय नैरृत्यको
णात् ईशानीपर्यन्तं तथैव हुत्वास्य त्यागं च ॥ स्रुवेणाज्यमादाय अग्नये स्वाहेत्यग्नेरुत्तरपार्श्वे पूर्वभागे हुत्वा
पुनराज्यमादाय सोमाय स्वाहेत्यग्नेर्दक्षिणपार्श्वे तत्सम प्रदेशे हुत्वा पश्चान्निहितपात्रे चरुमुद्धृत्य पश्यकृत्य ॥ इद
मग्नये इदमग्नीषोमाभ्यामिति च रुभागद्वयमुत्तरसंलग्नमभिमृश्यावदानधर्मेणानुजुयात् ॥ एवं नाममंत्रके
होमे यथादेवतं विभक्तस्य चरोरभिमर्शः ॥ समंत्रक होमे तु न विभागो नाभिमर्शश्च ॥ ॥ अथावदानधर्मः

॥ ॥ स्रुचैवेदमभिमर्शनम्॥ स्रुच्याज्यमुपस्तीर्य मध्यान्देवताचरुभागमध्यादंगुष्ठपर्वमात्रं तिरश्चीनाभिरंगुष्ठमम

ध्यमानामिकाभिरुद्गग्र्याभिर्नखैरस्पर्शमकुर्वन्नवदायपूर्व्यामोप्य॥ ततस्तस्य पूर्वभागं प्रागग्राभिस्ताभिस्त

थैवावदायपूर्व्यामोप्याज्यपात्रस्थं हविरभिघार्य स्रुवस्थमवत्तं चाभिघार्य विधूमास्प्रज्वालाग्नौ॥ ॐ अग्नये स्वा

हेत्याज्यभागयोर्मध्यदेशे तत्सगृहे शेवास्त्रा छादयन्न विवर्द्ध्यापार्श्वेन जुहुत्वा॥ अग्नय इदं न ममेति त्यक्त्वा॥

पुनः पूर्ववदुत्तरहविर्भागादवदाय॥ ॐ अग्नीषोमाभ्यां स्वाहेति पूर्वाहुतेः प्राग्भागे हुत्वाऽग्नीषोमाभ्यामिदं न

ममेति त्यजेत्॥ पंचावत्ती तु द्व्याज्यमुपस्तीर्य मध्यात्पूर्वार्द्धात्पश्चार्द्धाच्च त्रिर्हविषोवदायाभिघार्य जुहुयात्॥ पंचा

वत्तिनस्तु॥ जामदग्न्या वत्सा विदा वार्ष्टिषेणास्तथैव च॥ भार्गव च्यावनात्रैर्वाः पंचावत्तिन ईरिताः॥ दर्शे तु अ

ग्नीषोमस्थाने॥ ॐ इंद्राग्निभ्यां स्वाहा॥ इंद्राग्निभ्यामिदं न ममेति विशेषः॥ पुनर्द्व्याज्यमुपस्तीर्य प्रथमहविर्भा

गस्योत्तरार्द्धतः पूर्वावदानतो भूयो न्यूचीनाभिरेवांगुलीभिरवदाय पूर्व्यामोप्य॥ द्वितीयहविर्भागस्य तथैवाव

प्र०रत्न०
४२

रायाः॥पंचावत्तीनुहविर्भागद्वयेपिअत्राद्यौत्सर्वोद्वेच्छ्विद्विरवदायपात्रस्थमनभिघार्यावत्तंतुद्विरभिघार्यमाय
दस्येतिहिरण्यगर्भोग्निरितिसूत्रितः॥स्विष्टकृद्धोमेविं०॥ॐयदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं॥अ
ग्निष्टत्स्विष्टकृद्विद्वान्सर्वंस्विष्टंसुहुतंकरोतुमे॥अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांका
मानांसमर्द्धयित्रेसर्वान्नःकामान्समर्द्धयस्वाहेत्येकस्मात्पात्राच्छ्रावितान्नादिशान्वहेरेशेजुहुयात्॥अग्नयेस्विष्ट
कृतइदंनममेतित्यागः॥ततोऽन्तरतःस्थितामिध्मावंधनरज्जुंविसृज्यरुद्रायस्वाहेतिहुत्वोऽपःस्पृष्ट्वा
क्तवेणप्रायश्चित्ताज्याहुतीःसमस्तजुहुयात्॥तत्रमंत्राः॥अयाश्चेतिविमदोपाश्चाग्निःपंक्तिः॥प्रायश्चित्ता
ज्यहोमेविं०॥ॐअयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि॥अयासावयसाकृतोयासन्हव्यमूहिषे
याप्याग्नेस्यनभिशस्तीश्चसत्यमिनोधेहिभेषजंस्वाहेत्येकस्मात्पात्राज्जुहुयात्॥अयसेग्नयइदं॥अतोदे
वामेध्मातिप्रिर्देवागायत्री॥विनियोगःसर्वत्रप्राग्वत्॥ॐअतोदेवाअवंतुनं०रुक्१देवेभ्यइदं०॥इदंवि

एम०
४२

छंदुर्मेधातिथिर्विनियोगः सर्वे छंदुर्गायत्री ॥ ॐ इदं विष्णुर्विचक्रमे० इ० का० १ विष्णव इदं ॥ व्यस्तसमस्तव्याहृतीनां वि
श्वामित्रजमदग्निभरद्वाज प्रजापतयोऽग्निर्वायुः सूर्यः प्रजापतयो गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि ॥ ॐ भूः स्वा
हा अग्नय इदं ॥ ॐ भुवः स्वाहा वायव इदं ॥ ॐ स्वः स्वाहा सूर्यायेदं ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं ॥ ततो
ब्रह्मा कर्त्तारं परीत्याग्नेर्वायव्यदेशे तिष्ठन्नेता एव समाप्ताऊती जुहुयात् ॥ त्या गं यजमानो त्रकर्यात् ॥ ततस्तत्र स्वाब्र
ह्मैव मंत्रविपर्यासादि ति यत निमित्ते सति ॥ यद्वो देवा अपि तया मरुतान्विष्णुपू ॥ मंत्रविपर्यासादि निमित्तकप्रा
यश्चित्तस्य होमं वि० ॥ ॐ यद्वो देवा अतिपातयानि वाचा च प्रयुती देव हेलनं ॥ अरायो अस्मां अभिदुछुनायते
न्यत्रास्मन्मरुतस्तन्निधेत स्वाहा मरुद्भ्य इदं ॥ अनाज्ञातमिति मंत्रद्वयस्य हिरण्यगर्भोग्निरनुष्टुप्पाति नियो
गः प्राग्वत् ॥ ॐ अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु ॥ अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वाहा
॥ यजमानः अग्नय इदं ॥ पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः ॥ अग्ने तदस्य कल्पय त्वं हि वेत्थ यथात थ

43

प्र०रत्न०
४३

दं स्वाहा ॥ यजमानः अग्नय इदं० ॥ यत्पाकत्रेत्यस्य प्रस्विन्तोग्निस्त्रिष्टुप् ॥ ॐ यत्पाकत्रा मनसा दीनदक्षा न य
ज्ञस्य मन्वते मर्त्यासः ॥ अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो यजाति स्वाहा ॥ यज० ॥ अग्नय इ
दं० ॥ एकोनत्रिंशन्नाधिवियतनियतनिमित्ते प्रतिवस्तुमासप्रकारेणाततत्प्रतिपदोक्तजपहोमान्कुर्याद्ब्रह्मा ॥
ब्रह्मणोऽभावे यजमान एवैतान्प्रायश्चित्तादीन्कृत्वाऽन्यस्मै वरं दद्यात् ॥ ॥ ततो यजमानः सर्वकर्मप्रपूरणी
भद्दद्रव्यदर्वीपूर्णाहुतिं जुहुयात् ॥ तद्यथा ॥ स्रुवेणाज्यं गृहीत्वा स्रुचं समविलां परिपूर्य स्रुवं तस्यां स्रुचो मध्ये
बिलं निधाय पुनरपि बिलं निक्षिप्य स्रुवाग्रकुं कुमाकृतं निधाय सव्यपाणिना स्रुवं मूलेधृत्वा दक्षिणपा
णिना स्रुक्स्तुबं शंखमुद्रया गृहीत्वा तिष्ठन्समपादः ऋजुकायः स्रुवं मूलेधृत्वा दक्षिणपाणि[circled] वं मूलेधृत्वा
दक्षिणपाणिना स्रुचं वामेन्यस्तदृष्टिः प्रसन्नात्मा ॥ समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य वामदेव आपस्त्रि
ष्टुप् ॥ आपो जगती पूर्णाहुतौ विनियोगः ॥ ॐ समुद्रादूर्मिरित्स्पदि मधुमधुमत्तं तऊर्मि स्वाहा तेपारयवपारि

ए्म०
४३

मितधारां संततोक्षगयेणासमेधं कृत्वा ॥ अद्येह इदं न मम इत्युदीरयत्यक्त्वा ॥ विश्वेद्योतिषेत्यस्य प्रजानोवृषोग्निस्त्रिष्टुप् ॥
पूर्णाकृतिशेषहोमे वि० ॥ ॐ विश्वेद्योतिषा बृहता भात्यग्नि० ॥ इदं कृसे विनियोक्ते स्वाहेत्यनेन च तथैवावाशिष्टं कृत्वा
त्वा ॥ अद्य इदं न ममेति त्यक्त्वा ॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहेति संस्त्रावं कृत्वा ॥ दीर्घेभ्यो देवेभ्य इदं० ॥ तत
स्तंडुलकरणान्समिद्दर्भेण कलान्यद्भिः प्रोक्ष्याग्नेयमहरेत ॥ पूर्णाकृत्यन्ते तदंतं सम्मूलप्रयोगपारिजातका
रेणालिखितमपीदानीं शिष्टानकुर्वंति ॥ ॥ अथावृत्थस्थाणीयं प्रणपात्रजलेन मार्जनं कुर्यात् ॥ तद्यथा
॥ पूर्वमासादितं पूर्णपात्रमास्तीर्णं बर्हिषि दक्षिणपाणिना निधायतत्रेगंगादिपुण्यनदीः स्मरन् दक्षिणपाणि
नास्पृशन् ॥ पूर्णमसि पूर्णमे भूयाः सुपूर्णमसि सुपूर्णमे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वमे भूयाः अ
क्षितिरसि मामेक्षेष्ठा इति जपित्वा ॥ कुशाग्रैः प्रागादिपंचदिक्षु जलप्रक्षेपं मंत्रैर्यथालिंगं प्रचेत्ता ॥ ते च मंत्राः ॥ प्राच्यां
दिशि देवा ऋत्विजो मार्जयंतां दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां प्रतीच्यां दिशि ग्रहाः पशवो मार्जे

प्र० रत्न०
४४

यंतांतरीक्ष्यांदिश्यापऽओषधयोवनस्पतयोमार्जयंतांऊर्ध्वायांदिशियज्ञःसंवत्सरःप्रजापतिर्मार्जयतांमार्जयंता
मितिवा इत्येकस्कंत्यापठन्तिदिशं प्रति कुशाग्रैः स्वशिरसिमार्जयेत्॥ तत्रमंत्राः॥ आपोअस्मान्नित्यस्यदेव
श्रवाआपस्त्रिष्टुप्मार्जनेवि०॥ ॐ आपोअस्मान्० ऋ० क्रा० १६ स्मापः सिंधुद्वीपः आपोनुष्टुप्मार्जनेवि०॥ ॐ इद
मापःप्रवहत० ऋ० क्रा० १६ स्मापःसिंधुसुमित्रानआपओषधयःसंतुइत्येतैर्मंत्रैर्मार्जनंकृत्वा॥ दुर्मित्र्यास्तस्मै
संतुयोस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मीति॥ निर्ऋतिदेशेकुशाग्रैरपःसिंचेत्॥ ततोब्रह्मायजमानवामपार्श्वेस्थि
तिपत्न्यंजलेपूर्णपात्रस्थेजले॥ ॐ माहंप्रजांपरासिचंयानःसयावरीस्थन॥ समुद्रेवोनिनयानिस्वंपाथो
अपीथेतिमंत्रमेकस्कंत्यापत्यावाचयस्त्रयेवापठन्नृत्यप्सुरवानिषिंचांजलिस्थजलैःपापापनोदार्थमात्मानंय
जमानंपत्नींचप्रोक्षेत्॥ पत्नीनजलवर्हिर्विनिषिंचेत्॥ अथवायजमानएवस्ववामपाणावुत्तानेबर्हिर्विनिधायतत
त्रबर्हिःशापाणिनापूर्णपात्रमादायमाहंप्रजामित्यनेननतज्जलंप्रत्यप्सुरवंनिषिंचत्।आपःसमुद्रंगच्छंतीतिज्ञा

राम०
४४

त्वा पाणौ स्थितं जलं तेन स्नानं पत्नी च प्रोक्षेत॥ ततः कर्ताग्नेर्वायव्ये स्थितः संस्थाजपेनोपतिष्ठेत॥ तद्यथा॥ अग्ने
त्वं न इति चतसृणां गोपायनो लौपायनो वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकर्चा ऋषयः॥ अग्निर्देवता द्विपदा
विराट् छंदः॥ अग्न्युपस्थाने विनि०॥ ॐ अग्ने त्वं नो अंतमः० सुम्नाय नूनमीमहे सखिभ्यः॥ श्रीं च मे त्वं श्रद्धा मयज्ञा
पचतेन मः स्वाहा॥ यत्ते न्यूनं तस्मै त उप यत्ते तिरिक्तं तस्मै ते नमः अग्नये नमः॥ स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रि
यं बलं॥ आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन नमो नमः॥ ततो ब्रह्मपिते त्रैवस्थित्वा एते रेवोपतिष्ठेत॥ ततः कर्ता
आचारात्॥ मानस्तोके कुत्सो रुद्रो जगती विभूतिग्रहणे वि०॥ ॐ मानस्तोके तनये० हवामहे॥ इति स्रुवबिलप
हेन विभूतिग्रहणं॥ ॐ त्र्यायुषं जमदग्नेरिति ललाटे॥ कश्यपस्य त्र्यायुषमिति कंठे॥ अगस्त्यस्य त्र्यायुषमिति ना
भ्यां॥ यद्देवानां त्र्यायुषमिति दक्षिणस्कंधे॥ तन्मे अस्तु त्र्यायुषमिति वामस्कंधे॥ शतायुषमिति शिरसि धारयेत्॥ के
चनोपस्थानात्सर्वे विभूतिधारणमाहुरिति॥ ततः कर्ता परिस्तरणानि विसृज्याग्निं परिसमुह्य परिषिच्य पु

15

प्र०र०ले०
४५

ष्कादिभिः संस्कृत्य नैवेद्यं तांबूलं च निवेद्य ॥ ब्राह्मणेभ्यो यथोक्तदक्षिणां दद्यात् ॥ दक्षिणाभावे कृतशेषं घृतादि
सहिरण्यं दत्त्वा अन्नाभावेन्यस्मै ब्राह्मणाय दत्त्वा पात्राणि प्रक्षाल्य पूर्ववत्क्रमेणाद्भिरुत्सृज्य पस्य स्मरेत् इति
श्रीविष्णुं नत्वा आचम्य धृतपवित्रं ग्रंथिं विस्रस्य शुद्धदेशे क्षिपेत् ॥ दर्शे तु अग्नीषोमस्थाने ऐंद्राग्नी ॥ इतरत्सर्वं
समानं तत्र स्थितमेव ॥ ॥ सद्यस्कालायां पौर्णमास्यां गत्यामयत्रैव यागदिन एव प्रातर्होमानंतरमेवाऽ
न्वाधाय ध्यानं बर्हिः पौर्णमासेष्टिप्रयोगक्रमेण यागं कुर्यात् ॥ ॥ इति श्रीमद्रामेश्वरसूरिसूनुनारायणभट्टवि
रचिते प्रयोगरत्ने पार्वणस्थालीपाकप्रयोगः समाप्तः ॥ ॥ श्रीविष्ण्वर्पणमस्तु ॥ ॥ श्रीरस्तु ॥ ॥ अथेष्टिप्रा
यश्चित्तानि ॥ ॥ प्रमादादन्याग्नौ वैश्वदेवं यत्नेन होमान्वा न्याय्यं तत्रैव दाय प्रायश्चित्तं पथिकृच्चरुं होमं कृत्वा
पुनस्तृतीयादितिथिषु अन्वाधानपूर्वकं क्रियां कुर्यात् ॥ अथातिपन्नेष्टिप्रयोगः ॥ अन्वाधानपूर्वकं चतुरोऽत्र
लोमं दत्ते तदा पंचमादिदिवसे सद्यस्कालान्वाधानपूर्वकं तु कुर्यात् ॥ सूतकादिने दृष्टिर्नीता चेदागामिप

ए०म०
४५

वेपूर्वतिथिषु द्वितीयां चतुर्थी २ नवमी चतुर्दशी च विहायान्यास्तु तासु प्रतिपन्नेष्टिं कुर्यात् ॥ तात्रप्यतिक्रमे अन
न्तरपर्वणि पथिकृद्यागपूर्वकं प्रतिपन्नयागं कृत्वा तत्पर्वणोन्वाधानं कुर्यात् ॥ तत्राप्यतिक्रमे प्रतिपन्नस्यपा
दकृच्छ्रप्रायश्चित्तं कृत्वा कालप्राप्तां प्रतिपदिष्टिं सद्यस्कालान्वाधानपूर्वकं कुर्यात् ॥ द्वितीयपर्वातिक्रमे पू
र्ववदागामिपर्वमध्ये कुर्यात् ॥ तत्राप्यतिक्रमे तत्पर्वणि पथिकृत्पूर्वकं कार्यं ॥ पथिकृदिष्टिं स्वतंत्रां प्राक्प
र्वेष्ट्यासमानतंत्रां वा कुर्यात् ॥ तस्याप्यतिक्रमे तृतीयप्रतिपदि प्रतिपन्नद्वय प्रायश्चित्तं कृच्छ्रद्वयं चरित्वा प्राप्तका
लामिष्टिं कुर्यात् ॥ तस्याप्यतिक्रमे आगामिपर्वपर्यंतं पर्वोक्तं च कुर्यात् ॥ तत्राप्यतिक्रमे समारोपिताग्निर्नश्यति ॥ ते
न विधिना पुनः संधानं कृत्वा प्राप्ते पर्वणि तदिष्टिं कुर्यात् ॥ अन्वाधानेष्टिमध्ये चंद्रग्रहणादोषप्रायश्चित्तार्थं
माज्यहोमं करिष्य इति संकल्प्य ॥ नवो नवो भवतीत्यस्य सूर्या सावित्री चंद्रमास्त्रिष्टुप् ॥ चंद्रग्रहणापरिहारार्थमाज्य
होमे वि० ॥ ॐ नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे ॥ भागं देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरति दी

प्र०ह्लो०
४६

धेमायुः स्वाहा ॥ चंद्रमस इदं ॥ ॐ यमादित्या अंशुमाप्याययंति यमक्षितमक्षितयः पिबंति । तेन नो राजा वरुणो
बृहस्पतिराप्याययंतु भुवनस्य गोपाः स्वाहा ॥ चंद्रमस इदं ॥ अत्राभ्यां द्वे प्राकृतान्येनैवाहुती हुत्वा ॥ अथ स्थलेकरणा
दितंत्रं कुर्यात् ॥ सूर्यग्रहणे चेद्धविरासादनांते तिल आज्याहुतयः ॥ ताश्च ॥ चित्रं देवानामित्यस्यांगिरसः कुत्सः
सूर्यस्त्रिष्टुप् ॥ सूर्यग्रहणापरिहारार्थं मान्यहोमे विनि० ॥ ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्या
ग्नेः ॥ आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ॥ सूर्यायेदं ॥ उदुत्यं काण्वः सूर्यो गायत्री
॥ उदु त्यं जातवेदसं देवं वहंति केतवः ॥ दृशे विश्वाय सूर्यं स्वाहा ॥ सूर्यायेदं ॥ उद्वयमित्यस्य काण्वः प्रस्कण्व
ः सूर्योनुष्टुप् ॥ उद्वयं तमसस्परि पश्यंतो ज्योतिरुत्तरं ॥ देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं स्वाहा ॥ सूर्यायेदं
॥ इति बौधायनोक्तं प्रायश्चित्तं ॥ अथ स्थलेकरणादितंत्रशेषं समापयेत् ॥ ॥ इदं प्रयोगपारिजाते संग्रहोक्तं प्राय
श्चित्तं ॥ ग्रहणजनितवैधान्तरे तु शौनकोक्तमुक्तं ॥ तद्यथा ॥ इष्टिदिने हविरासादनांते कृते अन्वाधाने ष ग्रम०

४६

मध्ये चंद्रग्रहणजनितवैगुण्यपरिहारार्थं शौनकोक्तां माज्याऽऽहुतिमुपस्थानं च करिष्य इति संकल्प्य ॥ अत्राहगो
रित्यस्य राहूगणो गोतमऋषिः चंद्रमा गायत्री ॥ [illegible] मध्ये चंद्रग्रहणावैगुण्यपरिहारार्थमाज्यहोमे वि० ॥ ॐ अत्राह गो
रमन्वत नाम त्वष्टुरपीच्यं ॥ इत्था चंद्रमसो गृहे स्वाहा ॥ चंद्रमस इदं ॥ नवोनव इत्यस्य सूर्या सावित्री चंद्रमास्त्रि
ष्टुप् ॥ चंद्रोपस्थाने वि० ॥ ॐ नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रं ॥ भागं देवेभ्यो विदधात्याय
न्प्रचंद्रमास्तिरते दीर्घमायुः ॥ सूर्यग्रहे तु संकल्पादौ चंद्रपदस्थाने सूर्यपदं प्रयोक्तव्यं ॥ उद्वयमित्यस्य का
ण्वः प्रस्कण्वः सूर्योनुष्टुप् ॥ इष्टिमध्ये सूर्यग्रहणावैगुण्यपरिहारार्थमाज्यहोमे वि० ॥ ॐ उद्वयं तमसस्परि ज्यो
तिष्पश्यंत उत्तरं ॥ देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं स्वाहा ॥ [illegible] वि० ॥ ॐ उद्वयं तमसस्परि ज्योतिष्पश्यंत उत्तरं ॥ दे
वं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं स्वाहा ॥ सूर्यायेदं ॥ चित्रं देवानामांगिरसः कुत्सः सूर्यस्त्रिष्टुप् ॥ सूर्योपस्थाने वि० ॥
॥ ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगत

47

प्र०रत्न०
४७

त्तस्त्रुषश्च्च॥ ॥इत्याष्टिमध्ये ग्रहणे निर्णयः॥ ॥अन्वाधानेष्टिमध्ये ऽग्न्यनुगतो ऽयाश्चेति मंत्रेणाव स्यमाशा
वस्तु नः संधाने कृत्वा॥ ॐ भूर्भुवः स्वः स्वाहेति मंत्रेण संकल्पपूर्वकं प्रायश्चित्तं संस्कृत्वाज्येन हुत्वा पुनरन्वाधा
नपूर्वकमिष्टिं कुर्यात्॥ अन्वाधानेष्टिमध्ये प्रयाणोपपत्तौ तु भ्यंतामग्निरस्तमेति संकल्पपूर्वकं संस्कृताज्य
हुत्वा अरण्यादिषु समारोप्य होमकाले प्रतिष्ठाप्य प्रातर्होमपूर्वकमिष्टिं कुर्यात्॥ अन्वाधाय प्रतिपदि प्रमादा
दिष्ट्यकरणात् तीयादितिथिषु प्रातरौपासनोत्तरं संकल्पपूर्वकं संस्कृताज्येन व्यस्तसमस्तव्याहृतिभिर्हुत्वा
पुनरन्वाधाय यागं कुर्यात्॥ ॥अथ प्रसंगादत्रैव निमित्तकप्रायश्चित्तान्युच्यंते॥ ॥शम्यापरिमितदेशा
द्वीक् बहिरायतनाद्धृतश्चेदग्निः स च प्रायश्चित्तसमाप्तिपर्यंतं स्थितियोग्यस्तदा॥ इदं त एकं पर ऊत ए
कमिति मंत्रेण॥ यतने प्रक्षिप्य व्याहृतिभिराज्याहुतीर्जुहुयात्॥ अत्र कारिका॥ अर्वाक् शम्यापरासात्तु
बहिरायतनाद्धृतं॥ प्रायश्चित्तसमाप्त्यंतं समर्थो ज्वाला किंतु यदि॥ इदं त इत्यचा तत्स्थाने क्षिप्रं क्षिपेत्पुनः॥

रत्न०
४७

आज्याहुतीश्चतुर्ऽऽयाश्चाहुत्यारव्ये श्च पूर्ववत्॥ शम्याश्च द्वात्रिंशदंगुलैस्त्याप्लत्वः॥ शम्यापरिमितदेशाद्बहिरा
यतनाहुतेर्गतो पथिकृतेऽग्नये चरुं निर्वपेत्॥ अशक्तो द्वादशगृहीतेनाज्येन स्रुचं पूरयित्वा॥ ॐ अग्नये पथिकृ
ते इदं न मम इति त्यागः॥ स्वाहाकृतौ वा॥ तदुक्तं कारिकायां॥ अतिक्रांतो यदा शम्यापरो समनलो भवेत्॥ चरुं पथि
कृते कार्यः पूर्णा[illegible]चं॥ तया चाज्याहुतिरथापि वा॥ पूर्णाहुतिस्त्रुवेणैकं कारिकायामुक्तं॥ आज्यं द्वादश
कृत्वस्तगृहीत्वा पूरयेत्स्रुचं॥ तया चोज्याहुतिः कार्या सा पूर्णाहुतिरिष्यते॥ स्रुवेण पूर्णाहुतिर्वा स्यादित्येके या
ज्ञिकाविदुः॥ यदग्निः स्वयं ज्वलितेत दा॥ उद्दीप्यस्व जातवेदो प्रघ्नं निर्ऋतिं मम॥ पशूंश्च मह्यमावह जीवनं
च दिशो दश॥ मा नो हिंसीज्जातवेदो गामश्वं पुरुषं जगत्॥ अबिभ्रदग्न आगहि श्रिया मा परिपालय॥ इति
मंत्राभ्यां समिद्द्वयमग्नौ वा रदध्यात्॥ अग्नेश्च मलमन्त्रा कपघाते॥ पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्र
ह्माणो वसुनीथ यज्ञैः॥ घृतेन त्वं तन्वो वर्धयस्व सत्याः संतु यजमानस्य कामाः इति समिधमादध्यात्॥ तदुक्तं

48

प्र० स्लौ०
४८

कारिकायां॥स्वयं जुह्वेच्चतुर्होत्वेति द्वाभ्यां समिद्भ्यां॥आधेयमुपघातेनतु पुनस्त्वेत्यनया समित॥हूयमानायास्वयं
ऊतिर्यदि बर्हिः स्कंदेत्तदा देवान्ने नमित्यनेनतामभिमृशेत्॥द्रप्सश्चस्कंदेत्याऊतिंतु जुहुयात॥व्याहृतिभिश्च॥ततस्त्वे
न्नेमनं लोक्यिषेत॥मंत्रो चार्देवान्ने नमगन्म्यज्ञस्तस्य माशीरवतु वर्द्धतां॥भूतिरिनेतेन मुंचतु यज्ञोयस्तेयतिमंहस
ः॥भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा यज्ञस्य त्वा प्रमयोन्मया प्रतिमया द्रप्सश्चस्कंद प्रथमा
अनुचरति मंत्र योनिमनु यश्च पूर्वः॥समानं योनिमनु संचरंतं द्रप्सं जुहोम्यनु सप्त होत्राः॥अत्र कारिकायां॥
आऊतिं हूयमानानु बर्हिःस्कंदेत वै यदा॥देवान्ने नमगन्म्यज्ञ इत्यनेनाभिमृशेत्तां॥द्रप्सश्चेत्याऊतिं ऊर्ध्वं प्र
क्षिपेदनलेपुनः॥देवान्नेनेति सर्वत्र स्कन्ने त्वभिमृशेद्धविः॥होतव्या स्याऊतिस्तत्र व्याहृत्या स्वेः समुच्चयात्॥
यागात्प्रागन्वाधानं निर्वापादिषु जातो देवताव्युत्क्रमो यदा स्यात्तदा व्याहृतिभिरूत्वा विहितदेवतायजेत॥
यागाद्ध्ऊर्ध्वं देवताव्युत्क्रमस्थाने तु व्याहृतिभिरूत्वातं यागमावर्तयेत॥यदा त्वप्रकृतां कांश्चिद्देवतां यजेत्तदा व्या

एम०
४८

हुतिभिरुक्त्वा प्रकृतदेवतायै यागमावर्तयेत्॥ तत्र का॥ प्राग्यागाद्युत्क्रमे ज्ञाते इदं कृत्वा यजेत तदा॥ अविज्ञाताविपर्या
सो विहितां देवतां स्मरन्॥ इष्ट्वा हुतं तदूर्ध्वं तु व्युत्क्रमावगमे सति॥ प्रायश्चित्तमिदं कृत्वा यागं नावर्तयेत्तदा॥ पदार्थ
विहितां कांचिद्देवतामिष्ट्वांस्तदा॥ प्रायश्चित्तमिदं कृत्वा यागं नावर्तयेत्कृतं॥ इदं व्याहृतिहोमाख्यं॥ अन्यान्यपि
प्रायश्चित्ता[illegible]नि कारिकायां॥ पवित्रं यदि नश्येच्चेत्तस्मात्स्यात्पवित्रवत्ते चरुः॥ यदा हविरपर्यं स्यात्तेनैव हविषा यजे
त्॥ चतुःशरावमात्रं तु पचेद्व्रीहिभिरोदनं॥ ओदनं येन तेन चान्येन चतुरो ब्राह्मणानथ॥ बहुद्रव्यमदग्धं वा किंचिद्दे
व यदा हविः॥ शिष्टेनैवापुनर्यागः स्यादाराध्यादितस्तदा॥ कृत्स्नं दग्धं यदा तत्स्यात्तन्न कृत्वाद्ययेद्दधिः॥ स ए
व यागः कर्तव्यः पुनर्यागस्तु नेष्यते॥ मध्यात्पूर्वोद्दितो वर्तते यदि दुष्टं हविर्भवेत्॥ तस्यैव हविषो चेदन्यद्ध्यात्तु वो
द्धृतः पुनः॥ रक्षाधाने कृते दुष्टं प्रधानं हविरत्र चेत्॥ त[illegible]च्छाने तु ऊया राज्यमदुष्टं च जुहोत्यथ॥ एवं समा
ष्य यदुष्टं तदप्सु प्रक्षिपेत्तु नः॥ अन्वाधानादिको यागः पुनः कर्तव्य एव तु॥ मागि[illegible]धानतो दुष्टे प्रधानहवि

प्र०रत्न०
४९

पित्त्वेथ॥ तद्धविः पुनरुत्पाद्य पूर्ववत्तत्समापयेत्॥ अंगानां चेद्धविर्दुष्टं तदप्सु प्रक्षिपेत्पुनः॥ विष्टकृद्धविषो दोषत्रा
ज्येनैव समापयेत्॥ प्रच्युतैस्तैन दैवैः केशैः कीटैर्वा ऽमेध्यसंसृष्टैः॥ वसासृक्कफशुक्रमज्जास्थिमूत्रविट्स्वेददु
ष्टकैः॥ श्लेष्माद्यैरपि बीभत्सैर्दुष्टानि स्पृष्टवीक्षितवत्॥ भिन्नानि चैव भिन्नानि दुष्टानि स्पृष्टानि क्षिपेज्जले॥ एकैके द्विचे
ततश्चान्यामाहृत्य पक्त्वा ऽऽज्यादिवि॥ वानस्पत्यानि भिन्नानि प्राग्दग्धान्यनले क्षिपेत्॥ अन्यच्चाप्सु चिसं तद्धमन्म
ये भिन्नमेव चा॥ भूमिर्भूमिमत्युमंत्रेण प्रक्षिपेद्वत तज्जले॥ मंत्रः॥ मंत्रः॥ भूमिर्भूमिमगान्माता मातरमप्यगा
त्॥ भूयास्म पत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति॥ संसृष्टा यस्य गृह्याग्निरन्यगृह्याग्निना यदि॥ चरुर्व
विचयेकार्योयद्वा पूर्णाहुतिर्भवेत्॥ अग्निगुणीभवेद्देषु विविचित्वा द्विको गुणाः॥ चरुः क्षामाय कर्तव्यो
गृहदाहेषु वै भवेत्॥ शवाग्निना तु संसर्गे कुर्वीत शुचये चरुं॥ पचनाग्नेस्तु संसर्गे संवर्गाय चरुर्भवेत्॥
वैद्युतेन तु संसर्गं कुर्यादप्सुमते चरुं॥ प्रायश्चित्तं चरुस्थाने वा पूर्णाहुतिरिष्यते॥ पर्वण्यपार्वणे ऽक्रपातेन

राम०
४९

स्थूलंगे कुर्याद् दप्सुमठे कुर्याद्द्वृतमन्ते चरुं ॥ पर्वणि व्रतलोपे तु कुर्याद्व्रतपतं चरुं ॥ समानतंत्रं कुर्वीत पार्वण
न तु कर्मणो न तु कर्मणः ॥ अकृताऽग्रयणो श्रीय त्रवान्नं यस्तु चैत ततः ॥ वैश्वानराय कर्तव्यश्चरुः पूर्णाऽऽइति
स्तुवा ॥ द्विपदन्नं यदा भुंक्ते तत्राप्येष चरुर्भवेत् ॥ कपालनाशे त्वेषः स्याच्छ्रवणा कर्मनामनि ॥ कपालं तं तु
वेद्यन्ते प्रागेव श्रपणात् ॥ यद्देत दातदातवो कमंत्रेण कपालं संदधात्यथ ॥ अभिन्नो धर्मेद्रत्याभ्यामप्सु
नत्मं क्षिपेदथ ॥ तदातत्रो कमंत्रेण कपाला चैद श्रुचिसंबद्धमाभ्यामेव क्षिपेज्जले ॥ भिवेद यदि पुरोडाशो
ऽऽ छेदयवा यदि ॥ किमु त्यतस्मिमंत्रेण वर्हिष्येन निधायतु ॥ अभिमंत्रयते तं तु मा हिंसीरिति मंत्रतः ॥ अयं तेन
त शान्त्वे धूपलमानेन जावति ॥ अग्नयेऽप्सुमते चरुः पूर्णाऽऽइति स्तुवा ॥ अयमस्य वधूगो वीजननं नयेच्च घर्मो
ततः ॥ समरूप स्वरूं कुर्यात्पूर्णाऽऽइतिमथापि वा ॥ समाहृत्य भिन्नाशे पुनराधेयमिष्यते ॥ श्रौतो नाक्रमाविरोधेन न्य
म ग्पतु शान्तशाली विदं ॥ प्रायश्चित्ते विशेषस्तु यत्र नोक्तो भवेद्विधिः ॥ होतव्याऽऽज्याऽऽइतिस्तत्र भूर्भुवःस्वरितीह तु [illegible] ॥

५०

प्र० रत्न०

५०

निमित्तानंतरं सर्वं प्रायश्चित्तं भवेदिह ॥ प्रागेवोत्पद्यते दोषश्चान्यसंस्कारतो यदि ॥ प्रायश्चित्तं भवेदान्यसंस्कारानंत
रं तदा ॥ व्युत्क्रमे देवतानां तु संकल्पादौ भवेद्यदि ॥ मध्यात्सर्वाहुतश्चेति व्युत्क्रमो यत्र भवेद्यदि ॥ द्रव्याणां व्युत्क्रमः
स्याच्चेत्तत्रा निर्वपणादिषु ॥ पदार्थो देवताकृत्वा ब्रह्मा तु कुर्यात्तु स्वकोवाहुतिं ॥ यत्र तु रव्यस्वगृहे द्रव्यं होमकर्त्रे दद्या
ति तत्र ॥ यजमानस्तु कुर्याद्ब्रह्माभावे स्वकोवाहुतिं ॥ कस्मैचिद्ब्राह्मणाय [illegible] अन्यत्र हे द्रव्यं ददातीति तत्र ॥ यत्र य
होतव्यैकाहुतिर्मन्त्रव्याहृत्यादिभिः समुच्चयात् ॥ सर्वत्रैवं प्रायश्चित्तरूपं जपं होमं वा ब्रह्मैव कुर्यात् ॥ जुहोति
जपतीति प्रायश्चित्ते ब्रह्माणामिति सूत्रकृदुक्तेः ॥ तदभावे तु यजमानः समानन्यायत्वात् ॥ तत्र त्वकाले कर्मा
करणानिमित्तप्रायश्चित्तमुक्तं तस्मिन्प्रायश्चित्ते कृतेऽतीतं कर्म कार्यं न वेति मतभेदः ॥ तदुक्तं कारिकायां ॥ प्रायश्चि
त्ते कृते पश्चादतीतमपि कर्म वै ॥ कार्यमित्येके अन्ये कार्यं न चेति मतभेदः ॥ तदुक्तं कारिकायां ॥ आचार्यानेतरान्येतु
विपश्चितः ॥ कर्मसमाप्तिसमये ऽग्न्युपस्थाने ऽह्नाते ऽह्नाते वा ऽग्न्यपाये प्रजापतिः ॥ प्रायश्चित्तमाह ॥ प्रमादात्तु

रम०

५०

वृंतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्दिष्टोः संपूर्णः स्यादिति श्रुतिरिति॥ एवमन्यान्यपि प्रायश्चित्तानि यं
मांतरतोऽवगंतव्यानि॥ ॥इति प्रयोगरत्नेऽरण्यप्राप्तप्रायश्चित्तानि नैमित्तिकप्रायश्चित्तानि च॥ ॥अथ सकलधर्म
साधारणपरिभाषा॥ ॥तत्र कारिका॥ आज्ये कर्तव्यके होमे स्याच्चेदाज्यपरिग्रहः॥ स्यात्परिस्तरणं तत्र कृता
कृतमिति स्थितिः॥ नोच्चारयति यत्राज्य परं कर्मसु स्रुवस्त्र कृत॥ अनादिष्टाज्यहोमे तु तत्र नित्या परिस्तृतिः॥
सर्वस्मिन्पाकयज्ञे तत्र आज्यभागौ कृताकृतौ॥ सर्वेषु पाकयज्ञेषु भवेद्वृत्ताकृताकृतः॥ धन्वंतरिमखे ब्रह्मानि
त्यः स्यात् लगवेतथा॥ क्वचिद्धोमं क्वचिन्नाम्ना क्वचिन्मंत्रेण सस्वरं कृत॥ नोभयं यत्र तत्रेष्टं द्रुवनं नामधेयतः॥ नैकेका
चनपक्षे यं चोलाद्यवाप्रितो यदा॥ तदाग्निरिंद्र इत्याघाहेतव्या इति हस्तिकृत॥ अनेकपाकयज्ञाः स्युरेकस्मिन्का
लए वचेत॥ समानतंत्रकांकार्या न तंत्रावृत्तिरिष्यते॥ पात्रासादनमिध्मा ते आज्याधिश्रयणादि च॥ स्रुवादिमा
र्जनं चैव स्मरस्तु महरणं तथा॥ पूर्णपात्रमवेच्छिन्नमाज्यस्यात्यवनं तथा॥ इध्मानादेशमाज्यं स्यादनुक्ते साधने ऽ

वः॥ तत्र पात्तु मंत्रकरणो मंत्रउपस्थानाभिमंत्रणे॥ मंत्रोपः कर्मकरणो गृह्यकर्मण्युपांशुपठ॥ इदं कार्यमनेनेतीति न क्वचि
द् दृश्यते विधिः॥ लिंगाद्वेदमर्थत्वं येषां ते मंत्रसंज्ञिताः॥ मंत्रांते कर्मकर्तव्यं मंत्रस्य करणत्वतः॥ कर्मादौ तु मंत्र
स्याप्याहुतिर्गृह्यकर्मणि॥ मंत्रोक्तदेवतानां तु तत्स्थाने वाथ निर्वपेत्॥ चतुरश्चतुरो मुष्टीन्ब्रीहीन्शां च तथा भवे
त्॥ स हैव श्रपयेत्तत्र नास्ति सुद्धरणं तथा॥ आदिष्टमंत्रहोमे तु सर्वत्रैवं प्रतीयतामिति॥ कृताकृतं वैकल्पिकं
॥के च इति गृह्यसूत्रकारः॥ क्वचिन्नाम्ना होममाह॥ यथा सावित्र्यै ब्रह्मण इति क्वचिन्मंत्रेण॥ यथा॥ अग्नै
नय सुपथा राये अस्मानिति चतसृभिरिति॥ यत्र तु न नामतो न वा मंत्रतो होम उच्यते॥ केवलं तद्दैवतादिनादेव
ताविधानं॥ यथा प्राजापत्यस्य स्थालीपाकस्य रुद्रकाम्यस्य श्रवणस्य इत्यादौ तत्र चतुर्थ्यंतेन देवतानाम्ना होम इत्य
र्थः॥ अनेक इति यथा॥ अपुत्रीकर्मणी यदा अपुत्र्यो क्रियेते तत्र तयोरेककालता॥ तयोस्तिलयादिषु षट्सु य
स्तु नीतौ मंत्र उक्तस्तस्य लक्षणमेतत्॥ लिंगादर्थप्रकाशनसामर्थ्यात्॥ इदमर्थत्वं तत्तत्कार्यार्थत्वं॥ नतु मं

त्रसामान्यलक्षणमिदं अव्याप्त्यतिव्याप्त्यादिदोषापत्तेः॥ तस्माद्विशेषस्यैव मंत्रस्य लक्षणं॥ एवं च मंत्रशब्दो ध्व
र्थः॥ सामान्याद्यो विशेषार्थ इति भगवान्॥ यत्रोपदिश्यते कर्म कर्तुरंगं न तूच्यते॥ दक्षिणस्तत्र विज्ञेयः कर्म
णां पारगः करः॥ यत्र दिङ्नियमो नोक्तो जपहोमादिकर्मसु॥ तिस्रस्तत्र दिशः शस्ता ऐंद्री सौम्याऽपराजिता॥ अपरा
जिता ऐशानी॥ आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नोच्यते॥ तदासीनेन कर्तव्यं न प्रह्वेन न तिष्ठता॥ तथा॥ अ
नादेशे स्वयं कर्ता सर्वे ऋत्विक्पुरोहिताः॥ प्राकूलदा साधनानां प्राक्संस्थत्वं च कर्मणां॥ तथा॥ अविज्ञातास्त्व
मंत्राः प्रयोक्तव्याः प्रयोक्तृभिः॥ एकस्मिन्नेव होमेषु विज्ञाताश्च विकल्प्यते॥ यस्मिन्मंत्रेण पठितः स्वाहाकारो
भवेद्यदि॥ स्वाहान्ते न प्रयोक्तव्यो होमेषु मरणादिकः॥ यत्र स्यात्स्वस्त्यं च शब्दस्तत्रैव होम इष्यते॥ रूगंते तत्र
होतव्यं स्वाहाकारं पठेत्ततः॥ ज्ञानीयान्मंत्रस्य चं मंत्रं तदन्यानुपदेशतः॥ ॐ भूर्भुवः स्वश्च स्वश्चेति तिस्रो व्याहृतयो
जपेत्॥ आभिश्च होमेति स्वभिश्चतुर्थ्या स्यात्समासतः॥ अथ प्रयोगमंत्राणां षड्विधं लक्षणं स्मृतं॥ जपानुमं

52

प्र॰रत्न॰
५२

न्यात्तैयैव च॥ उपस्थाकर्मकरणां षडुपांशु प्रयोगतः॥ जप मुच्चारणं विप्राश्चात्वथ्यमर्पित द्भवेत्॥ अर्थेतः कार्यलाभे
स्यर्थ एव क्रतो भवेत्॥ मंत्र मुच्चारयन्नेवमंत्रार्थं तत्त्वनसंस्मरन्॥ शेषितं तन्मनाभूत्वा स्मादे तदनु मंत्रणं॥ एतदे
वाभिमंत्रस्य लक्षणं चेक्षणाधिकं॥ अद्भिः संस्पृशन्॥ श्रोशोनाधिकयात्तु देवाप्यायनं स्मृतं॥ उपस्थानेन तदेव
स्यात्स्मरणादि स्थाने संयुतं॥ बाह्यकर्मपरे तेषु कर्मकाले क्रियेत यत॥ कर्मणः करणं तस्य विहिताच्च प्रकाशन
॥ मंत्रेणाकृत्वो मंत्रोते क्रियेतयत्॥ कर्म येषु तु॥ पथ्या॥ प्राजापत्य मुपांशु स्यान्मध्ये सावित्रमेव च॥ कृताकृतंत्र
ह्मवरणो ब्रह्मणोचान्यस्य संस्कृतिः॥ संमार्गः स्रुक्स्रुवयोश्च आज्यभागोपसंस्कृतिः॥ ब्रीहिणामवघाते तु ले षु कृ
ताकृतः॥ द्रवीभूत घृतस्योपि विलापनविधिस्तथेति॥ अत्र विहितं कर्म पवित्रपाणिः कुर्वीत॥ यदाह हारीतः॥ ज
प होम हराहेतै स्वस्तुवादि व्यरूपिणः॥ पवित्रहत हस्तस्य विद्रवंति दिशो दश॥ अत्रिः उभाभ्यामपि पाणिभ्यां विप्रे द
र्भपवित्रके॥ धारणीये प्रयत्नेन ब्रह्मग्रंथिसमन्विते॥ ब्रह्मग्रंथिलक्षणं गरुडपुराणे॥ अत्यन्यावैहस्तौ

राम॰
५२

मार्गो ब्रह्मग्रंथिविनिर्मितः ॥ सकृत्प्रदक्षिणीकृत्य पवित्रमभिधीयते ॥ तद्ब्रह्मग्रंथिमत्प्रोक्तं पवित्रं वेदवेदवि-
द्भिः ॥ पवित्रकर्तुरभिमुखप्रदेशो ब्रह्ममार्गः ॥ पवित्रदर्भसंख्या च तत्रैव ॥ सप्तभिः कुशपिंजूलैः कुर्या-
द्ब्रह्मा पवित्रकं ॥ पंचभिः क्षत्रियस्यैव चतुर्भिस्तु तथा विशः ॥ द्वाभ्यां शूद्रस्य विहितं सर्वाशां तथैव वा ॥ मार्कंडे-
यस्तु ॥ चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं ॥ एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं ॥ सर्वेषां वा भ-
वेद्द्वाभ्यां पवित्रं ग्रंथितं नवा ॥ त्रिभिस्तु शांतिकं कार्यं पौष्टिकं कार्यं पौष्टिकं पंचभिस्तथा ॥ चतुर्भिरभिचा-
रार्थं कुर्वन्कुर्यात्पवित्रकं ॥ हेमपवित्रं प्रशस्तमुक्तं ॥ हेमाद्रौ ॥ अन्यानि च पवित्राणि कुशदूर्वात्मका-
नि च ॥ हेमात्मकपवित्रस्य कलां नार्हंति वै कलामिति ॥ द्रव्यभेदेनाऽऽकृतिप्रमाणमेवं उक्तं शिष्टं तत्रैव शेषक-
र्षप्रमाणमात्रं स्यात्स्वस्यान्मधुहर्षिचत्तत्समं ॥ तंदुलानां प्रसृतिमात्रं पायसं प्रसृतेः समं ॥ कर्षमात्राणि लाजानां मुष्टि-
मिता मताः ॥ अन्नं ग्राससमं ग्रासमेव शाकं ग्रासार्द्धमात्रकं ॥ मूलानां तु त्रिभागः स्यात्कंदानामष्टमांशकः ॥

(85)

प्र॰रत्न॰
५३

इक्षुः पर्वप्रमाणस्यादंगुलद्वितयं लता॥ प्रादेशमात्रः साभिधोव्रीहीणामंजलीसमाः॥ तिलसक्तुकणादीनां प्र
गीमुद्राप्रमाणतः॥ पत्रपुष्पफलानां तु स्वमानात् ऊतिरिष्यते॥ चंद्रश्रीखंडकस्तूरीकुंकुमाऽगरुकर्दमाः॥
हरिमंथसमाः प्रोक्तो गुग्गुलुर्बदरीसमः॥ आहुती नाभिदं मानं कथितं वेदवेदिभिरिति॥ हरिमंथसमाः प्रोक्तौ
कोक्तायुग्मवणकः॥ मृगीमुद्रालक्षणमुक्तं तत्रैव॥ स्यात्रिमुद्राम्रगीमुद्राहोमे सर्वफलप्रदेति॥ अरणीज
न्यादेरग्नेरुत्तमादित्वमुक्तं तत्रैव॥ उत्तमोऽरणिजन्यो ऽग्निर्मध्यमः सूर्यकांतजः॥ उत्तमः श्रोत्रियागारान्म
ध्यमस्त्वगृहादिजः॥ एतमग्निं ताम्रसौवर्णराजतादिपात्रेष्वोपरि स्थापयेत्॥ तथा चात्रिः॥ पात्रांतरेणापिहिते
ताम्रपात्रादिके शुभे॥ अग्निप्रणयनं कुर्याच्छरावे ता दृशापि वा॥ आपस्तंबः॥ नाप्रोक्षितमिंधनमग्नावादध्या
त्॥ बर्हिरर्थं कुशाभावे प्रतिनिधेयः स्मृत्यर्थसारे॥ बर्हिः काशमयं ग्राह्यं नलभ्यंते कुशा यदि॥ शरैः शीरमुच
थ्यांश्च बालमुंजार्जुनेक्षुकः॥ सुगंधितेजनादारूदूर्वाक्षारद्रुमाश्च पिप्पल्यादिसर्वतरूणामपि शस्त्वं वर्हिर्यथोपितं

प्र॰रत्न॰
५३

॥ पुष्पमूलफलकाष्ठमूलं दुर्गेधेऽपि तस्माद्वर्जितं ॥ शातातपः ॥ समित्कुशफलादीनि ब्राह्मणः स्वयमाहरेत् ॥ शूद्रानी
तैः क्रयक्रीतैः कर्म कुर्वन्नन्त्यपः ॥ विष्णुः ॥ दर्शे श्रावणमासस्य समंत्रोत्पाटिताः कुशाः ॥ अयातयामास्ते
ह्रेया नियोज्याः सर्वकर्मसु ॥ वर्षमिति शेषः ॥ कुशोत्पाटनमंत्रमाह कश्यपः ॥ शुचौ देशे शुचिर्भूत्वा स्थित्वा
पूर्वोत्तरामुखः ॥ ॐ काररौच मंत्रेण कुशान्स्पृष्ट्वा द्विजोत्तम ॥ विरिंचिना सहोत्पन्न परमेष्ठि निसर्गज ॥
नुद पापानि सर्वाणि दर्भ स्वस्तिकरो भव ॥ इमं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः ॥ ॐ फट्कारेण दर्भांस्तु स
कृच्छित्वा समुद्धरेत् ॥ हारीतः ॥ अच्छिन्नाग्रायान्यविविक्ताश्लक्ष्णसमत्वान्कोमलान्शुभान्नु ॥ पितृदेवद्विजा
र्थी हि समादद्यात्कुशान्द्विजः ॥ मासेन भस्यमायास्यात स्याद्दर्भोच्चयो मतः ॥ अयातयामास्ते दर्भा नियोज्याः
स्युः पुनः पुनः ॥ गोभिलः ॥ कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः ॥ कुशाग्रे शंकरं विद्यात्त्रयो देवा व्यवस्थि
ताः ॥ हारीतः ॥ चितौ दर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु ॥ स्तरणासनपिंडेषु षट्कुशान्यविवर्जिताः ॥ हा

शीतः॥ चितौ दर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु॥ स्तरणासनपिंडेषु षट्कुशान्परिवर्जयेत्॥ ब्रह्मयज्ञे ये दर्भा ये द
र्भाः पितृतर्पणे॥ हता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते॥ मार्कंडेयः॥ कुशपाणिः सदा तिष्ठेद्ब्राह्मणो
दंभवर्जितः॥ स नित्यं हंति पापानि तूलराशिमिवानलः॥ इध्मार्थमाह मरीचिः॥ पालाशः खादिरोश्वत्थः
शमी वट उदुंबराः॥ अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः॥ दश द्वादश वा दश चांगुल्यः समाः पंच दश
स्मृताः॥ नत्वंगुष्ठाः सत्वचश्च सार्द्रा इध्मा इहोत्तमाः॥ ब्रह्मपुराणे॥ शमीपलाशन्यग्रोधप्लक्षवैकंकतो
द्भवाः॥ अश्वत्थोदुंबरौ बिल्वश्चंदनः सरलस्तथा॥ सालश्च देवदारुश्च खदिरश्चैव याज्ञियाः॥ दक्षिणायां वि
शेषतो महाभारते॥ वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा॥ सर्वत्रैव तु चोद्दिष्टा भूमिर्गावोथ कांचनं॥ दे
नेवायुः॥ शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पितृवल्लभं॥ अमंगलं तद्यत्नेन देवकार्येषु वर्जितं॥ अन्यच्च॥ यज्ञोपवी
ते द्वे धार्ये श्रौते स्मार्ते च कर्मणि॥ तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते॥ सदोपवीतिना भाव्यं सदा बद्धशिखेन च॥

विशेषोप्युपवीतस्य यत्करोति तेन तत्कृतमिति ॥ अत्र एवाह्निकसंदर्भे शब्दवशात्पुरुषार्थता ॥ उत्तरार्द्धेनाविपर्यये नि
रुद्धारे स्नाये शिखसोपवीताभ्यां कर्तव्यं कर्मेति ॥ कीर्त्तनोत्कर्मार्थता ॥ एवं च कर्मकाले शिखाबंधोपवीताभा
वे कर्मांगलोपनिमित्तं पुरुषार्थलोपनिमित्तं चेति प्रायश्चित्तद्वयं भवति ॥ दर्शपौर्णमासयोश्चिवाऽन्नतवदने क
र्मणो बहिस्तु पुरुषार्थलोपनिमित्तमेकमेवेति विवेकः ॥ संग्रहे ॥ प्रभुः प्रथमकल्पस्य योऽनुकल्पेनुवर्त्त
ते ॥ न समाप्नोति फलं तस्य परत्रेति श्रुतिस्मृतिः ॥ बह्वल्पं वा स्वगृह्योक्तं यस्य यत्कर्मणोऽवहितपुरुषचोदितं ॥ त
स्यतावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ कर्मविशेषेऽग्निनामानि ॥ पावको लौकिके ह्यग्निः प्रथमः संप्रकी
र्तितः ॥ अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ॥ ततः पुंसवने सेयः पवमानस्तथैव च ॥ सीमंते मंगलो ना
म प्रबलो जातकर्मणि ॥ नाम्नि चै पार्थिवो ह्यग्निः प्राशने तु शुचिः स्मृतः ॥ सभ्यो नाम स चौले तु व्रतादेशे समु
द्भवः ॥ गोदाने सूर्यनामाग्निर्विवाहे योजको मतः ॥ ७ आवसथ्यो द्विजो हेयो वैश्वदेवे तु रुक्मकः ॥ प्रायश्चि

प्र०र०त्न०
५५

त्रेविष्टश्चैव पाकयज्ञेषु पावकः॥ देवानां हव्यवाहश्च पितॄणां कव्यवाहनः॥ शांतिके वरदः प्रोक्तः पौष्टिके बल
लवर्द्धनः॥ पूर्णाहुत्यां मृडो नाम क्रोधोग्निश्चाभिचारके॥ हव्यवाह रिके॥ वश्यार्थे कामदो नाम वनदाहे तु दूतकः॥
कुक्षौ तु जठरो ज्ञेयः क्रव्यादो मृतदाहने॥ वह्निर्नामा लक्षहोमे कोटिहोमे हुताशनः॥ समुद्रे वाडवो ह्यग्निः क्ष
यसंवर्तकस्तथा॥ ब्रह्मा वै गार्हपत्यः स्यादीश्वरो दक्षिणस्तथा॥ विष्णुराहवनीयः स्यादग्निहोत्रे त्रयोग्नयः॥ ज्ञा
त्वैवमग्निनामानि गृह्यकर्म समारभेत्॥ स्मृत्यर्थसारे॥ बहुशुष्केंधने चाग्नौ सुसमिद्धे विधूमके॥ सांगारे
लेलिहाने च होतव्यं नान्यथा क्वचित्॥ स्रुक्स्रुवस्रुगादिप्रकृतिवृक्षाः॥ स्मृत्यर्थसारे॥ जुहूः पालाश्युपभृदाश्वत्थी
वैकंकती ध्रुवा प्रस्था सर्वाः स्रुचः कार्याः॥ एतेषामन्यवृक्षजाः॥ खादिरः स्रुक्स्रुवा कार्यः शम्या प्राशित्रमेकतो॥ खा
दिरो मुसलः कार्यः पालाशः स्यादुलूखलः॥ यद्वोभौ वारणौ कार्यौ तदभावेन्यवृक्षजौ॥ मुख्याभावे तु सदृशं द्र
व्यं प्रतिनिधीयते॥ यावद्यावत्तु सदृशं तत्तदेव हि गृह्यते॥ संग्रहे॥ प्रणीताप्रोक्षण्योः शस्तो पूर्णपात्रार्थं दारुकांस्य ता०

५५

मयैम खे॥ खदिरशाक्रचः कार्यः पंचाशेन तु हूमे वेत्॥ खकुम्भ देशा विसोस्या म तामन्येर्वायाहितैर्दुमैःमतद्भावेय
लाशस्यपर्णाभ्यां हूयते हविः॥ पलाशपर्णाभावे तु पर्णो वा पिप्पलोद्भवैः॥ परीमत्रमध्यमं॥ मध्यमे न पूर्णेन तु होतीति
श्रुतेः॥ चमसं वा प्रणीतायाः कांस्यपात्रमथापि वा॥ घटनाम प्रकारं संग्रहे॥ आयामं पंचधा कृत्वा द्विभागं पात्रमुच्य
ते॥ त्रिभागं दंड इत्याहुरेतदायामलक्षणं॥ पात्रायामार्धतः पात्रविस्तारश्चेत दर्दितः॥ अन्यानि तु लक्षणानि विस्ता
रभयेन नोक्तानि॥ तथा॥ काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः॥ काम्येष्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं
विदुः॥ न स्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु॥ स देशकालयोर्नास्ति नारण्योरग्निरेव सा॥ नाभावस्य
प्रतिनिधिर्यत्र स्वामिद्वारा मिष्यते॥ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्॥ इत्यादि तथा॥ स्वकालादुत्त
रो गौणः कालः सर्वस्य कर्मणः॥ तथा॥ कुशा दर्व्यां त्योमंत्रा ब्राह्मणाश्च बहुश्रुताः॥ न ते निर्माल्यतां यांति विनि
योज्याः पुनःपुनः॥ कुशाः षट्सु तु निर्माल्याः दर्व्याद्या अभिचारिके॥ मंत्रास्तत्र च शूद्रार्थे ब्राह्मणाः प्रेत

मां ॥ ऊर्ध्वं स्थिता यानि द्वितीयायास्त्वाऽशुभं ॥ शय्यादौ शुभं ॥ पित्रादिस्मिन्विस्व भर्तृभिर्दृष्टमशुभं ॥ ऊर्ध्वं स्थि
शय्यादौ शुभमित्यादि ॥ द्वितीयं ॥ दुष्टमासादौ प्रथमरजोदर्शने तो दूत्वभेत्रागादि मंगलाचारं न कुर्यात् ॥ द्वि
तीये तु शुभे तन्न कुर्यादिति केचित् ॥ प्रथमे दुष्टरजोदर्शने द्वितीये प्रतीक्ष्य तस्मिन्नप्यशुभे विस्तरे शांति
केचित् ॥ प्रथमर्तौ च यथाशक्ति शांतिं चरेदित्यपरे ॥ तत्रैव कस्मिन्नप्यशुभे वक्ष्यमाणा शांतिः कार्या ॥ द्विता
दशुभसन्निपाते तु तत्तद्विहित दृष्टाशुभनिरासार्थं वक्ष्यमाणाऽऽहुतिसंख्याद्विगुणा कार्या ॥ यथा
शक्तीत्यादि लेयं ॥ ॥ इति शुभाशुभविचारः ॥ ॥ अथ शांतिरुच्यते ॥ ॥ तत्र एवं विनाप्यकं प्रत्यग्रह्यं
त्सस्या अवश्यकर्तव्या केचिदिह च दैवविधानतः ॥ कर्मणो फलमाप्नोतीतिवचनाद्दैवं प्रकोप न कर्म ॥ अफलासि
द्धौ वि प्रार्थत्वेन ग्रहयत्तस्या अवश्यकर्तव्या केचिदिह च शौनकेन ॥ आर्तवानां तु नारीणां शांतिं वक्ष्या
मि शौनकः ॥ तु पक्रम्य ग्रहातिथ्यपुरःसरमिति प्रकरणे केशवश्य कर्त्वादिके देशकाले कर्तव्यकारणां राम०

चविशेषवचनाभावे तंत्रेणाकर्तव्यत्वात् ॥ अथ मखवपूर्वकस्तंत्रे गाणेशांतिकप्रयोग उच्यते ॥ रजोदर्शनानंतरं पं
चमादिदिने चंद्रताराद्यनुकूले शुभदिने शोभनतोपायत्यां पुत्रपतिः प्राङ्मुख उपविश्य प्राणानायम्य देश
कालौ स्मृत्वा मम पत्न्याः प्रथमरजोदर्शनेऽमुककदुष्टमासादिसूचितसमस्तारिष्टनिरासद्वारा श्रीपरमेश्व
रप्रीत्यर्थं सग्रहमखां शौनकोक्तां शांतिं करिष्ये इति संकल्प्य ॥ गणेशपूजनपुण्याहवाचनगौर्यादिषो
डशमातृकापूजनब्राह्म्यादि सप्तमातृकापूजनं नांदीश्राद्धं निष्कल्वो ॥ श्रामं दातं कुंडं विनेमंत्रतंत्र
तमाचार्यं ब्रह्माणं च वृत्वा पहैमौर्यमव्हे वट्टवरुं रोचा ॥ कृत्वि जौ हत्वा गंधादिना पूजयेत् ॥ ततआ
चार्यो गृहेशानदेशे शुचौ महीं चालि ॥ इति मंत्रावृत्या मध्ये दक्षिणोत्तरतः स्थंभ मिस्य स्यो ॥ आपधयः स
मिति द्रोणप्रमाणव्रीहिभिर्मध्ये दक्षिणोत्तरतः स्थपदेशे मंत्रावृत्या राशित्रयं कृत्वा ॥ तेनैव क्रमेण रा
शित्रयेन वमकाचेक मभग्नं कुंभत्रयं ॥ आकलशेषु इति मंत्रावृत्या स्थापयेत् ॥ एवं सर्वत्र मंत्रावृत्तिः ॥

57

प्र॰रत्नं
५८

प्रस्तु वर्च्चाप इति नव वर्चस्य स्वःकस्य सिंधुद्विपे त्रेयमे धान द्यो जगती ॥ कस्ते शोषं दकम् र शो विनियोगः ॥ पुंजमस्तु
वश्चापो महिमानमुत्तमं ॰ऋ॰ कू ए याः प्रवृत इत्यस्य वसिष्ठोन्यश्च शक्रीं ॥ विनियोगः प्रागवत् ॥ एवमग्रे
पितत्वत श्च विनियोगाः तेषु ॥ गंधद्वारा मिति त्रिष्टुपि गंधं प्रक्षिप्य ॥ पा ओषधी रिति सर्वौषधीः ॥ ओषधयः
समिति यवान्निक्षिपेत् ॥ ततो मन्त्र॰ कुंभे यव व्रीहि माषा तिलकं गुरुश्यामाकमुद्गान् द्विद्या ॥ गायत्र्या उ
दुंबर कुश दूर्वा रक्तोत्फल चंपक विल्व विष्णुक्रांता तुलसी बर्हिष दर्भ पुष्पी शतावरी अश्वगंधा निर्गु
डी रक्त पीत सर्षप अपामार्ग पलाश पनस जीवक प्रियंगु गोधूम व्रीहि ॥ अश्वत्थ दधित्थ दुग्ध दृ रक्तपत्र अपत्रं
नीलोत्पल सितरक्त पीत कुरंटक गुंजा वचा भद्र कमुस्त कास्यानि द्वात्रिंशदोषधानि सर्वाणि यथा सं
भवं वा निक्षिपेत् ॥ ततो विष्णुकलशे पुकांडात् इति द्वाभ्यां ॥ अश्वत्थेव इति पंचपल्लवान् ॥ गजाश्व स्थान
रथ्या वल्मीक संगम ह्रद गोष्ठ स्थान स्योना पृथिवीति द्वि द्वाभ्यां ॥ याः फलिनी रिति पुंगीफलानि ॥ स

एम॰
५८

हिरत्नानीति कनककुलीशनीलपद्मरागमौक्तिकानि पंचरत्नानि ॥ हिरण्यरूप इति हिरण्यं च दद्येत् ॥
युवा सुवासा इति सूत्रेण वाससा च कलशं कंठान्वेष्टयित्वा गंधाक्षतपुष्पमाल्यादिभिः कलशमभ्यर्च्ये
त् ॥ ततः कलशत्रयोपरि तेनैव क्रमेण सौवर्णराजतं कांस्यं ताम्रमयं वैणवं मृन्मयं वा यथाविभवं परितः पा
त्रत्रयं पूर्णपात्रं इति निधाय ॥ तदुपरिस्थितेषु वस्त्रेषु यन्त्रस्वचंदनादिनाष्टदलानि कुर्यात् ॥ तत्र मध्ये ॥ गाय
त्र्या विश्वामित्रो भुवनेश्वरी गायत्री ॥ भुवनेश्वर्यावाहनादौ विनियोगः ॥ ॐ तत्सवितुर्वरेण्यं० प्रचोद
यात् ॥ भुवनेश्वरीमावाहयामीति यथाशक्ति सुवर्णनिर्मितां भुवनेश्वरीप्रतिमामग्न्युत्तारणपूर्वकं स्था
पात ॥ तद्दक्षिणकुंभोपरि विष्णु ॥ इंद्राणी वृषाकपिर्ऋषिः इंद्राणी पंक्तिः ॥ इंद्राण्यावाहनादौ विनि० ॥ ॐ इंद्रा
णीमासु० इंद्र उत्तरः ॥ इंद्राणीमावाहयामीति तथैव सौवर्णमिंद्राणीप्रतिमां संस्थाप्य तत्कलशोपरि इं
द्र त्वा विश्वामित्र इंद्रो गायत्री ॥ इंद्रावाहनादौ वि० ॥ ॐ इंद्र त्वा वृषभं वयं० अधसः ॥ इंद्रमावाहयामीति

तथैव सौवर्णीं प्रतिमां स्थापयेत्॥ ततउक्तमंत्रैरुक्तक्रमेण देवतात्रयस्य कांडानुसमयेन षोडशो
पचारपूजां कुर्यात्॥ ततो मध्यकुंभे आचार्योष्टसहस्रमष्टशतं वा गायत्री जप्त्वाष्टोत्तरशतं जपेत्॥
हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य कर्दमानंदचिक्लीतेंदिरासुता ऋषयः॥ श्रीर्देवता आद्या
स्तिस्रोनुष्टुभः॥ ततएकाप्रस्तारपंक्तिः॥ ततो द्वे त्रिष्टुभौ॥ ततोष्टानुष्टुभोंत्याप्रस्तारपंक्तिः जपे वि०॥ ॐ
हिरण्यवर्णां हरिणीमित्यादि० ऋक् १५ ततएकोकालिकदक्षिणकुंभे रुद्रसूक्तानि जपेत्॥ यथा
॥ कद्रुद्रायेति नवर्चस्य घोरः काण्वो रुद्रो गायत्री॥ जपे वि० ॐ कद्रुद्राय प्रचेतसे० ऋक् ९ इमारुद्रा
यतवसे इत्येकादशर्चस्य सूक्तस्य कुत्सो रुद्रस्त्याद्यानव जगत्योंत्ये द्वे त्रिष्टुभौ जपे वि०॥ आते पितरि
ति पंचदशर्चस्य सूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप्॥ जपे वि० ॐ आते पितर्मरुतां सुम्नमेतु० ऋक् १५ इमा
रुद्राय स्थिरधन्वने इति चतसृणां वसिष्ठो रुद्रः आद्यास्तिस्रो जगत्योंत्या त्रिष्टुप्॥ जपे वि०॥ ॐ इमा रुद्रा

या॰ स्थिरधन्वने गि॰ इ॰ ० रु॰ कृ॰ ४ आवो राजानं वामदेवो रुद्र त्रिष्टुप् ॥ जपे वि॰ ॥ ॐ आवो राजानमध्वर
स्य रुद्रं ० रु॰ कृ॰ १ तमु ष्टुहि सोमो मैत्रावरुणि रुद्रो त्रिष्टुप् ॥ जपे वि॰ ॥ ॐ तमु ष्टुहि यः स्विषुः सुधन्वा ० रु॰ कृ॰ १ भु
वनस्य पितरं रुजिष्वा रुद्रो त्रिष्टुप् ॥ जपे विनियोगः ॥ ॐ भुवनस्य पितरं गीर्भिराभिः ० रु॰ कृ॰ १ अवकं रु
द्रो वसिष्ठो नुष्टुप् ॥ जपे वि॰ ॥ ॐ अव कं य नाम हे ० रु॰ कृ॰ १ अथान्यो रुद्रविधिरे । कुंभे एकादशाहुतिभी
रुद्रं जपेत् ॥ तत्रादौ न्यासान् कृत्वा रुद्रध्यानादि स्मरेत ॥ यथा ॥ नमकानां प्रथमानुवाके आद्याया कश्यपः
द्वितीयाया आत्रेयः तृतीयाः कश्यपस्ततो द्वयोर्गौतमः ततः एकस्याः कण्वस्ततो द्वयोर्भरद्वाजस्ततः एकस्या
भगवांस्ततस्तिसृणां नारदस्ततस्तिसृणां भगवान् ॥ द्वितीयानुवाकस्य मंडुकः तृतीयानुवाकस्य भ
गवान् चतुर्थानुवाकस्य दुर्वासाः पंचमषष्ठानुवाकयोर्भगवान् सप्तमानुवाकेस्य हेमकोशोऽष्टमानु
वाकस्य नवमानुवाके च नमो वः इति यावद्भगवान् अवशिष्टस्याग्निः दशमानुवाके प्रथमस्य पुलहो

॥ द्वितीयस्यत्र्यंबकंरुद्रस्ततोद्वयोर्मीढुष्टमस्ततएकस्यदेवाःस्ततएकस्यभगवांस्ततएकस्याग्निस्ततएकस्यवै
याम्यस्ततएकस्यभगवांस्ततएकस्यवैराजस्ततएकस्यपुलहस्ततएकस्यनारदस्ततएकादशानु
तुवाकेआद्यानांचतुर्णांरुद्रोवीसास्ततआसमाप्तिर्देवलरुद्रस्यपःप्रथमानुवाके आद्यस्यरुद्रस्ततएकस्य
शंभुस्ततस्तिसृणांरुद्रस्ततस्तिसृणांभगवांस्ततोद्वितीयतृतीयानुवाकयोरुद्रश्चतुर्थपंचमषष्ठानु
वाकानांशंभुःसप्तमानुवाकस्यरुद्रोऽष्टमानुवाकस्यनमोवःकिरिकेभ्यइत्यंतस्यनवमस्यभगवा
न्नवशिष्टस्यरुद्रोदशमानुवाकेचतुर्णांरुद्रस्ततएकस्यनेदीश्वरात्मारुद्रस्ततएकस्यभगवांस्ततए
कस्यशंभुस्ततएकस्यरुद्रस्ततएकस्यभगवांस्ततोद्वयोःशंभुस्ततोऽवशिष्टानांरुद्रइतिदेवताः॥प्र
थमानुवाके आद्येऽनुष्टुभौततएकस्त्रिराडनुष्टुप्ततएकानिचृदनुष्टुप्ततएका[illegible]ष्टुप्ततएका
निचृदनुष्टुप्ततएकाप्रस्तारपंक्तिःपंचपदावापंक्तिस्ततएकाषट्पदाजगतीततःसप्तानुष्टुभस्त

तोषा तु वा का य जूंषि ॥ ततः एका प्रस्तारपंक्तिः पंचपदार्थपंक्तिर्वा ततः एकानुष्टुप् ततस्त्वतस्त्रो जगत्यस्ततस्तिस्रो
त्रिष्टुभस्ततः एकं पंक्तिरिति षड्छंदांसि ॥ अथ चमकानामग्निः कानामग्निः कौण्ड ऋषिः अग्नावैष्णवी गायत्री
शिष्टानां नानार्षयो नानाछंदांसि विशेषाः देवताः यजुर्जपे विनियोगः ॥ एवं रुद्रं जप्त्वा शंन इंद्राग्नी इति सूक्तं जपे
त् ॥ शंन इति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप् ॥ जपे वि० ॥ ॐ शन्न इंद्राग्नी० ऋक् १५ ततः कुं
भपश्चिमदेशे स्थंडिलेऽग्निं प्रणीय तदीशान्यां वेद्यां नवग्रहादीस्तत्तन्मंत्रैरावाह्य षोडशोपचारैः संपूज्य
तदीशान्यां प्राग्वत्कुंभे संस्थाप्य तत्र वरुणमावाह्याग्निसमीपमेत्यान्वाधानं कुर्यात् तत्र घश्मा ॥ इध्मसमि
धावाद्याय देवतापरिग्रहार्थमन्वाधाने करिष्ये ऽस्मिन्नन्वाहितेऽग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा ॥
नवग्रहान्प्रत्येकममुकसंख्याभिः समिच्चर्वाज्याहुतिभिः ॥ सुवनेश्वरी प्रत्येकममुकसंख्याभिर्दूर्वाभिः ॥ तिल
मिश्रगोधूमपायसाज्याहुतिभिः इंद्राणीमिंद्रं च प्रत्येकममुकसंख्याभिर्दूर्वाभिस्तिलमिश्रगोधूमैमाय

60

प्र॰ग्र॰ल॰

६१

साज्याऽऽहुतिभिरित्युक्त्वा शेषेणा स्विष्टकृतमित्यादियस्य २ त्युक्त्वा जुहुयात् ॥ अन्ये तु गात्रेष्वेव तु होतव्यं हवि
र्न च तु ष्टयं ॥ ततः स्विष्टकृतं हुत्वेति ॥ शौनकेनेंद्राग्नी द्वयोर्होमानभिधानात्तयोर्होमो नास्तीत्याहुः ॥ तन्मते
त्वाधानाशैतत्कीर्तनाभावः ॥ आहुति संख्या वक्ष्यते ॥ ततः परिस्तरणादि पूर्णपात्रनिधानांतं कृत्वा ॥ भुवं ने
ष्वीमिंद्राग्नीद्रिभ्याः सुश्लोकेति चतुरो मुष्टीन्निरूप्याऽऽहुति वेद्यां स्वाहुतिनिरूप्य गोदुग्धे पायसं श्रपयि
त्वाऽन्यसंस्काराद्यान्यभागांतं कुर्यात् ॥ ततो यजमानो दक्षिणां उपविश्य होमार्थं चरुपात्रं च वरयेद् ऋत्विजो
वह्न्याः ॥ आचार्यादिजैः सहेति चार्याद्विजैः सहेति योक्ते राचार्यत्विजां होमावगमात्तेषां चास्तत्वेन त्यागा
योगात्तेस्व क्रियमाणो होमो यजमानेन मत्स्याहुतिः त्यागस्याऽशक्यत्वात् ॥ तदानीमेवांगप्रधानदेवता
उद्दिश्य एताभ्य इदं न ममेति त्यजेत् ॥ ततः आचार्यः सर्त्विक् नवग्रहेभ्यो घृतशताष्टाविंशत्य ष्टा
ऽन्यतमसंख्याकाघृताक्तान्यर्कादिसमिधस्तिलांश्चाहुतीश्च जुहोति ॥ अधिदेवताप्रत्यधिदेवताविनायकान ०

६१

कादिपंचलोकपालेभ्यस्तन्मूर्तेनसंख्ययाजुहुयात् ॥ ऐभ्यस्तत्पात्राश्यवःसमिधः ॥ ग्रहाणांयद्दाउच्छेत दा-
ऽन्येभ्यश्चततस्त्वरितसंप्रदायः ॥ ततो भुवनेश्वर्यै ॥ य आदधिमधुघृताक्ताभिस्तिलमिश्रैर्दूर्वाभिरेकाहुतिरिमे-
वमष्टसहस्रमष्टशतं वा हुत्वा आहुतीर्घृताक्तास्तिलमिश्रगोधूमा आहुतीः यायस्या आहुती घृताहुतीश्चजुहुया-
त् ॥ एवमिंद्राणीदुर्गयोः मा गुरुके मे त्रामयांक्रमेण होविष्णुरुद्रयोः प्रत्येकमष्टशतसंख्याभुवनेश्वर्या अष्ट-
सहस्रपक्षे तु जुहुयात् ॥ तस्या अष्टशतपक्षे तु तयोरष्टाविंशतिरितिसंप्रदायः ॥ यद्धे तुतच्छ्रेनहोमः
॥ ततः स्विष्टकृदादिप्रायश्चित्तहोमांतं कृत्वा इंद्रादिदिक्पालेभ्यो नवग्रहेभ्यो नवग्रहेभ्यो भुव-
नेश्वरीद्राणीदुर्गाभ्यः क्षेत्रपालाय च सदीपान्माषभक्तबलीन्स्वस्वमंत्रैर्दत्वा पूर्णाहुतिं समुद्राद्वर्मि रि-
तिऋचेन जुहुयात् ॥ समुद्रादूर्मिरित्यस्य गौतमो वामदेवो ऽग्निस्त्रिष्टुप् ॥ पूर्णाहुतिहोमे वि० ॥ ॐ समुद्रा-
दूर्मि० स्वाहा ॥ क ३ ततः प्रणीताविमोकं कृत्वा भुवनेश्वर्यादिकलशोदकं ग्रहकलशोदकं च पात्रांत-

रेगृह्णीत्वातेनतत्तस्थूयंचपद्मवैःसकुशद्वैर्धतनववस्त्रंयजमानं॥धृतनववस्त्रकंचुकीचतद्वामस्थांरुतु
मतींसरुत्विगुरुद्मुखआचार्योभिषिंचेदभिमंत्रैः॥आपोहिष्ठेतिनवर्चस्यांबरीषःसिंधुद्वीपआयोगायत्र्यो
त्येदेवअनुष्टुभोयंत्वमीवर्धमानासप्तमीप्रतिष्ठाअभिषेकेवि०॥ॐआपोहिष्ठा०रु०क०ए यएकइद्विदयत
इतिगोतमोराहूगणइंद्रउष्णिक्॥अभिषेकेवि०॥ॐयएकइद्विदयते०रु०क०१ विश्वेदेवेतिमस्यर्चस्य स्त्रस्य
वसिष्ठआद्यागोत्र्याणामग्निस्ततस्तुरणांविश्वेदेवाआद्यागायत्री।द्वितीयानुष्टुपततस्तिस्रोगायत्र्यांत्येद्वेअ
नुष्टुभौ॥अभिषेकेवि०॥ॐविभिस्त्वेदेवसवितः०रु०क०७ उभयंश्रृणवच्चनेतिभर्गइंद्रोबृहती॥अभिषेके
वि०॥ॐउभयंश्रृणवच्चनः०रु०क०१त्वमित्तिसप्रथाविशायमइंद्रोनुष्टुप्॥अभिषेकेवि०॥ॐत्वमित्तिदाविशस्यति०
रु०क०१ त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्॥अभिषेकेवि०॥ॐत्र्यंबकंयजामहे०रु०क०१ जातवेदकश्यपोदुर्गात्रि
ष्टुप्॥अभिषेकेवि०॥ॐजातवेदसे०रु०क०१समुद्रज्येष्ठाइतिचतुर्ऋचस्यवसिष्ठआपस्त्रिष्टुप्॥अभिषे

केवि०॥ ॐ समुद्रस्येषा:० ऋ०क० ४ त्रायंतामिति तिसृणां सप्तर्षय आपोनुष्टुप्॥ अभिषेके वि०॥ ॐ त्रायंता
मिह देवाः० ऋ०क० ३ इमा आप इति तिसृणां सप्तर्षय आपोनुष्टुप्॥ अभिषेके वि०॥ ॐ इमा आपः शिवतमाः०
ऋ०क० ३ देवस्यत्वेत्यापस्तंबशाखागतैस्त्रिभिर्मंत्रैः॥ तमीशानं जगतस्तस्थुष इति गोतम ईशानो जगती॥ अभिषेके वि०
॥ ॐ तमीशानं जगतस्तस्थुषस्पतिं० ऋ०क० १ त्वमग्ने रुद्र इत्यापस्तंबगतेनैकेन॥ ॐ त्वमग्ने रुद्रो असुरो मही
दिवः॥ त्वं शर्धो मारुतं पृक्ष ईशिषे॥ त्वं वातैररुणैर्यासि शंगयः॥ त्वं पूषा विधतः पासि नु त्मना॥ तमुष्टुही
त्यां गिरः सत्तिर श्री रुद्रस्त्रिष्टुप्॥ अभिषेके वि०॥ ॐ तमुष्टुहि यः स्विषुः सुधन्वा० ऋ०क० १ भुवनस्य पितरं ग
जिध्वा रुद्रस्त्रिष्टुप्॥ अभिषेके वि०॥ ॐ भुवनस्य पितरं गीर्भिराभिः० ऋ०क० १ या ते रुद्रेति कश्यपो रुद्रस्त्विराडनुष्टु
प्॥ अभिषेके वि० ॐ या ते रुद्र शिवा तनूरघोरापापकाशिनी॥ तया नस्तनुवा शंतमया गिरिशंताभिचाक
शीहि॥ यज्जाग्रत इति षण्णां शिवसंकल्पमंत्राणां प्रजापतिर्मनस्त्रिष्टुप्॥ अभिषेके वि०॥ ॐ यज्जाग्रतो दूरमु

प्र०रत्न०

६३

दैतुदैवंतदुसुप्तस्यतथैवैति॥दूरंगमंज्योतिषांज्योतिरेकंतन्मेमनःशिवसंकल्पमस्तु॥येनकर्माण्य
पसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः॥यदपूर्वंयक्षमंतःप्रजानांतन्मेमनः॥यत्प्रज्ञानमुतचेतो
धृतिश्चयज्ज्योतिरंतरमृतंप्रजासु॥यस्मान्नऋतेकिंचनकर्मक्रियतेतन्मेमनः०॥येनेदंभूतंभुवनंभविष्य
त्परिगृहीतममृतेनसर्वं॥येनयज्ञस्तायतेसप्तहोतातन्मेमनः०॥यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठिता
रथनाभाविवाराः॥यस्मिंश्चित्तंसर्वमोतंप्रजानांतन्मेमनः०सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभी
शुभिर्वाजिनइव॥हृत्प्रतिष्ठंयदजिरंयविष्ठंतन्मेमनः०ष्टुषाएतेमंत्राः॥इंद्रंत्वावृषभंवयमितिपंचानां
विश्वामित्रइंद्रोगायत्री॥अभिषेकेवि०॥ॐइंद्रंत्वावृषभंवयं०ऋक५ सुरास्त्वामभिषिंचंत्वितिनवभिःपौ
राणमंत्रैरभिषिंचेत्॥ततःकलशोदकेनान्येनचोदकेनस्नात्वातौदंपतीशुक्लवासोगंधमाल्यादिधृत्वा
प्रविशेतां॥ततःपत्नीदक्षिणतः॥ततोयजमानोऽग्निंसंसृज्यविभूतिंधृत्वाआचार्यादीन्गंधपुष्पवस्त्रालं

॥म०

६३

करणाद्दिक्षिणेयथाशक्ति परिकल्पयित्वाचार्याय धेनुं दक्षिणां दद्यात्॥ दक्षिणात्वेन चास्यानर्दक्षिणां तरं अब
स्था प्रसंसात्॥ ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा रुद्रजापिने महादक्षिणामनडुहं दक्षिणां दद्यात्॥ अत्र धे
नुं न्यायेनादक्षिणात्वे प्राप्ते महादक्षिणामनडुहं प्रदद्यात्॥ रुद्रजापिने इति प्रतिप्रसव करणात् महादक्षिणात्वं॥
ततोऽन्येभ्य ऋत्विग्भ्योऽन्येभ्यश्च ब्राह्मणेभ्यः भूयसीं दक्षिणां दद्यात्॥ ततो ग्रहपीठदेवतानां भुवनेश्वर्या
दीनां चोत्तर पूजां पंचोपचारैः संपूज्य क्षमाप्य॥ यांतु देवगणाः सर्वे पूजामादाय पार्थिवी
॥ इष्टकाम प्रसिद्ध्यर्थं पुनरागमनाय चेति विसृज्याचार्य हस्ते प्रतिपाद्याऽग्निं संपूज्य॥ गच्छ गच्छ सुरश्रे
ष्ठ स्वस्थाने परमेश्वर॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन इति विसर्जयेत्॥ ततो ब्राह्मणा महाशांति
पठेयुः॥ सायपा॥ आनोभद्रा इति दशानां गोतमो राहूगण ऋषि विश्वेदेवा आद्याः पंच जगत्यः षष्ठी विराट्स्थाना सप्त
मी जगती॥ तत्तस्तिस्त्रस्त्रीष्टुभः॥ ॐ आनोभद्राः० रु० के १० ॥ स्वस्ति नो मिमीतामिति पंचानां स्वस्त्यात्रेयो वि

63

प्र०रत्न०

६४

श्वेदेवा आप्याप्तिस्त्रिष्टुभस्ततोनुष्टुभौ ॥ शंनइंद्राग्नीइति पंचदशर्चानां वसिष्ठो । विश्वेदेवास्त्रिष्टुप् ॥ त्यमूषि
तिस्तृणीतार्क्ष्योऽरिष्टनेमिस्तार्क्ष्यस्त्रिष्टुप् अन्तछंदयोः शंयुर्विश्वेदेवाः शक्करी ॥ सर्वेषां शांतिपाठे वि० ॥ ततो यज
मानो नवग्रहप्रीत्यर्थं त्रीन्मुख्यनेष्व रौद्रायिंद्रप्रीतये च प्रत्येकं त्रीन्स्त्रीन्वा ब्राह्मणान्भोजयित्वा संकल्प्य
वा विप्राशिषो गृहीत्वा सुहृद्युतो भुंजीत ॥ एवं कृते सर्वारिष्टशांतिर्भवति ॥ ॥ ततः शुभकाले गर्भाधा
नं कुर्यात् ॥ ॥ इति दुष्टरजोदर्शने शांतिः ॥ ॥ अथ चंद्रसूर्योपरागकाले प्रथमरजोदर्शने शांतिवि
शेष उच्यते ॥ स चोपरागस्य पौर्णमास्यमावास्याभ्यामविनाभावात् ॥ तदतिरिक्तवारादिवत् २ प्रागुक्त
शांत्या सह नीयते निमित्तभेदात् ॥ अदृष्टार्थत्वाच्च ॥ प्रत्यक्षविघ्नाभावे तत्कार्यकारित्वानवगमेन म
नहोमैर्नारिष्टहोमानामभिधानयाता अविरुद्धसमयोगात् ॥ ग्रहणमात्रे त्वियमेव ॥ अत्र च पुनः श्रवणाभावान्न
वग्रहमखः कृताकृत इति विवेकः ॥ तत्र केवलायाः प्रयोगः ॥ पूर्वोक्तकाले सस्त्रीकः शुचिः स्नात्वा पवित्र

राम०

६४

प्राङ्मुखउपविश्य प्राणानायम्य देशकालौ स्मृत्वा मम पत्न्याश्च ग्रहोपरागे प्रथमरजोदर्शनसूचितारिष्ट
निरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिं करिष्ये संकल्प्य॥ प्राग्वदाचार्यर्त्विक्पूजां कुर्यात्॥ तत्र ग्रह
पक्षे सनवग्रहमखोमिति॥ सूर्योपरागे तु॥ सूर्योपरागे प्रथमेत्यादि वदेत्॥ तत आचार्यः शुचिदेशे गोम
मयेनोपलिप्य तत्र पंचवर्णरजोभिरष्टदलं पद्मं कृत्वा तदुपरि नवं श्वेतवस्त्रमुदग्दशं संस्थाप्य यथाश
क्तिरजतनिर्मितां चंद्रप्रतिमां॥ आप्यायस्व गोतमः सोमो गायत्री॥ चंद्रावाहने वि०॥ आप्यायस्व० ऋ० कु०॥ चं
द्रमावाहयामीति स्थापयेत्॥ सूर्यग्रहे तु यथाशक्ति सुवर्णनिर्मितां॥ आकृष्णेन हिरण्यस्तूपः सवि
ता त्रिष्टुप्॥ सूर्यावाहने वि०॥ ॐ आकृष्णेन रजसा० ऋ० कु० १ सूर्यमावाहयामीति स्थापयेत्॥ तातय
थाशक्ति सीसनिर्मितां राहुप्रतिमां॥ स्वर्भानोरत्रिः राहुरनुष्टुप्॥ राह्वावाहने वि०॥ ॐ स्वर्भानोरध यदिं
द्र० ऋ० कृ० १ राहुमावाहयामीति तदुत्तरतः स्थापयेत्॥ ततो यस्मिन्नक्षत्रे ग्रहणं तन्नक्षत्रदेवताप्रतिमां य

६५

याशक्ति सुवर्णनिर्मितां तत्तन्मंत्रैर्नाममंत्रैर्वा ॥ ॐ अश्विनावावाहयामि नम इति प्रणवादिनमोंतैः स्थापयेत् ॥ मंत्रास्त्वापस्तंबानामष्टौ वाक्यानीति प्रसिद्धाः ॥ नामानि तु ॥ अश्विनौ १ यमः २ अग्निः ३ प्रजापतिः ४ सोम ५ रुद्रः ६ अदितिः ७ बृहस्पतिः ८ सर्पाः ९ पितरः १० भगः ११ अर्यमा १२ सविता १३ त्वष्टा १४ वायुः १५ इंद्राग्नी १६ मित्रः १७ इंद्रः १८ निर्ऋतिः १९ आपः २० विश्वेदेवाः २१ विष्णुः २२ वसवः २३ वरुणाः २४ अजैकपात् २५ अहिर्बुध्न्यः २६ पूषेति २७ एवं देवतात्रयमावतात्रयमावह्येभिरेव मंत्रैः ॥ कांडानुसमयेन षोडशोपचारैः पूजयेत् ॥ तत्र चंद्रस्य हेचंद्रायस्वेतानि वस्त्रगंधाक्षतमाल्यानि देयानि ॥ सूर्यस्य हेतु सूर्याय रक्तवस्त्र रक्तचंदनतद्रक्ताक्षतकरवीरपुष्पाणि देयानि ॥ राहवे कृष्णानि ॥ नक्षत्रेभ्यः श्वेतानि ॥ ततः पश्चिमतोऽग्निं प्रतिष्ठाप्य ॥ पक्षे नवग्रहान्स्थापनपूर्वं संपूज्यान्वाधानं कुर्यात् ॥ यथा ॥ देवसमिधो गृहीत्वा चक्षुषी आज्येनेत्यंतमुक्त्वा ॥ पक्षे पूर्ववन्नवग्रहानुद्दिश्याष्ट

शताष्टाविंशत्यन्यतमसंख्यामुद्दिश्य चंद्रममुकसंख्याभीः पलाशसमिदाज्यचरुतिलाऊतिभिः॥ राहुममुकसं
ख्याभिः दूर्वाज्यचरुतिलाऊतिभिः नक्षत्रदेवताममुकसंख्यपलाशसमिदाज्यचरुतिलाऊतिभिर्यक्ष्ये शेषेणे
ष्टाघृत्कां जुहुयात॥ सूर्यग्रहे चंद्रस्थाने सूर्यममुकसंख्योऽर्कसमिदाज्यचरुतिलाऊतिभिरितिवदेत्॥ ए
वमन्वाधाय प्रणीताप्रणयनांतं कृत्वा त्रिभ्यो मुष्टिभ्यो त्वेति चतुरश्चतुरो मुष्टीन्निरूप्य चरुं श्रपयित्वाऽन्यभा
गांतं कुर्यात्॥ ततो यजमानोर्हिणो देवता उद्दिश्य त्यजेत्॥ ततोन्वाधानक्रमेण जुहुयात्॥ तत्र तिसृ
णां दूर्वाणामेकैकाऊतिः॥ समिधश्च त्रिमध्वक्ताः कार्याः॥ ततः स्विष्टकृदादि पूर्णाहुत्यंतं प्राग्वत्॥ ततआ
चार्य एकस्मिन्कलशे जलपूर्णे पंचगव्यानि पंचरत्नानि वटाश्वत्थोदुंबराम्रबिल्वानां त्वचः पंचपल्लवान्स
र्वौषधिकल्कं दूर्वांकुरांश्च निक्षिप्य सरुत्विक्क दंपती पूर्ववदभिषिंचेदेभिर्मंत्रैः॥ आपो हि ष्ठेति तृचस्य सां
बरीषः॥ सिंधुद्वीप आपोगाय आपोगायत्री॥ अभिषेके वि०॥ ॐ आपो हि ष्ठा० ऋक् ३ इमं मे गंगे० इमं मे गंगे सिंधुक्षि

त्रैयमेघ आयोलगः ती॥ अभिषेके वि०॥ ॐ इमं मे गंगे० ऋ० १ तत्वा यामि शुनःशेपो वरुणस्त्रिष्टुप्॥ अभि
षेके वि०॥ ॐ तत्वा यामि ब्रह्मणा० ऋ० १ अन्येपि समुद्रज्येष्ठा इत्यादयः सुशस्त्वा मित्यादयः पौराणाश्च॥ त
तः स्नान दक्षिणा दान प्रतिमा प्रतिपादनादि पूर्ववत्॥ यदा तु पूर्वशांति समुच्चयस्तदा कालैक्यात्कर्तैक्या
च्चाग्नेयादिवत्तंत्र प्रयोगः॥ तत्र यजमानो देशकालौ स्मृत्वा मम अस्याः पत्न्याः प्रथमरजोदर्शने अमुक
दुष्टमास तिथ्यादि अमुक ग्रहण सूचितता दिसंकल्प्य ऋत्विक्पूजांते विदध्यात्॥ तत्र आचार्यो भु
वनेश्वर्यादिपूजांते प्राक्पश्चाद्वा॥ अन्यत्सर्वं समानं॥ ॥इति ग्रहणरजोदर्शनशांतिः॥ ॥इति प्रयो
गरत्ने दुष्टरजोदर्शनशांतिः समाप्तः॥ ॥अथ गर्भालंभनाख्यं गर्भाधानं॥ ॥रजोदर्शनात्षोडश
होरात्राणि ऋतुस्तन्मध्ये आद्यं रात्रिचतुष्कपर्वादिनिषिद्धदिनानि च वर्जयित्वा॥ मघा मूलादिव्यतिरि
क्तेदैवहीनेशुभे काले दंपत्योश्चंद्रानुकूल्ये गर्भाधानं कार्यं॥ तत्रापि युग्मासु रात्रिषु पुत्राः॥ अयु

ग्मास्तु कन्या जायंते इत्यादि स्त्रियं ॥ तत्रायं क्रमः ॥ कर्त्ता प्रातरभ्यंगस्नानं कृत्वा पत्नीमपि नवोदकुंभ
सलिलैः सप्तमृत्तिकापंचपल्लवपंचवल्कसहितैः स्नापयित्वा तया सह मंगलवस्त्राभरणादि धृत्वा
ऽऽचम्य स्वस्तिवाचनाभ्युदयिके कृत्वौपासनाग्निं मारुतसंज्ञं प्रतिष्ठाप्य देशकालौ स्मृत्वा अस्या
मम भार्यायाः प्रतिगर्भसंस्कारातिशयद्वाराऽस्यां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनि
र्हरणद्वारा च श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्माहं करिष्ये ॥ समिद्द्वयमादाय गर्भाधानं कर्तुं प्राजा
पत्यहोमं करिष्ये तत्र देवतापरिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रजापतिं चरुणा विहंतु दे
ष्ट्वा शेषमाज्येन प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्य इत्यंतमुक्त्वा समिद्द्वयमन्वा
धाय परिसमूहनादि पूर्णपात्रनिधानांते कृत्वा प्रजापतये त्वा जुष्टं निर्वपामीत्यादि भागांते कृ
त्वाऽवदानधर्मेण वदाय प्रजापतये स्वाहेति चरुहोमं काऊ. तां मु प्रजापतय इदं न ममेति त्यक्त्वा ॥ वि

प्र०रत्न०

६७

ष्णुर्योनिमितितिसृणां त्वष्टा विष्णुरनुष्टुप् ॥ गर्भाधानप्रधानप्रधानाज्यहोमे वि० ॥ ॐ विष्णुर्योनिं कल्प
तु० रू० क्रू ३ विष्णुवरं इमिमित्यागः ॥ नेजमेषेतितिसृणां त्वष्टा विष्णुरनुष्टुप् ॥ गर्भा० विनियोगः प्राग्व
त् ॥ ॐ नेजमेष परापत० रू० क्रू ३ विष्णुवरं इदं न ममेति त्यागः ॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥
विनियोगः प्राग्वत् ॥ ॐ प्रजापते न त्वदेतान्यन्यः० रू० क्रू १ प्रजापतये इदं० ॥ एवं समाहुतीर्हुत्वा ॥ अथ प
नः शोशुचदघामिष्टस्य चेत्स्य सूक्तस्य कुत्सोऽग्निर्गायत्री ॥ पत्न्या मूर्ध्नाभिमर्शने वि० ॥ ॐ अप नः शो
शुचदघं० रू० क्रू ८ याः फलिनीरित्यस्याथर्वणो भिषगोषधयोऽनुष्टुप् ॥ जपे वि० ॥ ॐ याः फलिनीर्या
अफलाः० रू० क्रू १ एतां जपित्वा ॥ वधेन दस्युमिति पर्णा वत्सुश्रुतोऽग्निस्त्रिष्टुप् ॥ अग्न्युपस्थाने वि
० ॥ ॐ वधेन दस्युं प्र हि चातयस्व० रू० क्रू ६ अग्निस्तुविश्रवस्तममिति ॥ द्वयोर्वसूयवोऽग्निरनुष्टुप् ॥
अग्न्युपस्थाने वि० ॥ ॐ अग्निस्तुविश्रवस्तमं० रू० क्रू २ इत्याभिरग्निमुपस्थाय स्विष्टकृतो॰ हो

राम०

६७

मशेषं समाप्य ॥ सूर्यो नो दिवस्पात्विति पंचर्चस्य सूक्तस्य चक्षुः सूर्यो गायत्री ॥ सूर्योपस्थाने वि० ॥ ॐ
सूर्यो नो दिवस्पातु० ऋ० क्र० ५ अनेन सपत्नीकः सूर्यमुपस्थाय ब्राह्मणान्भोजयित्वा तेभ्यः स्वस्त्ययनमेवमा
शिषो गृहीत्वा भुंजीत ॥ ततः सायंकालीननित्यकर्म कृत्वा भोक्तुं क्रांबरानुलेपनमाल्याभरणादिभिर
लंकृतो स्वलंकृते सुधूपितं गंधमाल्यामलदीपयुक्तं गृहं प्रविश्य सूर्यासावित्रि शेतां ॥ ततो भर्त्ता अभ
गनं जेतु विवर्त्तितं सुसुखस्पर्शं वितानोपरिमंडितं पर्यंकमारुह्य प्राग्गुक्तशोभनेमुहूर्ते स्त्रियमारोप्याऽ
श्वगंधाकल्कं दूर्वाकल्कं वा सूक्ष्मवस्त्रे निक्षिप्य ॥ उदीर्ष्वातिद्वयोः सूर्यासावित्री सूर्यासावित्री आ
घाविष्टुबंत्यानुष्टुप् ॥ भार्याया दक्षिणनासापुटेऽश्वगंधारससेचने वि० ॥ ॐ उदीर्ष्वातः पतिवतीवती
ह्येष ३ घा० ऋ० क्र० २ स्वजनस्वाहेति ॥ वामभागोपविष्टाया भार्याया दक्षिणनासाविवरेऽश्वगंधादिरसं सिंचेत्ता
तद्रसे उदरं गते तामाचमय्योपवेशयेत् ॥ दक्षिणनोच्छिष्टानसंदत्त्वैवास्त्विष्टकृदादि होममशेषं समापयेदिति ॥

उपगमने चायं क्रमः ॥ ॐ गंधर्वेस्य विश्वावसो मुखमसीति मंत्रे रां हो मो त्क रूष्मादिभिर्विष्णुर्योनिमिति गी
स्तृभिने लमेषेति च तिसृभिर्हिरण्यी गुल्मीभिर्योनिमभिमृश्य ॥ तां पूषन्त्रिस्यस्य सूर्या सावित्री त्रिष्टुप् ॥
जपे वि० ॥ ॐ तां पूषञ्छिवतमामेरयस्व० रु० सू० १ यो गर्भमोषधीनामित्यस्य वसिष्ठः पर्जन्यो गायत्री
॥ जपे वि० ॥ ॐ यो गर्भमोषधीनां० रु० सू० १ अहं गर्भं प्रजावान्प्राजापत्यो गर्भ इंद्रो वा त्रिष्टुप् ॥ जपे
वि० ॥ ॐ अहं गर्भमदधां० रु० सू० ११ इति त्रीन्मंत्राञ्जपित्वा सह कुदुपगच्छेत् ॥ ततः प्राणोतेरे तो दधाम्य
सावित्यनुमंत्रयेत् यथाग्निरग्निना गर्भी यथा द्यौरिंद्रेण गर्भिणी ॥ वायुर्यथा दिशां गर्भ एवं ते गर्भं द
धाम्यसाविति त्वी हृदयमभिमृश्य चामेतं ॥ मंत्रद्वये पित्र्य सावितस्य स्थाने प्रथमैकवचनांतं स्त्र
नाम वदेत् ॥ अस्मिन्कर्मणि शातं ब्राह्मणा भोज्या अशक्तौ दश वा ॥ ॥ यदि प्रथमरजोदर्शनं दुष्ट
ति थि वारनक्षत्रादिषु जायते तदा दोषपरिहाराय शौनकोक्तां शांतिं कृत्वा प्रशस्ततिथ्यादिषु ॥ गाम०

दर्शनपर्यंतंतस्यागमनंवर्ज्यं॥ तदाहज्योतिर्वसिष्ठः॥ प्रभूतदोषेयदिदृश्यतेतत्तुष्यंततः शांतिककर्मेका
र्यं॥ विसर्जयेद्देवतदेकशय्यांयावद्द्वौदर्शनमिष्टकालेइति॥ एतत्कर्माकरणेप्रायश्चित्तमाहाकार्यं॥ वि
सर्जयेद्देवतदेकशय्यांयावद्द्वौदर्शनमिष्टकालेइति॥ एतत्कर्माकरणेप्रायश्चित्तमाहाकार्यं॥ गर्भाधा
नस्याकरणात्तस्माजातस्तुदुष्यति॥ गर्भाधानस्याजातस्तुदुष्यति॥ अकृत्वागांद्विजेदत्वाकुर्यात्सुसव
नंयतिमिति॥ ॥इतिभट्टरामेश्वरसुतनारायणभट्टकृतेप्रयोगरत्नेगर्भाधानप्रयोगः॥ ॥अथपुंस
वनानवलोभनयोगः॥ ॥गर्भमासप्रभृतितृतीयमासेगर्भाभिव्यक्तेतदनभिव्यक्तौतुचतुर्थेषष्ठ
ष्ठमेवामासिअरिक्तादितिथौपुष्यादिपुंनक्षत्रेषुकसोमबुधगुरुवारेषुविष्टयादिदोषरहितेदैव
ज्ञोक्तेकालेपुंसवनानवलोभनेकुर्यात्॥ अत्रनियतकालत्वात्गुरुशुक्रास्तवाल्यवार्धक्यमलमा
सादिष्वपिनदोषः॥ दोषरहितकालालाभे॥ तद्रहितविहितकालालाभेतुशुक्रास्तादौनकार्यमि

प्र०रत्न०
१२९

मंतरिने वा कार्यं ॥ एते कर्मण्यमालापतिः एवं घः पुंसवनार्थं समानवत्सायां गोस्तरलाभेऽन्यस्य वाकूरं
दत्तं यं पुष्टं माषयवद्वौ कैयवत्रपंच संपा घह्नो कामविरलच्छावकोशं गृहेकदेशं कृत्वा विधिवत्स्वस्ति
वाचनग्रहयज्ञाभ्युदयिकानि कृत्वा गर्भासिद्ध्यविरोधि हविष्यान्नक्ते केभक्तो भार्यां कृत्वा ब्रह्मचारी
सन्यरेच्छ रेत्तु कूलकाले कालेमंगलस्नातो परिहितो नाहतवासः संप्रावृतमावरणीयां भर्तृ पराभूषितलोभ्य
यं पूर्वं कृतदेशे स्वदक्षे गात्रउपवेश्यस तैर्वा कृतस्वस्तिवाचनादि देशकालोस्मरत्वाऽस्यां भार्यायां
मुत्पत्स्यमानस्य गर्भस्य बीजिक गार्भिक दोष परिहार पुरूपतालालनोदय प्रतिरोधि परिहार द्वारा श्रीप
रमेश्वरप्रीत्यर्थं पुंसवनमनवलोभनं च तंत्रेण करिष्ये र गति संकल्प्य ॥ विधिवत्कौतुकसूत्रमाव
ध्या विधिवद्दीपासनाग्निं प्रवमानसंतं प्रतिष्ठाप्याऽ घक्रियमाणो पुंसवनाऽनवलोभनहोमे देवता
परिग्रहार्थमन्वाधाने करिष्ये अस्मिन्नन्वाहितेग्ना वित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रजाप

राम०
१२९

णि चरुद्रव्ये राशेषेण ॥ स्विष्टकृतमित्यायुक्ताऽन्वाधाय यदस्य मूर्हनादि प्रणीताप्रणयनांतं कृत्वा
॥ प्रजापतये त्वा जुष्टं निर्वपामीति चतुरो व्रीहिमुष्टीन् निरूप्य प्रोक्षणावघातादि बर्हिः पिंडविरासाद
नांतं कृत्वा ॥ स्थंडिले ग्नेः प्रत्यग्ग्रीवमुत्तरलोमानडुहं चर्मास्तीर्याऽस्यां नमग्निं चांतराधृत्वा लोमाचो
त सलिलामानीय चर्मरापुपवेश्यत यान्वारब्धे हुत्वा धानादाद्यन्मभागां तं कृत्वा प्रक्षालिते प्रस्ती
कृते दक्षिणे पाणौ प्रसृतिमितं तंऊ दधिनि क्षिप्य तदुपरि हिं गवयवं तत्पार्श्वयो रंड द्वयवन्माषं
य च निधाय ॥ किं पिबसीति त्रिःपृच्छेत् ॥ सा च पुंसवनमिति त्रिरुक्त्वा सयवमाषतद्दधि निःशेषं पीत्वा
जलमाचम्य पुनरेवं विधः प्रश्नप्रतिवचनपूर्वकं प्राशयाचामेत् ॥ ॥ एतत्पुंसवनं ॥ ॥ अनवलोभनं तु दूर्वा
कन्यया दृषदुपले पेषयित्वा पिंडीकृत्य शुद्धवसनांचले संगृह्य प्रोष्ठ्यजावदाऽरव्यं नीवपत्रसंतेवस
कंत पित्वा मंडपाग्नेर छायायामुपविष्टायाः प्रोज्झ्य रम्याः पश्चिमतस्तिष्ठन्तीत स्तदाननमुत्तमप्पदक्षिणा

प्र०२ल०

७०

नासाबिले दक्षिणेंगुष्ठाग्रेण दूर्वारसमासिंचेत्॥ तत्र प्रजावद्दाणरवंबेप्राजापत्यसूक्तं॥ आ ते गर्भो योनिमैतु पुमान्बा
णइवेषुधिं॥ आ वीरो जायतां पुत्रस्ते दशमास्यः॥ करोमि ते प्राजापत्यमा गर्भो योनिमैतु ते॥ अनूनः पूर्णो जाय
तामश्लोणोपिशाचधीतः॥ पुमांस्ते पुत्रो नारि तं पुमाननुजायतां॥ तानि भद्राणि बीजान्यृषभा जनयंतु नौ
॥ यानि भद्राणि बीजान्यृषभा जनयंति नः॥ तैस्त्वं पुत्रान्विंदस्व सा प्रसूर्धेनुका भव॥ कामः समृध्यतां मह्यम
पराजितमेव मे॥ यंकामं कामये देव तं मे वायो समर्द्धय॥ ॥ अथ जीवपुत्राख्यं सूक्तं॥ ॥ अग्निरेतु प्र
थमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात्॥ तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात्॥
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः॥ अशून्योपस्थाजीवतामस्तु माता पौत्रमानंदमभिप्रबु
ध्यतामियं॥ मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशंतु॥ मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी प
तिलोके विराज पश्यंती प्रजां सुमनस्यमाना॥ अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाघं शीर्ष्णः स्रजमिवोन्मु

राम०

७०

च्याद्विषश्च्यः प्रति मुंचामि पाशं ॥ देवकृतं ब्राह्मणा कल्प्यमानं तेन हन्मि योनिषदः पिशाचान् ॥ क्रव्यादो मृत्यून
धरान्यातयामि दीर्घमायुस्तव जीवंतु पुत्राः ॥ एतैर्दशभिर्मंत्रैर्नेष्यद्धृते आचांत जलस्याप त्न्याः स्थ॥ः प्राजापत्य
चरुमवदानधर्मेणावदाय ॥ ॐ प्रजापतये स्वाहेत्येकाहुतीः हुत्वा ॥ यत्ते सुसीम इति मंत्रेणाज्य त्न्या हृदयदेशं पा
णिनास्पृशेत् ॥ यत्ते सुशीम इति मंत्रस्य हिरण्यगर्भः प्रजापतिरनुष्टुप् ॥ भार्याया हृदयालंभने वि० ॥ ॐ यत्ते सु
शीमे हृदये हितमंतः प्रजापतौ ॥ मन्ये हं मां तद्विद्वांसं माहं पौत्रमघं नियां ॥ ततः स्विष्टकृदादि होमशेषं समाप्य श
तं ब्राह्मणान्भोज्याः ॥ इदं कर्म गर्भसंस्कारत्वात्प्रतिगर्भं कार्यं ॥ प्रथमगर्भ एवेति केचित् ॥ अस्य कर्तोपतिस्तद
संभवे देवरो वा ॥ ॥ इति प्रयोगरत्ने पुंसवनानवलोभने ॥ ॥ अथ सीमंतोन्नयनं ॥ ॥ तच्च गर्भमासापेक्षया
चतुर्थे षष्ठे वा मासि अष्टमे वा यावत्प्रसवं ॥ श्रुत्युत्तपौष्णे पुनर्वसु पुष्याभिजिद्धस्तप्रोष्ठपदानुराधाश्विनीमृ
गश्रवणरेवतीरोहिणीमृगशिरः संज्ञकानां पुंनक्षत्राणां चतुर्दशीविभक्तानां मध्यमपादद्वये षष्ठ्यष्टमीद्वा

दशीचतुर्थीनवमीचतुर्दश्यमावास्याव्यतिरिक्ततिथौसोमबुधबृहस्पतिशुक्रवारेषुचंद्रानुकूल्येविष्ट्यादि
दोषाभावेशुभलग्नादौकार्यं॥अत्राप्यधिकमासगुरुशुक्रास्तादीनांनदोषकालांतरासंभवेपूर्ववन्नियतका
लत्वात्॥ ॥अथप्रयोगः॥ ॥सीमंतकर्मकरिष्यन्पतिःशलद्रुहमजिनमपक्वैकफलगुच्छयुतावुदुंबरस्तब
कौतदलाभेऽन्यस्तबकोवात्रिःशुक्लकवर्णाशपिंजूलानिचसंपाद्यपुण्याहवाचनान्तेहयंत्राभ्युदयिकानित
द्धहरेवानुष्ठायमंगलस्नातांपरिहितप्राह्णाहतवासोयुगलामलंकृतांपत्नींस्वदक्षिणतउपवेश्यदेशका
लौस्मृत्वातनुरुधिरप्रियालक्ष्मीभूतराक्षसीगणदूरनिरसनक्षमसकलसौभाग्यनिदानभूतमहालक्ष्मी
समावेशनद्वाराप्रतिगर्भबीजगर्भसमुद्भवैनोनिबर्हणजननकांतिक्षजनभूतमहालक्ष्मीशयद्वाराचश्रीप
रमेश्वरप्रीत्यर्थंस्त्रीसंस्काररूपंसीमंतोन्नयनाख्यंकर्मकरिष्यइतिसंकल्प्य॥वद्धकृतकौतुकबंधामर्चि
तेष्टदेवतांकल्याणशुभेयुमुहूर्तेऔपासनाग्नौमंगलनामानंविधिवत्प्रतिष्ठाप्यसमिध्यसमिद्द्वयमादायपुनः

देशकालौ निर्दिश्याघकरिष्यमाणोसीमंतोन्नयनहोमे देवतापरिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा
धातारं॰ धातारं॰ राकां॰ राकां॰ विष्णुं॰ विष्णुं॰ विष्णुं॰ प्रजापतिं चैताः प्रधानदेवता आज्येन शेषेण स्विष्टकृतमि
त्यादि पूर्ववदुक्त्वा ॥ अग्न्यायाधायपरिसमूहनादि कृत्वा प्रत्यगग्नेः स्वस्य दक्षिणतः प्राग्ग्रीवमुत्तरलोम कमान
डुहमजिनमास्तीर्य तदग्रेग्रे दर्भेषु प्रोक्षणीक्षेपौ प्रणीताऽऽज्यपात्रे इध्माबर्हिषी चक्रमासादय पवित्रकरणाद्या
ज्यसंस्कारांते कृते तस्मिन्नग्निनेता माच्चौतोरस्कां प्राङ्मुखीं पत्नीमुपवेश्य पतयान्वारब्ध इध्माधानाद्याज्यभा
गांतं कर्म कृत्वा ॥ धातादिदातु दाशुष इति मंत्रद्वयस्य हिरण्यगर्भो धातानुष्टुप् द्वितीया त्रिष्टुप् सीमंतोन्नयनप्रधा
नाज्यहोमे वि॰ ॥ ॐ धातादिदातु दाशुषे प्राचीं जीवातुमक्षितां ॥ वयं देवस्य धीमहि सुमतिं वाजिनीवतः स्वाहा ॥ धा
त्र इदं॰ ॥ ॐ धाता प्रजानामुत राय ईशे धातेदं विश्वं भुवनं जजान ॥ धाता कृष्टीरनिमिषाभिचष्टे धात्र इद्धव्यं घृत
वज्जुहोत स्वाहा ॥ धात्र इदं॰ ॥ राकामहमिति द्वयोर्गृत्समदो राका जगती ॥ विनियोगः प्राग्वत् ॥ ॐ राकामहं सु

प्र०र०लं०
७२

हवां सुहुतीऽऊ चे०मु क्थ्यं स्वाहा ॥ राकायाइदं० ॥ ॐ यास्तेराकेसुमतयः० ॥२ रराणा स्वाहा ॥ राकायाइदं० ॥ नेजमेष
त्यादिमंत्रत्रयस्य हिरण्यगर्भो विष्णुरनुष्टुप् ॥ विनियोगः प्राग्वत् ॥ ॐ नेजमेषपरापत० ऋक् ३ प्रजापते हिरण्य
गर्भः प्रजापतिस्त्रिष्टुप् ॥ विनियोगः प्राग्वत् ॥ ॐ प्रजापते न त्वदेतान्यन्यः० ऋक् १ प्रजापतय इदं० ॥ एवमष्टा
वाज्याहुतीः कृत्वेशानकुंडलापत्न्योः पश्चिमतः प्राङ्मुखस्थितपत्न्याः फलयुग्मान्वितमौदुंबरस्तबकद्वयं त्रिःशुक्ला
शलली लक्ष्मशंकुस्त्रयं चैकीकृत्य ताः सीमान्तमूहीत्वा तन्मूलेन पत्न्याः केशान् ललाटयोः संधिमारभ्या मूर्ध्नि प्रदे
शात् ॥ ॐ भूर्भुवः स्वरोमिति मंत्रेण त्रिः सीमन्तमुन्नयनं मंत्रमावर्त्तयन्सीमंतमुन्नयेत् ॥ ॐ भूर्भुवः स्वरो
मिति मंत्रस्य प्रजापतिः प्रजापतिर्बृहती ॥ सीमंतव्यूहने वि० ॥ ततो यथाचारं सगोधमामोदुंबरमालां तत्कंठे नि
धाय वीणागाथिनौ द्विजौ सोमं राजानं संगायेतामिति प्रेशयेत् ॥ तौ च ॥ ॐ सोमो नो राजावतु मानुषीः प्रजा
निविष्टचक्रासावितिमंत्रे असाविति स्थाने गंगे इत्यादि समीपस्थनद्याः संबुद्ध्यंतं नाम निर्दिश्य तौ वीणा

एम०
७२

यागायेतां सामगानां पारिहाले मंत्रमात्रं त्रिः पठेतां ॥ ततः स्विष्टकृदादिहोमशेषं समाप्य ब्रह्मणे गोवृषभं दक्षि
णां तदभावेऽन्यस्मै विदुषे ब्राह्मणाय दत्वा पतिपुत्रवतीभिर्वृद्धाभिः रूपादिष्टं मंगलाचारं कारयेत् ॥ शतं ब्राह्म
णा भोज्याः ॥ इदं कर्म गर्भे वकार्यं ॥ इदं च प्रतिगर्भं नावर्त्तते ॥ तथा च हारीतः ॥ सकृत्तु कृतसंस्काराः सीमंते
न द्विजातयः ॥ यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेत् ॥ कारिकापि ॥ नावर्त्तते तदिदं कर्म प्रतिगर्भमिति स्थि
तिरिति ॥ अकृतसीमंतायाः प्रसवे विशेषः सत्यव्रतेनोक्तः ॥ स्त्री यद्यकृतसीमंता प्रसूयेत कथंचन ॥ पुत्रं गृ
हीत्वा विधिवत्पुनः संस्कारमर्हतीति ॥ ॥ इति सीमंतोन्नयनप्रयोगः ॥ ॥ अथ विष्णुबलिः ॥ ॥ गर्भा
र्भाष्टमे मासे पूर्वेद्युर्दंपती स्नातौ धृताहतवाससावलंकृतौ भवेतां ॥ ततः पतिः प्राङ्मुखवदाभ्युदयिकं पु
ण्याहवाचनं च कृत्वा तदहरेव वा इदं कृत्वा देशकालौ स्मृत्वायुर्विपाप मम पत्न्याः गर्भस्य निर्बाधपरिपो
षणपूर्वकसुखप्रसूतिसिध्यर्थं गर्भाधिदेवताविष्णुप्रीतिकामो हं विष्णुबलिहोमदेवतापरिग्रहनो

प्र० रत्न०

७३

मकं कर्म कर्म करिष्य इति संकल्प्य ॥ द्वितीया सप्तमी द्वादशी श्रवणा रोहिणी पुष्येषु चंद्रबले विष्ट्यादिदोषा
भावे पूर्वाह्णे गृह्याग्नौ गृह्ये वा स्थंडिले गृह्याग्निं प्रतिष्ठाप्य पुनर्देशकालौ स्मृत्वा करिष्यमाणो विष्णुब
लिहोमे देवतापरिग्रहार्थमित्याद्य चक्षुषी आज्येनेत्यंतमुक्त्वा विष्णुं प्रधानदेवतां चतुःषष्टिवारं चरुणा
शेषेण स्विष्टकृतमित्याद्युक्त्वान्वाधाय परिसमूहनाद्याज्यदर्भाग्रद्वयप्रक्षेपांतं कृत्वा ॥ सिद्धान्नेन सह
स्यं त्रिः पर्यग्निं कृत्वा स्रुक्स्रुवसंमार्जनांतं कृत्वा चरुं पात्रांतरे पृथक्कृत्वा गृह्णावविष्टिस्थाभिघार्योद्गुद्वा
स्या ज्याद्दक्षिणतो बर्हिष्यासाद्य प्रत्यभिघारणाज्यभागांतं कृत्वा ॥ दक्षिणतोऽग्नेः स्थंडिलेऽष्टदल
पद्मं स्वस्तिकं वा प्रकल्प्य तत्र विष्णुमावाह्य षोडशभिरुपचारैरभिपूज्य पुनर्यथासनमासित्वा पल्यमन्वा
रब्धोऽवदानधर्मेण चरुमेव कमेधाम्नमवदाय स्रुचा चतुःषष्टिमंत्रैश्चतुःषष्टिमाहुतीर्जुहुयात् ॥ त
त्रायं मंत्रक्रमः ॥ अतो देवा इति षड्चस्य मेधातिथिर्विष्णुर्गायत्री ॥ ऋक्षु द्वि विष्णोर्नु कमिति सप्तदशर्चं

राम०

७३

स्यसूक्तेन्यस्य च चष्णुत्रोदीर्घतमा विष्णुः प्रथमे सूक्ते वैष्णवं द्वितीये मागते ॥ ऋक् १२ संवामित पर्वेस्य भरद्वा
जो विष्णुस्त्रिष्टुप् ॥ ऋक् ८ परो मात्रयेति वर्गद्वयस्य वसिष्ठो विष्णुस्त्रिष्टुप् ॥ ऋक् १४ सहस्रशीर्षेति वर्गत्रयस्य ना
रायणः पुरुषोऽनुष्टुब् अंत्या त्रिष्टुप् ॥ ऋक् १६ विष्णुर्योनिं कल्पयत्विति मंत्रत्रयस्य हिरण्यगर्भो विष्णुरनुष्टुप् ॥ ऋ
क् ३ सर्वत्र विष्णुबलिप्रधाने चरुहोमे वि० ॥ विष्णव इदं न ममेति सर्वत्रोद्देशत्यागौ ॥ अनंतरमग्नेरैशा
न्यां द्वात्रिंशदंगुलायामविस्तारं गोमयोपलिप्ते स्थंडिले चतुरंगुलकीडावत्समचतुरस्रं चतुरंगुलं चतुः
षष्टिपदं सितेन रजसा मंडलं कृत्वा तेषु पदेषु नैर्ऋतपदादिक्रमेण ॥ मध्यमे बाह्यावृत्तौ ततस्तथैवानंतरा
वृत्तिषु च प्रागुक्तचतुःषष्टिमंत्रैः प्रणवाद्यैः स्वाहांतैः प्रादक्षिण्येन चरुशेषेण बलिं दत्वा ॥ सर्वत्र विष्णव
इदं न ममेत्युद्देशत्यागः कार्यः ॥ तन्मंडलमध्ये ॥ ओं नमो नारायणायेति बलिं दत्वा पूर्ववत्त्यक्त्वा ॥ तेनैव मंत्रे
णार्घ्यं च दत्वा बलिशेषात् ॥ किंचिदन्नमादाय पिंडद्वयं कृत्वा दंपती प्रयोगाश्नीयातां ॥ ततश्चाचम्यप

73

तिः॥ स्विष्टकृदादिहोमशेषं समाप्य गुरवे दक्षिणां दत्वा यथाशक्ति ब्राह्मणान्भोजयित्वा दंपती भुंजीयातां॥
अयं च विष्णुबलिः प्रतिगर्भमावर्तते॥ प्रतिगर्भं बलिः कार्यः सीमंतस्तु प्रथमस्यैवेत्याश्वलायनोक्तेः॥ इदं
च गृह्यसूत्रोक्तत्वादिदानीं शिष्टा नाचरंति॥ ॥इति नारायणभट्टकृते प्रयोगरत्ने विष्णुबलिः॥
॥ अथ जातकर्मप्रयोगः॥ ॥अथ जातमात्रे पुत्रे पिता तस्य मुखं निरीक्ष्य नद्यादावुदङ्मुखः स्नात्वा
असंभवे दिवाहृताभिः शीताभिरद्भिः सुवर्णयुताभिर्गृह एव स्नात्वा॥ आचम्य सितचंदनमाल्यादि
भिरलंकृतो नालच्छेदनात्पूर्वं स्तनदानादिव्यतिरिक्तैरस्पृष्टमकृतस्तनपानं प्रक्षालितमुखं कुमारं मा
तुरुत्संगे प्राङ्मुखमवस्थाप्य ब्राह्मणैः सहपुण्याहवाचनं कृत्वा देशकालौ स्मृत्वा मम अस्य कुमारस्य
गर्भांबुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपर
मेश्वरप्रीत्यर्थं जातकर्म करिष्य इति संकल्प्याऽभ्युदयिकश्राद्धं हिरण्येन विधाय॥ होमकरण

पञ्चभ्यो व्याहृतिभिर्लौकिकाग्निं प्रबलसंज्ञं विधिवत्प्रतिष्ठाप्य देशकालौ स्मृत्वा अस्मिन् जातकर्महोमे
देवतापरिग्रहार्थमन्वाधानं करिष्ये इत्यादि च हुत्वा आज्येनेत्यंतमुक्त्वा अग्निमिंद्रं प्रजापतिं वि
श्वान्देवान्ब्रह्माणमाज्येन यक्ष्ये ॥ शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्य इत्यंतमुक्त्वान्वाधाय परिस
मूहनादि आज्यभागांतं कृत्वा प्रधानदेवताभ्यः स्वाहा तु यथा तन्नाममंत्रेण आज्यं हुत्वा देवतोद्देशेन त्यागं कुर्या
त् ॥ ततो विषममानेन मधुसर्पिषी मिश्रीकृत्य शिशुजातके निक्षिप्य तत्रैव सुवर्णं [illegible] देवतोद्देशेन व गो
र्जो विमाके पात्रे दधि भाजने निधाय ॥ ॐ प्रातरग्निं मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनी
॥ आयुष्मान् गुप्तो देवहिरण्मयेन कुमारं पायय [illegible] ताभिः शतं जीव शरदो लोके अस्मिन्निति मंत्रेण ते
नैव हिरण्मयेन कुमारं पाययित्वा तद्धिरण्यं प्रक्षाल्य कुमारं स्पर्द्धि [illegible] कुशोकशो निधाय तन्मुखमध
मिपे स्वमुखमानीय ॥ ॐ मेधां ते देवः सविता मेधां देवी सरस्वती ॥ मेधां ते अश्विनौ देवावाधत्तां पुष्क

रस्त्वन्नाविति ऋचं जपित्वा ॥ पुनस्तद्धिरण्यं सव्ये करे निधायैतामेव र्चं जपेत् ॥ ततः शिशोरंसौ युगपद
भिमृशेत ॥ ॐ अश्मा भव परशुर्भव हिरण्यमस्तृतं भव ॥ वेदो वै पुत्रनामासि स जीव शरदः शतमिति मं
त्रेण ॥ इंद्र श्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप् ॥ असावभिमर्शने वि० ॥ ॐ इंद्र श्रेष्ठानि द्रविणानि धेहि०
ऋक् १ अस्मे प्रयंधि विश्वामित्र इंद्रस्त्रिष्टुप् ॥ असावभिमर्शने वि० ॥ ॐ अस्मे प्रयंधि मघवन्नृ
जीषिन्० ऋक् १ इति मंत्राभ्यां वाभिमर्शः ॥ ततो रद्रासुषोऽभिहध्यर्थः ॥ ॐ अंगादंगात्संभवसि हृ
दयादधिजायसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमिति मंत्रमुच्चार्य मूर्द्धानं त्रिराजिघ्रे
त् ॥ ततः शिशोः कुर्यान्नाम तदेव स्मरेत् ॥ ततः स्विष्टकृदादि होमशेषं समाप्य यथाचारं हिरण्यपा
त्रकेण मातुर्दक्षिणस्तनं प्रक्षाल्य ॥ ॐ इमं कुमारो जरां धयतु दीर्घमायुः स जीवसे ॥ अस्य स्तनो
प्रयुंजानात्मा पुरुवर्चो यशो बलमिति मंत्रेण मातरं कुमारं पाययित्वा ॥ ब्राह्मणेभ्यो गोभूतिलहिर

एयादिकमन्त्रवर्जितं यथाशक्ति हुत्वा ब्राह्मणेभ्यो आशिषो वाचयेत् ॥ जन्मलग्ने ऽष्टस्थानस्थितं ग्र
हं ज्ञापीडानिवृत्तये तत्लोत्पर्णं विशेषतो घृतेनोद्धृत्य हिरण्यं दद्यात् ॥ तमर्वंतमितिपंचानां वामदेवोऽग्निर्गाय
त्री ॥ तमर्वंतमितिपंचभिराशिषः ॥ होमोत्र कृताकृतः ॥ कुमार्यो पीत्थं जातकर्मऽमंत्रकं कार्यं ॥
पितर्यस्त्रामोंतरे गतेपि तत्व्यादि गोत्रजो ज्येष्ठक्रमेणोद्कुर्यात् ॥ ॥ इति जातकर्मप्रयोगः ॥ ॥ अथ
षष्ठीपूजा ॥ ॥ पंचमे षष्ठे वा दिने षष्ठ एव वा पर्वरात्रे पित्रादिः आचम्य प्राणानायम्य देशकालौ
स्मृत्वाऽस्याः शिशोरायुरारोग्यसकलनिष्ठ्यर्थं तिथ्याराध्रीपरमेश्वरमेश्वरप्रीत्यर्थं विघ्नेशस्पजन्म
दानां षष्ठीदेव्या जीवंतिकायाश्च पश्यामीतिलोपचारैः पूजनं करिष्ये इति संकल्प्य षोडशोपचारैः कं
त्रेणापूजयेत् ॥ एव पूजासंकल्प्य वा पप्यगेवपूजा कार्या ॥ एतत्मति मास्वाऽनुलेपनाकुड्ये लेखनी
याः ॥ पीठादौ वा कृतपुत्ररूपेण निवेश्या ॥ पुरुषा शस्त्रहस्ताः स्त्रियश्च नृत्यगीतकादिनापोऽसं

प्र० रत्न०
७६

रात्रौ जागरणं कुर्युः ॥ तिकागृहं च सधूमाग्निदीपशस्त्रमुसलांबु विभूतियुक्तं कार्यं ॥ सर्षपाः स्वस
पयो विकिरेत् ॥ अत्र न्यदपि यथाचारं सर्वं कार्यं ॥ जन्मदभ्यो षष्ठदिना बलिर्देयः ॥ विशेषेण स्वकुलाह्र ए
स्वाचाराद्दक्षिणां दद्यात् ॥ जननाशौचमध्ये प्रथमषष्ठदशमादिने सुदाने प्रतिग्रहे च न दोषः ॥ अन्येषु
निषिद्धं ॥ षष्ठीमार्यनाम ॥ गौरीपुत्राय धात्रे स्कंदः शिशुत्वे रक्षितः पुरा ॥ तथा ममाप्ययं बालः षष्ठि
के रक्षतां नमः ॥ ॥ इति षष्ठीपूजाविधिः ॥ ॥ अथ नामकरणप्रयोगः ॥ ॥ जन्मत एकादशे
दशे वा द्वादशे वा यथाचारं नियतदिने वा नामकरणं कार्यं ॥ नियतकालेपि विष्टिवैधृतीव्यतीपा
तग्रहणसंक्रांत्यमावास्याश्राद्धदिने कार्यं ॥ नियतकाले क्रियमाणे गुरुशुक्रास्तबाल्यवार्द्धक
कातिचारमलमासनिषेधो नास्ति ॥ नियतकालातिक्रमे तु ज्योतिःशास्त्रोक्ते शुभे कार्यं ॥ सर्वथा
पर्वाह्नः शस्तः ॥ अत्र होमः कर्तव्यः ॥ उक्तकाले शिशोर्नाम चिकीर्षुः पिता नाह्नयपर्वं घटितद

रत्न०
७६

हरेय वा स्वस्तिवाचनमुपक्रम्य पुण्याहत्रयमुक्त्वा करिष्यमाणां नामचतुर्थ्यंतमुक्त्वा ॥ एतच्चास्मै स्व
स्तिभवंतो ब्रुवंत्वित्युक्ते विप्रैरेतत्त्वमस्तु स्वस्तीति त्रिः प्रत्युक्ते शेषं स्वस्तिवाचनं समाप्य दद्यात् ॥ कुमारस्य ना
माहं विदधानीति विप्राननुज्ञाप्य तैर्विधीयतामित्युक्तोऽद्येति देशकालौ निर्दिश्यास्य शिशोर्बीजगर्भ
समुद्भवैनोनिबर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकरणं करिष्ये इति सं
कल्प्य ग्रहयज्ञाभ्युदयिके यथाशक्ति कृत्वा यथाचारं स्वकुलदेवताभक्त इति नामकं लोकनाम काली
नमासनाम कुर्यात् ॥ तच्च ॥ केशवोऽनंतोऽच्युतश्चक्री वैकुंठोऽथ जनार्दनः ॥ उपेंद्रो यज्ञपुरुषो वासुदेवस्त
था हरिः ॥ योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात् ॥ अत्रैव यथाचारं द्व्यक्षरं प्रतिष्ठाकामस्य तुरं चैत्रा
दि मार्गशीर्षादिर्वा क्रमः ॥ ततः स्त्रीपुरुषसाधारणं वा स्वेष्टं वा युग्माक्षरं द्व्यक्षरं प्रतिष्ठाकामश्चतुर
क्षरं ब्रह्मवर्चसकामो नाम कृत्वा ततोऽभिवादनीयं नाम विप्रादिवर्णक्रमेण शर्मवर्मगुप्तदासा

प्र०स० ७७

ऽन्यनमयदां तमुपांशु कुर्यात्॥ तच्च मौंजीबंधनान्मातापितरावेव जानीयातां॥ उपनयनकाले चाने
नेनाम्नाभिवादयेति कुमारं प्रतिवाच्यं॥ अत्रायं शिष्टाचारः॥ तं तु दानकांस्यादिपात्रे प्रसार्य तदुपरि सु
वर्णशलाकया कुलदेवताप्रमुखकुमारो अमुकभक्त इति लेख्यं॥ ततो मासनाम॥ ततोऽवकहडा
दिज्योतिःशास्त्रोक्तचक्रानुसारेण जन्मनक्षत्रपादप्रयुक्तो हृदादि नाम॥ ततो व्यवहारिके लेख्यं
नामेति चतुष्टयं लिखित्वा नामदेवताभ्यो नम इति संपूज्याऽमुकनाम्ना त्वममुकोऽसीति स्वदक्षि
णस्थमातुरुत्संगस्थस्य शिशोर्दक्षिणकर्णे कथयित्वा॥ तत्र मित्रेत्यादिमंत्रपाठांते भवत्येना
मस्तु प्राभिवादय इति पृष्टे तन्मात्रा पित्रुक्ते अमुकेनाम्नाऽमुकनामायं भवतोऽभिवादयत इत्युक्ते नाम
कर्तॄन्प्रति नाम विप्राभिवादये इति चायुष्मान्भवत्वमुक इति वदेयुरिति॥ निरुक्तेनामैवाभिवादनीय गुरुं
चैत्र पितृदं इति॥ ततः कर्ता देवताभ्यो ब्राह्मणेभ्यश्च नत्वा यथाविभवं ब्राह्मणान्भोजयेत्॥ दक्षिणां च दद्यात्॥

७७

घातम्॥ विप्राशिषस्वग्राह्याः॥ कुमार्या अपि नामकरणममन्त्रकं कार्यं॥ विषमाक्षरं तु तन्नाम॥ होमपक्षे तु
पार्थिवाग्नौ जातकर्मवद्देवप्रधानाऽतीऽतीऽरुत्वा नामयथाकुं त्वा विप्र करोति शेषं तंत्रं कुर्यात्॥ अत्र
जातकर्मवत्पित्राद्याः क्रमेण कर्तारः॥ ॥इति नामकरणप्रयोगः॥ ॥अथ पर्यंकारोहणं॥ ॥अथ प
र्यंकारोहणं॥ ॥तत्र नामकरणदिने षोडशे द्वात्रिंशेऽन्यस्मिन्वा ज्योतिःशास्त्रोक्तमुहूर्ते वा द्विमनकृत्वा
दियुक्ते शुभे काले यथाचारं कुलदेवतादिपूजां विधायालंकृतं सुशिहशिद्धापधलंकृते पर्यंके मात्राद्याः सौ
भाग्ययुक्ताः स्त्रियो योगशायिनं हरिं स्मरंत्यो गीतवाद्यादिसमकालं प्राकशिरसं न्यस्येयुः॥ स्तनं हस्ते वा
ऽन्यस्मिन्वाऽन्नप्राशननक्षत्रे युक्ते शुभकुले कुलदेवतादिपूजनं ते गोलीरखेन धात्री माता अन्या वा सुभगा
लंकृतं कुमारं दक्षिणशिरसं प्राकशिरसं वा पाययेदिति॥ स्वत्वाचारप्राप्तं चोन्मदपि कार्यं॥ ॥अथ दु
ग्धपानं॥ ॥एकत्रिंशे दिने द्वितीये जन्मनक्षत्रे वान्यस्मिन्वान्नप्राशननक्षत्रे शुभदिने कुलदेव

नांदीश्राद्धांते। गान्धीरं शंखेन धात्री माता अन्या वा सुभगालंकृतं कुमारं मातुः शिरसं वापाययेदिति॥ ॥ अथ क
र्णवेधः॥ ॥ जन्मदिनाद्द्वादशे षोडशे वाह्नि षष्ठसप्तमाष्टममासान्यतरमासे अन्यदा वा रं तज्जननात्तृ
तीये वर्षे ज्योतिःशास्त्रोक्तमासस्य शुक्लपक्षे तिथिवारनक्षत्रादिशुभकाले पूर्वाह्णे मध्याह्ने वा विष्णुशिव
ब्रह्मचंद्रसूर्यदिक्पतीशनासत्यसरस्वतीकुलदेवतागोब्राह्मणान्यथाविभवं संपूज्य मातुरुत्संगस्थ
स्यालंकृतस्य शुभासने स्थितस्य वा संलक्षितस्य शिशोः कर्णयोर्वेध्यस्थले समालक्ष्य करसेनांकयित्वा यथावि
भवं सुवर्णरूप्यताम्रलोहसूच्या मांगलिकद्विगुणाय पदार्थसूत्रोपेतया मौक्तिकेनान्येन वा कुशलेन सुभ
गाद्वयावा प्राङ्मुखस्योदङ्मुखस्य वा कर्णवेधं कुर्यात्॥ अत्र नाडितेषु सूर्यरश्मिपातस्थले गणना ऽतो मित्रादि क
र्तव्यं वा शिष्ठमारभ्य पूर्वदक्षिणतः कुमार्याः सव्यपूर्वं वामः कर्णवेधः॥ वेधनन्तरं कृत्वा तत्तैलपनं हेत्वे कर्णाङ्को
त्तनमुहूर्ते वा विप्राशीर्ग्रहणार्थं कार्यं॥ कृतौ च क्रतौ यथाभरणधारणस्य सुक्रमता भवति तथा वर्द्धनीयो॥ राम०

पुंसः सूर्यराशिमप्रवेशयोग्यपरं ध्रपर्यंतं वर्द्धयत् लंबकरस्यातु निषिद्धा ॥ स्त्रीणां यथेष्टं ॥ ॥ इति कर्णवेधः ॥ ॥
अथ सूर्यावलोकनं निष्क्रमणं च ॥ ॥ जननात् तृतीये मासि जन्मतिथौ वा जन्मनक्षत्रे वा इष्टदेवतापूजनपूर्वकं
अलंकृतेन शिशुना सात्मवं सूर्यदर्शनं कारयित्वा चतुर्थे मासे शुभकाले ऽग्निं चंद्रं धेनुं च दर्शयेत् ॥ केचित्तु
॥ स्वस्तिन आत्रेयो विश्वेदेवा त्रिष्टुप् ॥ शिशोर्मंकारोपणे वि० ॥ हस्तिनो भिमीताम ॥ त्रि नाम भगः ० रु कू १ त्र
नेने पित्रादिः शिशुमंकमारोप्य ॥ आशुः शिशान इति त्रयोदशर्चस्याप्रतिरथ ऋ क्तस्य इन्द्रो मातरः पदं द्रौवि
त्रिष्टुप् ॥ चतुर्थ्या बृहस्पतिर्देवता त्रयोदश्यनुष्टुप् ॥ शिशोर्नापुस्याभिहृष्यपर्यंजपे वि० ॥ ॐ आशुः शिशा
नो वृषभो न भीमः ० रु कू १३ ॥ अथ सायाह्ने तिष्ठेद् पवित्र शिव रु चो जपेत् ॥ तच्चक्षुर्वामिष्टः सर्वः पुरस्तादिति ऋ ॥
कुमारस्यादित्यावेक्षणे वि० ॥ ॐ तच्चक्षुर्देवहितं ० रु कू १ इति सूर्यं निरीक्षयेदिति वृद्धोक्ति ॥ तृतीये मासे सू
र्यावलोकनेन कारितं चेन्निष्क्रमणं तेन सह कार्यं ॥ ततश्चतुर्थे मासि षष्ठे वा शुक्लपक्षे शुभतिथ्यादौ

78

प्र॰ रत्न॰
७९

पितासभार्यः शिशुरभ्यंगस्नातोममाशीशोरापुः श्रीवाद्द्वीजगर्भसमुद्भवैर्नानिबर्हणद्वारा श्रीपरमेश्वरस्मी
रणपूर्वं निष्क्रमणाख्यं कर्म करिष्य इति संकल्प्य तं रंगगतयोत्थाप्यस्तिवाचनाभ्युदयिकं ग्रहयज्ञान्कृत्वा गृहद्वा
ग्नी॰ यम॰ नैर्ऋति॰ वरुण वायु कुबेरेशानानां प्राच्यादिदिशां चंद्रार्कवास्तुदेवगणानां च यथाक्रमं प
जां कृत्वा ब्राह्मणान्भोजयित्वा तैः स्वस्त्ययनं वाचयित्वा सायंसंध्यादिकं कृत्वा शिशुं सौवर्णैः कात्रिमैर्वा
भरणैर्यथाशक्त्यलंकृत्य एवं न कृतं चेद्विहानी शिशुनाग्निचंद्रधेनूनां दर्शनं कारयित्वाऽश्वादिवाहनस्थं
शिशुं मातुलेन धात्र्या वा वाहयित्वा भार्यापुत्रविद्वद्ब्राह्मणज्ञातिबांधवपुरंध्रीगणादर्पणपूर्णकलश
युक्तकन्यागणपुष्पहरिद्राक्षतदीपमालाध्वजव्यजनमंगलवाद्यघोषपुरःसरं कुंतादिसुमंगल्यैर
लंकृतपथेन्नगराद्बहिर्गत्वा मंत्रमेतमुदीरयेत्॥ चंद्रार्कयोर्दिगीशानां दिशां च वरुणस्य च॥ निक्षेपार्थमि
दं दद्मि ते त्वां रक्षंतु सर्वदा॥ अप्रमत्तं प्रमत्तं वा दिवारात्रावथापि वा॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः॥

राम॰
७९

मात्॥ एवं शिशु रक्षणार्थं देवान्संप्रार्थ्य॥ विहस्तु शिवालयपोरन्यतरद्वधुगृहं वा गत्वा तत्र देवं सुगंधवाघ
द्योधूपपुष्पोपहारादिभिः संपूज्य गोमयाघनुलिप्तचतुरस्रदेशे धान्यादिनिधाय तत्र शिशुमासाथित्वाम
त्रेण रक्षां कुर्यात्॥ मंत्रश्च॥ त्र्यंबकमिति मंत्रस्य वसिष्ठाम्नस्तु जयेत्र्यंबकोनुष्टुप्॥ शिशोरक्षायां विनि॥
ॐ जूं सं हं त्र्यंबकं यजामहे ०मामृतात् सं हं जूं ॐ इत्येवंरूपं मृतसंजीवनीमंत्रं जपेन्विभूत्या कृतैर्वा मृ
द्भिर्ललाटे चरक्षां कृत्वा त्र्यपूपादिभिर्भूतेशानं गणेशमभ्यर्च्य शिशुं भक्ष्यादिभिस्तोषयित्वा त्र्या शि
शोर्पाचापत्यादेर्यो मरणामयप्रदं क्षिणात्रयं च शिशुना कारयित्वा मातुलाद्यासन्नवधूगृहे एवं वान्धी
त्वा तत्र दानोपहारादिभिः शिशुं तोषयित्वा ब्राह्मणेरा शिशोर्वाचयित्वा तद्गृहं गत्वा तेभ्यः सुवासिनीभ्य
:सुवासिनीभ्यश्च यथाशक्ति दक्षिणां दत्वा वधूभिः सहस्नुडीत॥ कुमार्यामप्येतत्समानं॥ होमोत्र कृ
ताकृत॥ होमपक्षे शिशोरक्षं करणानंतरं लौकिकाग्निं प्रतिष्ठाप्य जातकर्मपद्धत्यादेशरदेवता भोऊ

७१

त्वाग्निं च द्रष्टदर्शनादि त्व गृहगमनांतं कृत्वा स्विष्टकृदादिहोमशेषं समाप्य ब्राह्मणाशीर्वादादि कारयेदि
तिक्रमः ॥ ॥ इति प्रयोगरत्ने निष्क्रमणप्रयोगः ॥ ॥ अथोपवेशनं ॥ ॥ पंचमे मासि शुक्लपक्षे ज्योतिः
शास्त्रोक्तशुभतिथ्यादौ पूर्वांगं स्वस्तिवाचनं कृत्वा वराहं पृथिवीं गुरुं देवं द्विजान्संपूज्य पित्रोत्संगभागमु
पलिप्य तत्र मंडलं कृत्वा तत्र शंखत्र्यादिमांगलिकध्वजैः क्रियमाणे शिशुमुपवेशयेदेतैर्मंत्रैः ॥ रक्षै
नैव सुधे देवि विश्वदा सर्वगतं शुभे ॥ आयुःप्रमाणं निखिलं निक्षिप्य त्वं हरिप्रिये ॥ अचिरादायुषस्तस्य
ये केचित्परिपंथिनः ॥ जीवितारोग्यवित्तेषु निर्दहस्वाचिरेण तान् ॥ धारिणि शेषभूतानां मा
तस्त्वमधिका ह्यसि ॥ कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतामिति ॥ ततो ब्राह्मणान्संपूज्य पिलाशि
षो वाचयित्वा नीराजनाद्युत्सवं कुर्यात् ॥ एवं कुमार्या अपि ॥ ॥ इत्युपवेशनं ॥ ॥ अथान्नप्राशनं
॥ ॥ जन्मतः षष्ठे मासि अष्टमे वा दंतेषु जातेषु वा ज्योतिःशास्त्रोक्ततिथिनक्षत्रादिशुभकाले पूर्वा

ह्ले पि व्यादिः शिशोरन्नप्राशनं कुर्यात्॥ षष्ठे मासि चेत् क्रियते तदा गुरुशुक्रमौढ्यादि दोषे अधिमासादि दो-
षाधिमासादि दोषश्च ना॥ स्ति॥ पित्रादिः सभार्यः शिशुं मंगलस्नातं कृत्वा देशकालौ संस्मृत्वा ममास्य शि-
शोर्मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्रह्मवर्चसतेजइन्द्रियायुर्बलकृशापकलसिद्धिबीजगर्भसमुद्भवैनोनि-
बर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं अन्नप्राशनाख्यं कर्म करिष्य इति संकल्प्य॥ तदंगत्वेन स्वस्तिवाचनाभ्यु-
दयिके कृत्वा शिशुमलंकृत्य जातकर्मवल्लौकिकाग्निं प्रतिष्ठाप्य ध्यानादेशान्तं कृत्वा दीपप्रोपहारादि-
भिरिष्टदेवतामभ्यर्च्य ततः स्वदक्षिणे शुभवस्त्रोपरिस्थमातुरुत्संगे प्राङ्मुखं वा पाविहस्य शिशोः प्र-
थमान्नप्राशनं कारयेत्॥ दधिमधुघृतमिश्रमन्नं शुभे भाजने प्राक् क्रिया॥ अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः अन्न-
पते अन्नस्य नो धेहि द्विपदे चतुष्पदे इति गता॥ शिशोरन्नप्राशनविधि॥ ॐ अन्नपते अन्नस्य नो देह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे इति मंत्रेण समस्तु वर्ती हस्तान्न

मारायप्रथमकवलं प्राशयित्वायथेष्टं भोजयित्वा सुखं प्रक्षाल्य बालं भूमावुपवेश्य तदग्रे पुस्तक शस्त्र वस्त्र वस्त्रा
दि शिल्पानि विन्यस्य जीविकापरीक्षां कुर्यात्॥ शिशोः स्वेच्छया यत्प्रथमं स्पृशेत्सास्य जीविकेति विद्यात्॥ ततः विप्र
कुमारादि होमशेषं समाप्य यथाशक्ति ब्राह्मणान्भोजयित्वा दक्षिणां दत्वा शिवो वाचयित्वा बंधुभिः सह स्वयं भुंजीत॥
होमोत्र कृताकृतः॥ होमपक्षे पूर्वेद्युर्नांदीश्राद्धं॥ कुमार्या अप्येतदमंत्रकं कार्यं॥ किंतु समे मासे॥ ॥ इत्यन्न
प्राशनं॥ ॥ अथ वर्द्धापनविधिः॥ ॥ आदित्यपुराणे॥ ॥ सर्वैः स्वजन्मदिवसे स्नातैर्मंगलवारिभिः॥ गुरुदेवा
ग्नि विप्राश्च पूजनीयाः प्रयत्नतः॥ स्वेन कृत्यं च पितरस्तथा देव प्रजापतिः॥ प्रतिसंवत्सरं यत्नात्कर्तव्यश्च महो
त्सवः॥ स्वनक्षत्रं स्वनक्षत्रदेवता॥ स्वनक्षत्राधिपतयश्चाश्विका शुक्रपाठः॥ तदा वित्तपः कुबेर॥ ॥ अत्र प्रयोगः॥ ॥
प्रतिवर्षं जन्मदिने सौरमानेन जन्मनक्षत्रे वा यजमानः पूर्वाह्णेऽभ्यंगस्नात्वा सर्वौषधियुतजलपूरितकलशो
सपल्लयतदुदकेन स्नातः शुक्लांबरधरो यथाविभवमलंकृतो विधिवत्स्वस्ति वाचयित्वा कौतुकमावध्य

दूर्वाहोमं कुर्यात्॥ तत्रायं क्रमः॥ देशकालौ स्मृत्वा मम मातृपूर्त्तिजन्मदिवसे आयुरभिवृद्धिद्वारा श्रीपरमेश्व
रप्रीत्यर्थं दूर्वाहोमं करिष्ये इति संकल्प्य विधिवदग्निं प्रतिष्ठाप्य पुनर्देशकालौ संकीर्त्य समिधावाधाय। अस्मि
न्दूर्वाहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये इत्युक्त्वा अस्मिन्नन्वाहितेग्नावित्यादि चक्षुषी आज्येनेत्यंतमु
क्त्वा प्रधानदेवतां मृत्युंजयमष्टोत्तरशतदूर्वाद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्ये इत्यंतमुक्त्वा समि
धावग्न्याधाय परिसमूहनाद्याज्यभागांते कृत्वा दधिमधुघृताक्तैर्वे वलाज्याक्तैर्वा दूर्वात्रयं त्रयं॥ त्र्यंबक
मित्यस्य वसिष्ठो मृत्युंजयस्त्र्यंबको नुष्टुप्॥ दूर्वाहोमे वि०॥ ॐ त्र्यं सह त्र्यंबकं यजामहे० [illegible] ता तस्म सहस्रं इत्य
नेन मंत्रेणाष्टोत्तरशतं हुत्वा॥ स्विष्टकृदादिहोमशेषं समापयेत्॥ ततो विधिना ग्रहयज्ञं कृत्वा आयुष्यं चरु
होमसंकल्पपूर्वकं कुर्यात्॥ तत्रायं क्रमः॥ देशकालौ संकीर्त्य॥ अस्मिन्होमे देवतापरिग्रहार्थमित्यादि चक्षुषी
आज्येनेत्यंतमुक्त्वा विश्वान्देवान्दशवारमग्निं षोडशवारं जातवेदोग्निमेकवारं चरुद्रव्येण शेषेण स्विष्टकृ

84

तामित्यादिसघोयस्यइत्युक्त्वासमिधावग्नावाधायपरिसमूहनाद्याज्येदर्भाग्रद्वयप्रक्षेपणांतंकृत्वासिद्धान्नमा
ज्यसमीपेनिधायाज्येनसहतदन्नंत्रिःपर्यग्निकृत्वाऽग्न्योद्वायनादिस्रुक्स्रुवसंमार्जनांतंकृत्वान्नंपात्रेद्वपयुक्तंवा
ग्नावाधोक्षीत्यस्यचेरणाभिधार्योदगुद्वास्याज्यादङ्क्षिणतोबर्हिष्यासाद्यपुनरभिधारणाद्याज्यभागांतंकृत्वा
॥अग्नेभद्रइतिदशर्चस्यसूक्तस्यगोतमोविश्वेदेवाआद्याःपंचसप्तमीचजगत्यःषष्ठीविराट्स्थानाअष्टा
म्याद्यास्तिस्रस्त्रिष्टुभः॥ ॐ अग्नेभद्रः० रुकू १० ॥इमंस्तोममित्यस्यषोडशर्चस्यसूक्तस्यांगिरसःकुत्सोऽग्नि
राद्यस्तिस्त्रश्चतुर्दशजगत्यःअंत्येत्रिष्टुभौ॥पर्वोदेवोभवत्वित्यादित्र्यृचःपादादेवदेवत्याः॥तन्नोमित्रोदर्चोलिं
गोक्तदेवतास्त्वग्निर्देवत्यस्त्वा॥ ॐ इमंस्तोममर्हतेजातवेदसे० रुकू १६ जातवेदसइत्यस्यमारीचःकश्यपोजा
तवेदोऽग्निस्त्रिष्टुप्॥सर्वेषांचरुहोमेवि०॥ ॐ जातवेदसेः रुकू १ एतैःसप्तविंशतिमंत्रैश्चरुदानधर्मेणाहुत्वावि
दक्रादिहोमशेषंसमाप्य॥वासुदेवंनक्षत्रदेवतांचेद्दखनकृत्रंवरुणांचषोडशोपचारैरभ्यर्च्य॥तत्तत्मका

शकैर्मैत्रैर्यतेन तेभ्यो यथाशक्ति होमं कृत्वा ग्रहपतीत्क्वा विधिनाभिषिक्तो यथाशक्ति गोभूहिरण्यादि दत्वा दे
व गुरुब्राह्मणान्सुहृद्बंधुजनन् पूजां च वाहनायुधपीठछत्रपूजां कृत्वा विधिवन्नांदीश्राद्धं कृत्वा ब्राह्मणान्भो
जयित्वा ॥ शुभमुहूर्ते गांधादिभिरलंकृतः स्त्रगरुपताधारणापूर्वकेतु वर्णामयपकादि सूत्रे नूतनवस्त्रं च ध
त्वा तिपुत्रवतीभिः स्त्रीभिर्नराराजितो ब्राह्मणाशिषो गृहीत्वा स्वयं हविष्याशी जितेंद्रियो वर्त्तेतेति ॥ इदं सर्वं या
वद्बाल्ये पित्रादिभिः कार्यं । पश्चात्तु प्रतिवर्षं स्वयमेवेति ॥ ॥ इति प्रयोगपारिजातोक्तं अब्दपूर्त्तिविधिः ॥ ॥
अन्यत्र तु ॥ ॥ वर्षपर्यंतं प्रतिमासं ततः प्रतिवर्षं मांगल्यस्नानं कृत्वा कुमुदादिदेवताः संपूज्य यथाशक्ति ब्रा
ह्मणभोजनं दक्षिणां च दत्वा सुवासिनीभिर्नीराजितो धृतनूतनवस्त्रो ब्राह्मणीभ्यः शिषस्तु भ्यश्चाप्यपपि
काः साध्व्याः कुमुदादिप्रीतये आयुर्वृद्धये च वायनानि दद्यात् ॥ जन्मर्क्षदेवताप्रीत्यै चरुं दद्यात् । वर्षांते तु सु
दृढ द्वादश वंशपेटिकास्तु मोदकादि खाद्यं निधाय नूतनवस्त्राच्छादिताः पेटिका जीवत्पतिपुत्राभ्यो दत्वा

प्र०र० तराशिप्रोग्रक्षीयात् ॥ २१ ॥ सर्वजीवतीमार्ते वीयस्त्यायुषे कुर्यात् ॥ ॥ अथांतरेतु ॥ ॥ गरोशंग्रहाभिषदेक्तां मा
र्कंडेयं च प्रश्नं प्रार्थयेत् ॥ मार्कंडेय नमस्तेस्तु सप्तकल्पांतजीवन ॥ आयुरारोग्यसिध्यर्थं प्रसीद भगवन्मु
८३ ने ॥ चिरजीवी यथा त्वं तु मुनीनां प्रवर द्विज ॥ कुरुष्व मुनिशार्दूल तथा मां चिरजीवितं ॥ ततः ॥ मार्कंडेय महा
भाग सप्तकल्पांतजीवन ॥ आयुरारोग्यसिध्यर्थं अस्माकं वरदो भव ॥ सतिलं गुडसंमिश्रं अंजल्यर्द्धमितं
पयः ॥ मार्कंडेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ॥ इति सतिलगुडमंजल्यर्द्धमितं दुग्धं पिबेत ॥ अश्वत्थामा
बलिर्व्यासो हनुमांश्च बिभीषणः ॥ कृपः परशुरामश्च सप्तैते चिरजीविनः ॥ सप्तैतान्संस्मरेन्नित्यं मार्कं
डेयमथाष्टमं ॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ इति वचनादश्वत्थामादीन्मार्कंडेयांतान
ष्टौ स्मरेत् ॥ २२ ॥ देवद्वीपनेयादि जन्ममासोऽसंक्रांततत्तदा शुद्धमासएव कार्यं ॥ न त्वधिके ॥ ॥ इति न रम०
गायराम भट्टकृते प्रयोगरत्ने वर्द्धापनप्रयोगः ॥ ॥ अथ चौलं ॥ ॥ तत्र कालस्तावत् ॥ प्रथमे द्विती
८३

यत्तृतीये पंचमे सप्तमे वा वर्षे गते तृतीये भागे अगते त्रिभागे वा उपनीत्या सह वा यथाचारं चौलं कार्यं ॥ तत्रापि
द्वितीयादौ वर्षे जन्मतो मुख्यो ॥ गर्भतो गौणः ॥ उदगयने शुक्लपक्षे गुरुशुक्रयोर्बाल्यवार्द्धकाद्यभावे अक्र
ये अनध्याये केचमासि ज्योतिःशास्त्रोक्तप्रशस्ततिथिवारलग्नेषु शुभेषु हूर्ते दिन एव न तु रात्रौ कार्यं ॥ इदं कर्म
लौकिकेग्नौ ॥ तस्य सभ्य इति नाम ॥ यदि गर्भाधानादि संस्कारलोपस्तदा प्रायश्चित्तं कृत्वा कालात्यये निमि
त्तं प्रायश्चित्तहोमं च कृत्वा चौलहोमः कार्यः ॥ तदाह भगवान् ॥ आरभ्याधानमाचौलात् कालेतीते तु कर्मणां ॥
व्याहृत्याज्येसु संस्कृत ऊर्ध्वं कर्म यथाक्रमं ॥ कार्यमिति शेषः ॥ प्रायश्चित्तं च स एवाह ॥ एतेषु चैकलोपेपि पादकृच्छ्रं
समाचरेत् ॥ चूडाया अर्द्धकृच्छ्रं स्यात् आपदि त्वेवमीरितं ॥ अनापदि तु सर्वत्र द्विगुणं चरेत् ॥ मनुः ॥ जातकर्मादि
संस्काराः स्वकालेन भवेत्ति चेत् ॥ चौलादर्वाक् प्रयत्नेत प्रायश्चित्तादनंतरं ॥ प्रायश्चित्तहोमे कृते तत्कर्मेक
ता कृतं ॥ तथा च कारिका ॥ प्रायश्चित्तं कृत्वा पश्चादतीतमपि कर्म वै ॥ कार्यमित्येक आचार्या नेत्यन्ये बुवंते

83

।श्वितः॥प्रायश्चित्तहोमस्तुप्रधानहोमात्पूर्वंसमस्ताभिर्व्याहृतिभिः प्रतिकर्मचोपसंकेकाज्याहुतिःकार्येति॥
॥ ॥अथचूडाकर्मप्रयोगः॥ ॥उक्तेतृतीयादौवर्षेउदगयनेशुक्लपक्षेप्रशस्ततिथिवारनक्षत्रयुतेयोगशुभे
मुहूर्तेकुमारस्यचौलकर्मकरिष्यन्नुकर्ताप्रवेशुःस्वस्तिवाचनपूर्वकंनांदीश्राद्धंपूर्वेद्युःस्वयंकुशपरां
वकृत्वापरेद्युःकृतमंगलस्नानंकुमारमलंकृत्यब्राह्मणैःसहपुण्याहवाचयित्वामात्रंकेकुमारंदक्षिणा
तउपवेश्यदेशकालौस्मृत्वाऽस्यकुमारस्यबीजगर्भसमुद्भवैनोनिवर्हणेनबलायुर्वर्चोभिवृद्धिद्वाराश्री
परमेश्वरप्रीत्यर्थंचौलाख्यंकर्मकरिष्यइतिसंकल्प्यशुभेमुहूर्तेसभ्याग्निमुपलेपाद्यग्निप्रतिष्ठापनांतं
कृत्वापुनर्देशकालौनिर्दिश्यममाक्रियमाणेचौलकर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥अस्मिन्न
न्वाहितेग्नाविध्माधाराज्यभागांतेनतंत्रमुत्काविरम्यपमानेप्रजापतिंचेतिप्रधानदेवताआज्यद्रव्येणा
शिष्टकृतमित्याद्युक्त्वासमिद्धूपमन्वाधायपरिस्तीर्यपात्रनिधानांतेषट्पात्रप्रयोगादितंत्रंकृत्वाग्नेरुदग

स्तीर्णेषु दर्भेषु व्रीहियवमाषतिलैः पृथक्पृथक् पूरितानि नवानि शरावाणि चत्वारि क्रमेणोत्तरैकैकशः प्राक्
संस्थाप्य सादयेत् ॥ माता प्रत्यगग्नेरासीनस्य कर्तुर्दक्षिणतः कुमारमुत्सङ्गे कृत्वासीत ॥ ततः कर्ता मातुः पुर
स्तात्पश्चाद्वाग्नेरानडुहं गोमयपुंजं शरावं शरावं च निदध्यात् ॥ ततो ब्रह्मा एकविंशतिकुशपिंजूलान्या
दाय मातुर्दक्षिणतस्तिष्ठेत् ॥ पिता वा तथा तिष्ठेत् ॥ अस्मिन्पक्षेऽन्य एव चौलकर्ता ॥ ततः कुमारेणान्वार
ब्धः कर्ता पुरस्तान्नमाघारान्तं कर्म कृत्वा ॥ अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः अग्निः पवमा
नो देवता गायत्री छन्दः चौलकर्मप्रधानाज्यहोमे विः ॥ ॐ अग्न आयूंषि पवस० दुच्छुनां स्वाहा ॥ अग्नये प
वमानायेदं न ममेति त्यागः ॥ एवमग्रेऽपि ॥ ॐ अग्निर्ऋषिः पवमानः० गयं स्वाहा ॥ ॐ अग्ने पवस्व० पोषं स्वाहा
॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ चौलकर्मप्रधानाज्यहोमे वि० ॥ ॐ प्रजापते न त्वदेतान्० रयीणां स्वा
हा ॥ प्रजापतय इदं० ॥ ततः शीतमुष्णे चोभे मेलयेद्दक्षिणवामकरगर्भेणा क्रमेणापात्रेषाः पृथक्पृ

प्र०र०ल०
८५

थ कूर्चं गृहीत्वा शिशोः पश्चिमदेशे स्थित्वा तदुदकं द्वुपमन्याभिरन्याचेष्णाभिर्मां॥ ॐ उष्णेन वायउदकेनेहीति
मंत्रेण युगपन्निर्नियतदेकदेशं गृहीत्वा नवनीतेन दधिद्रप्सेन वाभिमथ्य तान्कुमारस्य वामकर्णतामारभ्य
प्रदक्षिणं॥ ॐ अदितिः केशान्वपत्वाप उंदंतु वर्चस इति मंत्रेण शिरस्त्रिवारं क्लेदयेत्॥ प्रतिक्लेदनमंत्रा
वृत्तिः॥ ततो ब्रह्मा हस्तस्थितैकविंशति कुशपिंजूलमध्यात्रीणि पिंजूलान्यादाय॥ ॐ ओषधे त्राय
स्वैनमिति मंत्रेण कुमाराभिमुखं पश्चिमाग्राणि तस्य दक्षिणे केशभागे निधाय तेषु ताम्रमयं क्षुरं
॥ ॐ स्वधिते मैनं हिंसीरिति मंत्रेण निधाय॥ ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वा
न्॥ तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथासदिति मंत्रेण सकेशाग्रं कुशपिंजूलं छित्वा प्रा
गग्राणि कृत्वा शरावस्थशरावस्थशमीपर्णोपरि कीकृत्य मातुः करे दद्यात्॥ सा च तानि सकेशान्या
नडुहे गोमये प्रागग्राणि निदध्यात्॥ एवं द्वितीयादिच्छेदनेषु पिंजूलनिधानादि समंत्रकं कार्यं॥

ग्र०म०
८५

छेदनमंत्रेतु विशेषः॥ ॐ येन धाता बृहस्पतेरग्नेरिंद्रस्य चायुषेवपत्॥ तेन त आयुषे वपामि सुश्लोक्याय
स्वस्तये इति द्वितीयछेदने॥ ॐ येन भूयश्चरात्र्यां ज्योक् च पश्याति सूर्यं॥ तेन त आयुषे वपामि सुश्लोक्याय
स्वस्तये इति तृतीयछेदने॥ चतुर्थे तु॥ ॐ येनावपत्सविता क्षुरेण॰ येन धाता बृहस्पते॰ येन भूयश्च तित्र
योपि मंत्राः॥ एवं दक्षिणे केशभागे चत्वारि छेदनानि कृत्वोत्तरेपि केशभागे एवमेव प्रत्येकं मंत्रेण चत्वारि
त्रीणि छेदनानि कुर्यात्॥ न तु सर्वमंत्रैश्चतुर्थं॥ ततः ॐ यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपय ॐ शीतो
सि केशान्॥ शुंधि शिरो मास्यायुः प्रमोषीरिति मंत्रेण यत आरभ्यामस्तकं क्षुरेण मर्चयता सुधारां नि
र न्यनापितमाहूय॥ ॐ शीतोष्णाभिरद्भिरेवं कुर्वीणो क्लेदयन् कुशलीकुर्वीति मंत्रेण नु शास्य
तं प्रेषार्थं चावबोध्य नापितेन पूर्वावशेषितशीतोष्णांबुभिरार्द्रीकरोति। तं कुमारं शिरो यथाकुलाचा
रं कल्पयित्वा शिखां वापयित्वा कुमारं स्नापयित्वा भूषयित्वा पर्ववन्मोदकसंगवस्त्राण्याश्लिष्य कदाचिद्धोम

शेषंसमाप्यब्रीह्यादिदरवेशरावचतुष्टयंनापितायदद्यात् ॥ मूयसींदक्षिणांदत्वाब्राह्मणेभ्योदशसंख्याकेभ्यो
भोजनंचसंकल्प्यकर्मसंपूर्णतांवाचयित्वा ॥ यस्यस्मृत्येत्युक्त्वाविष्णुंनमस्कुर्यात् ॥ छिपोब्राह्मणोक्तः
स्वयंकुमारस्यचगृह्णीयात् ॥ एतत्सर्वंकुमार्याअप्यमंत्रकं ॥ होमस्तुसमंत्रकइति ॥ मध्येशिरसिचू
डाकर्मनकारयेत् ॥ येचमाध्यन्दिनशाखास्तेतुगर्भिसणामपिकारयेत् ॥ सहोपनीत्याकुर्वन्तेतदादोषोनवि
द्यते ॥ ॥ इतिप्रयोगरत्नेचूडाकर्मप्रयोगः ॥ ॥ अथोपनयनं ॥ ॥ तत्रमाष्टमेष्टमेवाब्देकार्यं ॥ म
नुः ॥ ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे ॥ विष्णुः ॥ षष्ठेत्वन्नकामस्यविद्याकामस्यसप्तमे ॥ अ
ष्टमेसर्वकामस्यनवमेकांतिमिच्छतः ॥ तथासंग्रहे ॥ सप्तमेवाष्टमेवर्षेनवमेदशमेतथा ॥ एकादशेद्वादशे
वाप्युपनेयाद्विजातयः ॥ ब्रह्मवर्चसमायुष्यंतेजोन्नोपतर्पेद्रियं ॥ पशून्कामयमानोवैप्राप्नुवंतियथाक्रमं
॥ न्यायेह ॥ उत्तरायणगेसूर्येकर्तव्यंयोपनायनं ॥ [illegible]तिः ॥ वसंतेब्राह्मणमुपनयीत ॥ वैराहः ॥ माघादि

यंच मासे शुभे खलाबंधनं शिशो॥ ज्येष्ठमासेन ज्येष्ठस्य जन्ममासेन सर्वेषां॥ शुक्लपक्षे द्वितीयादिस्वाध्या
यतिथिषु नानध्यायेन नैमित्तिकानध्यायपूर्वाह्णे शुभमुहूर्ते शुभलग्ने स्याद्गुरुशुक्रयोर्बाल्यवार्द्धकास्तरादि
त्यादौ न्या तिथिर्वित्यो क्ते शुभकाले उपनयनयनयने कार्यं॥ उपनेतृक्रममाह वृद्धगार्ग्यः॥ पिता पितामहो भ्राता ताते
योगोत्रजा यत्नः॥ उपायनेधिकारी स्यात्पूर्वाभावे परः॥ तथा॥ पितैवोपनये त्पुत्रं तदभावे पितुः पिता तत्
दभावे पितुर्भ्राता तदभावे तु सोदरः॥ अधिकारासिद्धये प्रायश्चित्तमाह वृद्धविष्णुः॥ कृच्छ्रत्रयं चोपनेता त्रीन्कृ
च्छ्रांश्च बटुश्चरेत्॥ आचार्यो द्वादशसहस्रं चैव गायत्रीं जपेत् मतथा॥ नान्दीश्राद्धे कृते यश्चानध्यायस्त्वका
लिकः॥ मौञ्जीबंधं तदा कुर्याद्वेदारंभं न कारयेत्॥ अकालिका॥ गर्जनिर्घातादि निमित्तकाः॥ आश्वलाय
नानामुपनयनदिने वेदारंभाभावाभावोत ण्वेदारंभा करणां यजुर्वेदविषयं॥ आश्वलायनस्तु वृद्धिश्रा
द्धादिनात्षष्ठे दिने मध्ये मुहूर्तान्तरे समिते मैव नान्दीश्राद्धेन ततोपनयनं कुर्यात्॥ तदूर्ध्वं तु शुभमुहूर्ते श्राद्धान्त

ब्रं०रत्नं०

८१

रपूर्वकमुपनयनं यथाकालं कुर्यात्॥ ॥इत्युपनयनोपयुक्तविचारः॥ ॥अथोपनयनप्रयोगः॥ ॥तत्का
काले उपनिनीषुराचार्यः पूर्वेद्युर्बटोः परिधानार्थं शुक्लमीषद्धौतं नवं सदशं परिधेरंगोष्ठं तं वस्त्रमुत्तरीयार्थं च काषा
यवस्त्रमजिनं वा कृष्णमृगस्य यज्ञोपवीतं मौंजीमेखलां च पालाशं ब्राह्मणस्य ऋजुं सौम्यदर्शनं बटोः केशसंमितं सा
ग्रं दंडं कौपीनं तद्बंधनसूत्रं भिक्षाभाजनं च संपादयेत्॥ तत्र स्वोपनेतृत्वाधिकारसिद्धये कृच्छ्रत्रयं द्वादशसहस्रगाय
त्रीजपं वा॥ कुमारेणापि कामचारकामवादकामभक्षणादिदोषापनोदार्थं कृच्छ्रत्रयं कारयित्वा॥ स्वस्तिवाच
नांकुरार्पणग्रहयज्ञनांदीश्राद्धानि संकल्पपूर्वकं कृत्वा मंडपप्रतिष्ठां कुर्यात्॥ ॥तत्र संकल्पः॥ अस्य कुमा
रस्योपनयने ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये॥ ग्रहयज्ञं समाप्यास्य कुमारस्य द्विज
त्वसिद्ध्या वेदाध्ययनाधिकारार्थं उपनयनं करिष्ये॥ तदंगभूतं गणपतिपूजनपूर्वकं स्वस्तिवाचनं नांदी
श्राद्धं मंडपप्रतिष्ठां कुलदेवतादिस्थापनं च करिष्ये॥ उपनयनेन सह चौलकरणापेक्षे तदपि संकल्पे कीर्तयेत्॥

राम०

८१

तंत्रे शांतिवाचनग्रहयज्ञनांदीश्राद्धादीनि कुर्यात्॥ अथापरेद्युः कृतनित्यक्रियः कृतमंगलस्नानमलंकृतं कु
मारमुक्तवेलायने कृतकौतुकबंधं भोजयित्वा देशकालौ संकीर्त्यास्य कुमारस्योपनयनं कर्तुं तत्प्राच्यांगभूतं वा
पनादि करिष्य इति संकल्प्य॥ कृतवापनं स्नापितं बद्धशिखं कुमारं होमाग्नेः कौशं स्तु भस्तुह्रत्वैलत्वसमीपमानीयतन्मु
खं सम्यगीक्षेत॥ ततस्तत्वरदाहिणातउपवेश्य उपलेपनाद्यग्निप्रतिष्ठापनांते कृत्वा समिद्द्वयमादाय तिथ्यादिक
मुच्चार्यास्य कुमारस्य द्विजत्वसिध्यर्थं क्रियमाणोपनयनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मि
न्नन्वाहिते अग्नाविति सा घाघारावाज्येन त्वंततमुत्काग्निः अग्नीषोमौ प्रजापतिं चाज्येन शेषेण स्विष्टकृतमि
त्यादि सद्योयक्ष्ये इत्यंततमुक्त्वा बर्हिरास्तरणाद्यापरिसमूहनाद्याज्यसंस्कारांतं कृत्वाऽचार्योऽग्नेः पश्चाद
वस्थाय कुमारं प्राङ्मुखमवस्थाप्य कौपीनार्थं त्रिवृतं कार्पाससूत्रं कटावाबध्य कौपीनं परिधाप्य द्वितीय
नग्नस्तु लवप्रतिनिधिभूतमहतं सुक्षौमं वासः समंत्रं परिधाप्याऽन्येन काषायकासमात्रथेव प्रावारयेत॥

87

प्र०र०त्न०

८८

तत्रमंत्रः ॥ युवंवस्त्राणीत्यस्यश्रोचथ्यादीर्घतमा ॥ मित्रावरुणौत्रिष्टुप् ॥ वासोधारणेवि० ॥ ॐ युवंवस्त्राणि ॥ रू० १ प्रा
वरणार्थंकृष्णाजिनंया ॥ तत्र ॥ त्र्यंगुलंतुबहिर्लोमयद्वास्याच्चतुरंगुलं ॥ अजिनंधारयेद्विप्रस्त्वष्टविंशाष्टषोड
शैः ॥ मित्रस्यचक्षुरित्यस्यवामदेवोजिनंत्रिष्टुप् ॥ अजिनधारणेवि० ॥ ॐ मित्रस्यचक्षुर्धरुणंबलीयस्तेजो
यशस्वीस्थविरंसमिद्धं ॥ अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनंदधेहं ॥ ततोद्विजन्ताचिह्नार्थंयज्ञोपवी
तंदद्यात् ॥ यज्ञोपवीतमित्यस्यपरब्रह्मपरमात्मात्रिष्टुप् ॥ श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थंयज्ञोपवीतधार
णेवि० ॥ ॐ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंब
लमस्तुतेजः ॥ इतिमंत्रंवाचयित्वातद्दक्षिणबाहुमुद्धृत्यउपवीतंधारयित्वाकुमारमात्मनोग्रेमध्येनयह
त्तपात्रोत्तरभागंगमयित्वातत्रविविष्टवराचमय्यपुनस्तत्रैवानीयतस्यदक्षिणतउपवेश्यबर्हिरास्तरणादिस्रुवं
संमार्जनान्तंकृत्वाब्रह्मचार्यन्वारब्धःस्रुवधाराधाराघारांतमाज्यभागवर्जंकुर्यात् ॥ ततःअग्नआयूंषीतिति

राम०

८८

स्वस्त्योशतंवैखानसा ऋषयः अग्निःपवमानोदेवता गायत्रीछंदः ॥ उपनयनप्रधानाज्यहोमे वि० ॥ ॐ अग्नआयूं
षिपवसे० ऋ० ३ अग्नयेपवमानायेदंनममेति त्रिष्वपित्यागः ॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ विनियोगः
प्राग्वत् ॥ ॐ प्रजापतयेनत्वदेतान्० ऋ० १ प्रजापतयइदं० ॥ अथाचार्यउत्तरतोग्नेःप्राङ्मुखस्तिष्ठेत् ॥ कुमारोप्यग्न्या
चार्ययोर्मध्येनगत्वाचार्यस्याभिमुखस्तिष्ठेत् ॥ अथाचार्यःसंयतांजलिःकुमारस्यशुचित्वसिद्धयेसवितृदेवतात्
मनेचांजलिक्षारणंकुर्यात् ॥ तच्चेत्थं ॥ शुद्धोदकेनशिष्यांजलिमापूर्यस्वस्यांजलिमप्येनपूरयित्वा ॥ तत्सवितु
रित्यस्यश्यावाश्वःसवितानुष्टुप् ॥ अवक्षारणेवि० ॥ ॐ तत्सवितुर्वृणीमहे० ऋ० १ अनेनस्वांजल्युदकंशिष्यां
जलाववक्षार्यतज्जलंकुमारोंजलिनैवावक्षारयेत् ॥ ततःशिष्याप्त्यसिध्यर्थंबटोर्हस्तंगृह्णीयात् ॥ तत्रमंत्रः ॥
देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णामीतियजुरंते ॥ अमुकशर्मन्निति कुमा
रस्याभिवादनेकेनामशर्मांतेसंबुध्यान्तेदृश्यपदंद्वितीयेनपाणिनाकुमारस्यसांगुष्ठंदक्षिणंपाणिंगृह्णी

प्र०रत्न

८९

त्वा॥ पुनरपि पूर्ववदुदकप्रदानादि कृत्वा सविता ते हस्तमग्रभीदिति मंत्रांते पूर्ववद्दूनामोत्का हस्तं गृहीत्वा पुनर
पि पूर्ववत्प्रदापित्वा॥ अग्निराचार्यस्तवेति मंत्रांते पूर्ववत्तन्नामनिर्दिश्य हस्तं गृह्णीयात्॥ अथाचार्यो ब्रह्मचारिण
सह निष्क्रम्य॥ देवस्य त्वितस्यैष ते ब्रह्मचारी तं गोपाय समामृतेस्तु श्चोर्यसरक्षणार्थं व्रतपतये आदित्याय बहुदद
दामीति मनसा स्मरन् ब्रह्मचारिणमादित्यमीक्षयेत्॥ ततउभावपि पूर्ववदुत्तरतोग्नेरन्योन्याभिमुखौ तिष्ठे
तां॥ अथाचार्यः कस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यसि कस्त्वा कमुपनयते काय त्वा परिददामीति मंत्रे–प
न्कुमारं प्रजापतये रक्षणार्थं मनसा समर्प्य॥ युवा सुवासा इत्यस्य कौशिको विश्वामित्राः एपा त्रिष्टुप्॥ पूर्वोहि
चैषमश्मरहिणावर्तेनेउत्तराद्र्यं चेमुच्चारयन्नद्दमप्रदक्षिणमात्मपाणिभ्यां बहुहृदयालंबनेविष्णु॥ ॐ युवा सुवासा
:परिवीत आगात्स उ जायमानः इत्यर्द्धर्चं समुच्चारयन्नद्दमप्रदक्षिणमावर्तयन्नात्माभिमुखमवस्थापयेत्॥ ततः कु
मारास्य हृदयमालभ्य पाणिना मपि त्वा॥ उं तं धीरासः कवय उन्नयंति स्वाध्याऽ मनसा देवयंतः इत्युत्तरार्द्धमु

स्म०

८९

स्थापयेत हृदयप्रदेशं संस्कृत्य पाणिभ्यां स्पृशेत् ॥ तत आचार्य आत्मानमग्निं चांतरेण बटुं नीत्वा प्रत्यगग्नेः स्वयमुप
विश्यस्य दक्षिणतः प्राङ्मुखं तमुपवेशयेत् ॥ ततो बटुरग्नेः परिसमूहनपर्युक्षणे कृत्वा हृतिकारमते त्वं कृत्वा ॥
अग्नये समिधामि धाम घामिधो ब्रह्मणा वयं तस्य हिरण्यगर्भो ऽग्निस्त्रिष्टुप् ॥ समिदाधाने वि० ॥ ॐ अग्नये समिधमा
हार्षं बृहते जातवेदसे ॥ तया त्वमग्ने वर्द्धस्व समिधा ब्रह्मणा वयं स्वाहेति समिधमादधाया ऽग्नय इदं न ममेति उ
दकस्पर्शः ॥ कृत्वा पाणिं प्रक्षाल्याग्निं स्पृष्ट्वा ॐ तेजसा मा समनज्मीति संहतौ हस्तौ मुखमवाङ्मृज्य ऽन्यया पाणिं
प्रक्षाल्य पुनरग्निं स्पृष्ट्वा मंत्रेण तथैव मुखं विमृज्य पाणिं प्रक्षाल्याग्निं स्पृष्ट्वा मंत्रेण तथैव मुखं विमृज्य पा
णिं प्रक्षालयेत् ॥ ततस्तिष्ठन्प्रणाति मुद्रां कृत्वा मयि मेधामिति षण्णां हिरण्यगर्भ ऋषिः पूर्वेषां त्रयाणामग्नि
रिन्द्रसूर्या देवताः उत्तरत्रयाणामग्निर्देवता गायत्री छंदः ॥ अग्न्युपस्थाने वि० ॥ ॐ मयि मेधां मयि प्रजां मय्यग्नि
स्तेजो दधातु ॥ मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु ॥ मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ यत्ते अ

89

प्र०स्त०
९०

यत्तेजस्तेनाहंतेजस्वीभूयासं॥यत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासं॥यत्तेअग्नेहरस्तेनाहंहरस्वीभूयासं॥इति
षडामेत्रैरग्नीमुपस्थाय॥मानस्तोकेकुत्सोरुद्रो जगती॥विभूतिग्रहस्रुवेनाहरणेवि०॥ॐमानस्तोकेतनये०
रु०क०१ इत्यनेनभस्मादायपथाचारं॥त्र्यायुषंजमदग्नेरितिललाटे॥कश्यपस्यत्र्यायुषमितिकंठे॥अगस्त्य
स्यत्र्यायुषमितिनाभ्यां॥यद्देवानांत्र्यायुषमितिदक्षिणांसे॥तन्मेअस्तुत्र्यायुषमितिवामांसे॥शतायुषमिति
शिरसिभस्मधारयेत॥पुनःपरिसमूहनपर्युक्षणंकृत्वाकृतांजलिस्तिष्ठन्॥ओंचमेस्वरश्चमेयज्ञोपचतेन
मश्च॥यत्तेन्यूनंतस्मैतस्मैतउपयत्तेऽतिरिक्तंतस्मैतेनमः॥अग्नयेनमः॥स्वस्तीश्रद्धांमेधांयशःप्रज्ञांवि
द्यांबुद्धिंश्रियंबलं॥आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनः॥श्रीदेहिमेहव्यवाहनोन्नमः इत्य॥ग्निमुपस्था
याऽग्नेरन्तरतोगत्वाप्रत्यङ्मुखोभूयाचार्याभिमुखोभूयाचार्याभिमुखोभूत्वादक्षिणंजान्वनुभूतलेनिधा
यपाणिभ्यांपथासव्यदक्षिणाभ्यांवेसंस्पृश्यव्यस्तपाणिना।चार्यस्यदक्षिणपादंस्वदक्षिणहस्तेनसव्यंचस

राम०
९०

व्यस्तजानुप्रभातेपादपार्यंतेस्य व्यस्तपाणिराचार्य्यस्याऽमुकगोत्रोऽमुकशर्माऽहं अभिवादयेत्युच्चारयन्
।शिरोवनतिपूर्वकमभिवाद्य आचार्येणायुष्मान्भव सौम्य देवदत्ता ३ इतिप्रयुक्ताशीर्वादो विनयावनतो भूत्वा सा
वित्र्युपदेशं वांछन्नधीहि भोः सावित्रीं भो अनुब्रूहीत्याचार्यं प्रत्युक्त्वोषामपाणिमुत्तानीकृत्य दक्षिणपाणिन्यङ्कु
ब्जीकृत्य संधायपाणिद्वयमंगुलीश्चांगुष्ठौ च दृढीकृत्य कृतं बद्धांजलिं दक्षिणांके निधायाचार्योतिकआसीत
॥ अथाचार्यस्तदंजलिं तत्परिधानीयवाससाच्छाद्य स्वपाणिभ्यां तदंजलिं परिगृह्य प्रणवव्याहृतीपूर्वकं
सावित्रीं प्रथमं पादशः स्वयमुक्त्वा वाचयेत्॥ ततोऽर्द्धर्चशः ततः सर्वां॥ एवंग्रहणशक्तौ यथाशक्ति स्वयमु
क्त्वा वाचयेत्पृथ्या। प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता गायत्री छंदः॥ व्याहृतिमंत्रस्य प्रजापतिः प्र
जापतिः प्रजापतिर्बृहती॥ गायत्र्या विश्वामित्रः सविता गायत्री॥ उपनयने वि०॥ गायत्रीवाचयित्वा॥ ततः
ममव्रतइत्यस्य प्रजापतेर्ऋषिः॥ बृहस्पतिर्देवता॥ त्रिष्टुप् छंदः॥ बटोर्हृदये कुशांगुलिपाणिनिधाने

विणा ॐ मम व्रते हृदयं ते दधामि मम चित्तमनु चित्तं ते अस्तु ॥ मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु म
ह्यमिति ॥ स्वपाणिमूर्ध्वांगुलिं ब्रह्मचारिणो हृदयदेशे निधाय तस्य रक्षार्थमुपस्थं च मेखलयामाबध्नीयात् ॥
इयं दुरुक्तादिति द्वयोर्वा मेखलात्रिष्टुप् ॥ मेखलाबंधने विं० ॥ ॐ इयं दुरुक्तात्परिबाधमाना शर्मं वरूथं पु
नती न आगात् ॥ प्राणापानाभ्यां बलमाभरंती प्रिया देवानां सुभगा मेखलेयं ॥ ऋतस्य गोप्त्री तपसः परस्वी
घ्नती रक्षः सहमाना अरातीः ॥ सा नः समंतमनु परीहि भद्रया भर्तारस्ते मेखले मा रिषामेति वाचयित्वा मेख
लां त्रिरावर्तनाभिप्रदेशे ग्रंथित्रयं कुर्यात् ॥ तदा बटु रहस्यगम्यहितदेवत्रयेणाहतोहमिति मन्यत ॥
तत लब्धमेस्ययोगक्षेमार्थमधर्मनिवृत्तये च केशसमितं पालाशदंडं दद्यात् ॥ स्वस्ति न इत्यस्य स्वस्त्या
त्रेयो विश्वेदेवास्त्रिष्टुप् ॥ दंडदाने विं० ॥ ॐ स्वस्ति नो मिमीतामश्विना भगः० ऋ० १ ततो बटुस्तं दंडं गृह्णन्मे
त्रे ॥ अरंतं दमयि त्वा मां मार्गे संस्थापयन्स्वयं दंडः करे स्थितो यस्मात्तस्मात्त्वद्रूपतो भयमिति वाचयेत् ॥

ततः कुमारस्याचारमादिशेत्॥ ब्रह्मचार्यसि॥ आचमनं कुरु॥ मूत्रपुरीषादौ शुध्यर्थमित्यर्थः॥ कर्म कु
रु संध्योपासनादि इत्यर्थः॥ दिवा मा स्वाप्सीः॥ आचार्याधीनो वेदमधीष्व॥ सायंप्रातर्भिक्षेथाः॥ सायंप्रा
तः समिधमाधेहि॥ द्वादशवर्षाणि वेदस्य ग्रहणांतं कुत॥ तत्रैव वर्षे वा ब्रह्मचर्यं चरेदिति॥ प्रैषार्थान्वा
चयेत्॥ ततो विरूपाक्षजपादि होमशेषं समाप्य भिंत्रमे भोजनानंतरं कुत॥ तत्रैव सायंप्रातरग्निकार्यं का
र्यं॥ ततोनुप्रवचनीयहोमब्राह्मणभोजनपर्यंतं तंडुलरूपां भिक्षां याचेत॥ तत्र क्रमः॥ भिक्षापा
त्रमादायादौ मातरं भवतीभिक्षां ददात्विति॥ अथवा पितरं॥ भवान्भिक्षां ददात्विति॥ एवं मातुः स्व
भगिनीमन्यान पिवांधवानत्याख्यायिनोऽप्रत्याख्यायिनी॥ भैक्षमाचार्याय निवेदय मध्याह्नसं
ध्याकुर्यादिति प्रयोगपारिजाते॥ नैतिकस्य मध्याह्नीकारः॥ ब्राह्मणाः शिक्षाग्रहणं देशतेशतं वा विप्रा उ
पनयने भोज्याः॥ ततो गुरुः संनिधाय चयलब्धिष्ठन्नहः शेषं नो होमायेवं दितसंध्याउपनायनिका

९१

प्र०र०त०
९२

ष्येरं तिकस्त्रासीनः प्राणानायम्य प्रायममग्निकार्यं करिष्य इति संकल्प्य परिसमुह्य पर्युक्ष्य पूर्ववत्साग्नि
धमाधायत्रिर्मुखं पूर्ववद्दवमङ्गं स्वाक्रमणमंत्रेरुपस्थायमानस्तोक इति भस्मादाय त्र्यायुषमिति तत्र
स्थाने पु पूर्ववद्धृत्वा पुनः परिसमूह्य पर्युक्ष्योक्त्वा कृतांजलिः स्विष्टे त्वोचमरं स्नुपतिष्ठेत ॥ ॥
अथाचार्यो सूत्रिमिते ग्नेः पश्चात्त्वासीनेः प्राणानायम्य ब्रह्मचारिष्य इति संकल्प्याघकं गांदक्षिणा
तउपवेशयेति ष्यारिकं संकीर्त्य उपनयनांगभूतमनुप्रवचनीयहोमं करिष्य इति संकल्प्याच
करिष्यमाणोऽनुप्रवचनीयहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये ऽस्मिन्नन्वाहिते ग्नावि
त्याघाघारावाज्येनेत्यंतमुक्त्वा सदसस्पतिं सवितारमग्निमिति प्रधानदेवताः स्वकृद्भ्यो [illegible] शेषे
णे स्विष्टकृतमित्यादि समिधायस्य इत्यंतमुक्त्वा भूर्भुवः त्वा हैति द्वे समिधावद्धृत्वा परिसमूह्य नादि
प्रणीताप्रणयनांतं कृत्वा तत्र [illegible] यं चतुरश्चतुरो मुष्टीन्त्रिहंडादेवता पस्त्रावि प्रत्ययस्यावि

राम०
९२

प्रत्रपभोजनस्य चपर्यो हं निरूप्य तत्तु गुरो स्तु त्रिः फली कृत्य त्रिः प्रक्षाल्य श्रपयित्वा मृतस्थाली पाकं शु
त्वाचार्याय निवेदयेत् बटुः ॥ बटोरवेंकरग्णाशक्तो तद्बंधुनान्येन कारयेत् ॥ ततो ब्रह्मचारी शान्त्वा रुद्रो
गुरुरान्त्यसंस्कौ राघाघारांतं कृत्वा प्रधानहोमं कुर्यात् ॥ अवदानधर्मेणावदाय सदसस्पति मित्यस्य
ति मित्यस्य कारवो मेधातिथिः सदसस्पति गायत्री ॥ अनुप्रवचनीय प्रधानहोमे कुर्यात् ॥ अवदाय चरुं वि॰
॥ ॐ सदसस्पति मद्भुतं० सिषं स्वाहा ॥ सदसस्पतय इदं ॥ तत्सवितुरित्यस्य गाथिनो विश्वामित्रः स
विता गायत्री ॥ विनियोगः प्राग्वत् ॥ ॐ तत्सवितुर्वरेण्यं० प्रचोदयात् स्वाहा ॥ सवित्र इदं० ॥ ऋषिभ्यः स्वा
हा ॥ ऋषिभ्य इदं ॥ एवं त्रिभिर्मंत्रैः हुत्वा स्विष्टकृदादि होमशेषं समाप्य तद्वशिष्टान्नेन त्र्यवरान् ब्रा
ह्मणान् भोजयित्वा ते वेदसमाप्तिं वाचयेत् ॥ ततो ब्रह्मचारी अक्षारलवणामन्नं भुक्त्वा अधःशायी ति
मेधोजनेयावदेव मेवगुरुप्रसादयन्वर्तेत ॥ यद्यागर्जना घनध्यायशेकातदारिवैव चरुं श्रपयेत् ॥

92

होममन्त्रमात्रं संध्योत्तरमेव॥ तथा नानध्यायदोषः॥ उक्तं संग्रहे॥ न संध्यागर्जिते काले न हस्तुत्पातदूषिते॥
ब्रह्मौदनं पचेदग्नौ यच्चैवं चैत्रानि वर्तते॥ तथा॥ ब्रह्मौदनं पचेदग्नौ यच्चान्यन्न तु दुष्यति॥ तदूषिते॥ ब्रह्मौद
था चोपनयनाऽनुप्रवचनीयचरुश्रपणादौ रेतरानध्याये पुनरुपनयने॥ एष प्रयोगः॥ स्वस्वकालकृ
तपूर्वसंस्कारस्य॥ असंस्कृतस्य तु विशेष उच्यते॥ आचार्य उपनयनात्पूर्वेद्युर्नेव बहूनां सह मंगल
स्नातः प्राणानायम्य तिथ्यादि संकीर्त्य मम कुमारस्य गर्भाधानपुंसवनसीमंतोन्नयनविष्णुबलिजा
तकर्मनामकरणनिष्क्रमणान्नप्राशनचौलकर्मांतानां नवसंस्काराणां कालातिपत्तिदोषपरिहा
र द्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रायश्चित्तहोमं करिष्ये इति संकल्प्योपलेपादि पूर्णपात्रनिधानांतं कृ
त्वा विधिवदाज्यं संस्कृत्याघारांतं कृत्वातीतकर्मसंख्यया ॐ भूर्भुवः स्वः स्वाहेत्याज्याहुतीर्हुत्वा स्वि
ष्टकृदादिहोमशेषं समाप्य॥ चौलातिरिक्तसंस्काराणां प्रमादादकरणे प्रत्येकं पादकृच्छ्रं चौलाक

करणेईद्धक्कछंबुद्धिपूर्वंचौलंतिविक्ताकरणेप्रत्येकमर्द्धक्कछंशूद्रनाकारयेत्॥अशक्तौतत्तत्प्राम्नाय
त्वेनगोदानतिलाज्यतिसहस्त्ररूशसहस्त्रगायत्रीजपद्वादशब्राह्मणभोजनादिरूपैकंप्रायश्चित्तंकारयित्वा
ऽतीतानिजातकर्मादीनिकृत्वापूर्वोक्तप्रकारेणोपनयनतंत्रंसर्वमाचरेत्॥उपनयनेनसहचौलक
रणेपूर्वेद्युःसंस्कारद्वयंसंकीर्त्ययुगपत्स्वस्तिवाचनग्रहयज्ञनांदीश्राद्धानिकृत्वापरेद्युर्मंगलस्नाना
दिब्रीह्याद्दिपात्रचतुष्टयदानांतंपूर्वोक्तंचौलप्रयोगंसर्वंकृत्वापुनस्तीर्थ्याद्दिसंकीर्त्यउपनयनेसंक
ल्प्याद्यनुप्रवचनीयहोमांतंसर्वंकार्यं॥ ॥इत्युपनयनप्रयोगः॥ ॥अथमेधाजननप्रयोगः॥ ॥
प्रागुक्तक्रमेणाचरितव्रतस्यब्रह्मचारिणोमेधासिध्यर्थमाचार्यश्चतुर्थदिवसेमेधाजननाख्यं
कुर्यात्॥तत्रायंक्रमः॥प्रत्यग्वाययोरकूप्रागुदक्वूपूर्वान्यतमस्यांदिशिशाखावर्जितंपलाशंत
दभावेसशाखंवातस्योपत्रांकुरसमृद्धभावेकुशस्तंबंवातदसंभवेत्वग्गृहेशानदिग्भागेसर्वतो

प्र०रत्न
९४

द्वादशांगुलांत्रिमेखलंवेदिं कृत्वातस्यांपत्रांकुरसमन्वितामाढ्ढीयपलाशशाखांसम्मूलं कुशस्तंबवाप्र
तिष्ठाप्यब्रह्मचारिणान्वारब्धःसंकल्पपूर्वकंपुण्याहंकुर्यात्॥तत्रक्रमः॥तिथ्यादिसंकीर्त्यममकुमा
रस्योपनयनव्रतसमाप्तिवेदग्रहणसामर्थ्यलक्षणपरिज्ञानमेधासिद्धिद्वाराश्रीपरमेश्वरप्रीत्य
र्थंमेधाजननाख्यंकर्मकरिष्य इति संकल्प्यशौनकमतेपुण्याहवाचनमपिकृत्वामेधाजनन
कर्मणिपूर्वोक्तफलसिद्ध्यर्थंमेधापरनामकसावित्रीपूजांकरिष्ये इति संकल्प्यपलाशशाखा
यांमेधायैनमः इति नाममंत्रेणवाहनाद्युपचारान्कृत्वायावकेसक्तुमोदकमिश्रमन्नंनिवेद्यपुन
श्चपूर्ववदभ्यर्च्यब्रह्मचारिणाप्रणामय्यास्तुश्रवसेत्यात्रोरकेनसेचनंकुर्वताबटुनात्रिःप्रदक्षि
णाकारयन्मंत्रंवाचयेत्॥प्रणामयेच्च॥ॐसुश्रवःसुश्रवा असियथात्वंसुश्रवःसुश्रवा अस्येवंमां
सुश्रवःसौश्रवसंकुरु॥पथात्वंदेवानांयज्ञस्यनिधिपोस्येवमहंमनुष्याणांवेदस्यनिधिपोभूयासं

रम०
९४

मेधाभिंदूस्त्रा
जिस्थ ५

॥मिति प्रतिदक्षिणं मंत्रावृत्तिः॥ प्रणमं चकारयेत्॥ ततो ब्रह्मचारी स्नात्वा नवाग्निय ज्ञोपवीताजिनमेखला
दंडाननुपनयनवत्समंत्रं धृत्वा पुराणानि यत्वा शसंन्निधौ विसृज्य पूर्वं धृतवाससी गुरवे दत्वा मेधामह्यमि
ति सूक्तं विप्रैः पाठयित्वा विधिवत्स्वस्तिवाचनं कृत्वा ब्राह्मणेभ्यो दक्षिणां यथाशक्ति दत्वा तान्भोजयित्वा न
नमस्कृत्याशिषो गृह्णीयात्॥ ॥अथ मेधामह्यमिति सूक्तं॥ ॥ॐ मेधामह्यमंगिरसो मेधां सप्तऋष
यो ददुः॥ मेधां धाता ददातु ते। मेधांते वरुणो राजा मेधां देवी सरस्वती॥ मेधांते अश्विनौ धासामामामाविशतोऽदूं मे
देवावावत्तां पुष्करस्रजा॥ या मेधा अप्सरासु गंधर्वेषु च यन्मनः॥ दैवी या मानुषी मेयन्मे नोकं तद्रमतां
शकेयं यदहं ब्रुवे॥ निशामतं निशामयि मयि व्रतं सह प्रियेण भूयासं ब्रह्मणा संगमेमहि॥ शरीरं मे विच
क्षणं वाङ्मे मधुमद्दुहा॥ अवृद्धमहमसौ सूर्यो ब्रह्मणानी स्वश्रुतं मे मा प्रहासीः॥ मेधां देवीं मनसा रेजमा
नां गंधर्वजुष्टां प्रति नो जुषस्व॥ महां मेधां वदमहां अयं वदमेधावी भूयासमजराजमिष्णु॥ सदसस्पति

सद्भुतं प्रियमिंद्रस्य काम्यं॥ सनिं मेधामयासिषं॥ यां मेधां देवगणाः पितरश्चोपासते॥ तयामामेधयाग्नेमेधा
विनं कुरु॥ मेधाव्यं सुगणाः सुप्रतीकः सुद्दामनाः सत्यमतिः सुशेवः॥ महायशाधारयिष्णुः प्रवक्ता भूयासम्
मस्यै चूडद्याप्रयोगे॥ ॥इति रामेश्वरभट्टसुतनारायणभट्टकृते प्रयोगरत्ने मेधाजननांतउपनयनप्रयो
गः॥ ॥अथ महानाम्न्यादिव्रतानि॥ ॥तत्रादौ तावत्॥ जन्मप्रभृति त्रयोदशे वर्षे उक्तोदगयनादिका
ले महानाम्नीव्रतं कार्यं॥ पूर्वेद्युराचार्यो ब्रह्मचारिणा सह स्नातः कृतनित्यक्रियः प्राणानायम्य ति
थ्यादि संकीर्त्य ममं ब्रह्मचारिणो महानाम्नीरध्यापयिष्यतस्तदादौ महानाम्नीव्रतसिद्धिद्वारा श्रीपरमे
श्वरप्रीत्यर्थं होमं करिष्ये तदंग[illegible]तया स्वस्तिवाचनं कुमार्पणा ग्रहयज्ञान्पुरुष्य कर्माद्यानि क
रिष्ये इति संकल्प्य पूर्वोक्तवत्तानि कृत्वा परेद्युर्ब्रह्मचारिणो वपनं स्नानं कारयित्वा बद्धशिखं तं सु
मुहूर्ते स्वस्य दक्षिणतः उपवेश्य विधिवत्कौतुकमाबध्य संकल्प्य पूर्ववत्कमुपलेपनाद्यग्निप्रतिष्ठा

पनांतं कर्म कृत्वाभिहूयमाराधयितव्यादि संकीर्त्यो ऽस्य ब्रह्मचारिणो महानाम्नीव्रतांगभूतं होमं कर्तुं
देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मिन्नन्वाहिते ऽग्नाविध्मापाघारावाज्येनेत्यंतमुक्त्वा त्रिर
ग्निं यवमानेन प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्य इत्यंतमुक्त्वा व्याहृतिभिरन्वा
धायेध्मं दृष्ट्वा त्यागं कृत्वा परिसमूहनाद्याज्यसंस्कारांतं कृत्वा ऽऽचार्यस्त्वायाग्नेः पश्चादुदक्स्थाय ब्रह्म
चारिणं प्राङ्मुखमवस्थाप्य कौपीनार्थं त्रिवृतं कार्पाससूत्रमाबध्य कौपीनं धारयित्वा युवं वस्त्राणी
ति मंत्राभ्यामहतं शुक्लं वासः परिधाप्यान्येन काषायवस्त्रेण प्रावृणुयात्॥ ततो यज्ञोपवीतं समंत्रं धा
ध्ये रयित्वा तमात्मनो ऽग्नेर्मध्ये यत्र पात्रांतरभागं गमयित्वा तत्र विधिवदाचम्य तत्पश्चाद्वानीयोपवेश्य बर्हिष्याज्य म
सादनांतं कृत्वा ब्रह्मचारिणा दक्षिणहस्तेनान्वारब्धः समिद्धाघारांतं कृत्वाज्यभागवर्जं मध्यन्वायं हुत्वा तारि
भिश्चतुर्भिश्चतुर्भिश्च ततस्त्र्याज्याहुतीर्जुहुयात्॥ अग्न आयूंषि पवस इति तिसृणां शतं वैखानसा ऋषयः॥

प्र०रत्न०
९६

अग्निः पवमानो देवता॥ गायत्री छंदः॥ प्रधानाज्यहोमे वि०॥ ॐ अग्न आयूंषि० ऋ० क० ३ अग्नये पवमानायेदं न
मम इति त्यागः॥ प्रजापतेर्हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ प्रधानाज्यहोमे वि०॥ ॐ प्रजापवमानायुष्ठेते० ऋ० क० १
प्रजापतय इदं०॥ ततः आचार्य उत्तरतोऽग्नेः प्राङ्मुखो ब्रह्मचारी चाचार्याग्न्योर्मध्येन गत्वाचार्यस्य पुरोऽभिमुखस्थि
ष्ठेत्॥ ततः आचार्यः संयतः सूर्याभिमुखस्य शुचित्वसिद्ध्यै सवितृत्वमये चांजलिक्षारणं कुर्यात्॥ तत्क्र
मः॥ जलपात्रोदकेनाशिष्यांजलिमापूर्य स्वस्यांजलिमन्येन पूरयित्वा तत्सवितुर्वरेणीमइत्यस्य श्यावा
श्वः सविता नुष्टुप्॥ अंजलिक्षारणे वि०॥ ॐ तत्सवितुर्वृणीमहे० ऋ० क० १ इति स्वांजलिस्थोदकं शिष्यां
जलावभिच्यवन्तं जलं बटोरंजलिनैवावक्षारयेत्॥ ततः आचार्यो बटोर्हस्तं गृह्णीयात्॥ तत्र मंत्रः॥ देवस्य
त्वा० पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यमुकशर्मन्निति बटोरभिवादनिकं नाम शर्मांतं संबुध्यंतं मंत्रांते निर्दि
श्य परः क्षिणपाणिपाणिना सांगुष्ठं बटोर्दक्षिणपाणिं गृहीत्वा पुनरपि पूर्ववदुदकपूरणादिकं त्वा स

रत्न०
९६

वितातेहस्तमग्रभीरितिमंत्रांते पूर्ववन्नाम निर्दिश्य हस्तं गृहीत्वा पुनरपि पूर्ववत्सरयित्वाऽग्निराचार्य
स्तवेति मंत्रांते पूर्ववं नाम निर्दिश्य हस्तं गृह्णीयात्॥ ततो बटुं संरक्षणार्थं ब्रजपतये आदित्याय बटुं ददा
मीति मनसा स्मरन्नुद्यात्॥ तत्र मंत्रः॥ बटु नामहं निष्क्रम्य देव सवितरेषते ब्रह्मचारी तं गोपायस मामृते
स्तु वार्यत मृत्युरित्यमी हूयेत्॥ ततस्त भावम्पुत्ररतोऽग्नेः पूर्ववदन्योन्याभिमुखेवतिष्ठेतां॥ अथाचार्यः क
स्य ब्रह्मचार्यसि प्राणस्य ०कस्त्वाप रिददामीति मंत्रे जयन्प्रजापतये स्वहस्तार्थं बटुं मनसा समर्प्ये॥ पूर्वे
वद्उपविश्य परं यं रुद्रकेति मंत्रेण मेखला मा बध्य॥ अरं तरमयित्वा ०तस्माद्रक्षयतो भयमिति दंडं प्रदा
य॥ पुराणा नियज्ञोपवीतादी निजलेनेन क्रियमाणस्विष्टकृदादि होमशेषं समापयेत्॥ अथ गुरुणा महानाम्नी
व्रतं चरेति ब्रह्मचारी प्रेषितश्चरिष्यामीत्युक्त्वा संवत्सर पर्यंत केशश्मश्रु लोमनखधारण भिक्षाचरणा
दिव्रते पूर्ववच्चयेत्॥ पूर्ववच्चयेत्॥ पूर्णे वर्षे उदगयने शुक्लपक्षे बटुर्गुरोर्महानाम्नीः श्रावयन्त्या माद्धीहि

प्र०र०ल०
८७

विविक्तंस्थुचिदेशेदेवायतनादिं गच्छेत्॥ तत्र गुरुः स्तिथ्यादि संकीर्त्यास्य ब्रह्मचारिणो महानाम्नीव्रतांग
भूतव्रतसंपत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं तदंगहोमं कर्तुमुपलेपादिकं करिष्य इति संकल्प्य॥ स्थंडिलो
ल्लेखनाद्यग्निप्रतिष्ठापनांतं कृत्वा पुनस्तिथ्यादि संकीर्त्यास्मिन्होमे देवतापरिग्रहार्थमन्वाधानं करि
ष्य इत्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा॥ अग्निं० संशाधनं० अग्निं० अस्मृयंतां० अनुमतिं० प्रदातारं
० अग्निं० वायुं० सूर्यं० क्रमरात्र द्रव्येराशेषेण स्विष्टकृतमित्यादिं प्रधानस्य इत्यन्वाधाय परिसमू
हनादिं पूर्णपात्रनिधानांतं कृत्वा॥ ततो वटुस्थालीपाकविधानेन होमायात्मभोजनाय च पर्याप्तं स्त
डुलान्नवभ्यो देवताभ्यस्तण्डुलान्निरूप्य तथैव प्रोक्ष्य महानाम्नी देवताप्रीत्यर्थं तत्र तिलान्प्रक्षिप्य श्रप
यित्वाचार्यः प्रभृतस्थालीपाक इति विहाययेत्॥ ततः आचार्यो ब्रह्मचारिणो व्रतलोपानपस्खाते
न व्रतलोपयुक्तस्य गोरवत्रापथे विचार्यगुरुश्वेदत्तोक्तप्रायश्चित्तं कारयित्वा पुनः संवत्सरं ब्र

राम०
८७

तमादिशेत्॥ लघुश्चेत्प्रायश्चित्तमेव कारयित्वा पुत्रेणैतेनान्वारब्ध आज्यसंस्काराद्याघाराज्यभागांते
क्षेवावदानधर्मेणा चरुमवदाय॥ अग्नावग्निरित्यादिभिरेकपंचाशत्योकैः परामंत्रैर्व्यस्ताभिर्व्याहृतिभि
श्च नवाहुतीर्जुहुयात्॥ तेच मंत्राः॥ ॐ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः॥
तस्मै जुहोमि हविषा घृतेन मा देवानां मोमुहद्भागधेयं मो अस्माकं मोमुहद्भागधेयं स्वाहा॥ अग्नय
इदं०॥ या तिरश्ची निपद्यते अहं विधरणी इति॥ तां त्वा घृतस्य धारया यजे संधारानीमहं
स्वाहा॥ [illegible] संराधन्यै इदं०॥ यस्मै त्वा काम कामाय वयं सम्राड् यजामहे॥ तमस्मभ्यं कामं दत्त्वा
थेदं त्वं घृतं पिब स्वाहा॥ अग्नय इदं०॥ अयं वो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिंदन्॥ अ
यं शत्रून् जयतु जर्हृषाणो यं वाजं जय इदं०॥ अग्नये वो त्र त्पंत्यै चानुमत्यै च स्वाहा॥ अस्यंत्यै
अनुमत्यै इदं०॥ प्रदात्रे स्वाहा॥ प्रदात्रे इंद्रायेदं०॥ ॐ भूः स्वाहा॥ अग्नय इदं०॥ भुवः स्वाहा

प्र०रत्न०
९८

॥ चायवरुह्वं ॥ स्वः स्वाहा ॥ स्रुच्यये २० ॥ एवं नवाज्जतीर्हुत्वा स्विष्टकृदर्थं स्रुक्यां चरुमवदाय तां बर्हिषि नि
धाय ब्रह्मचारी स्त्रां शातिरं तस्छोचीयाकसर्वं मा ह शानेति ॥ सच सर्वं चरुस्म न्नायात् ॥ आचार्यं भुक्तवं
तमाचां ततेन ब्रतपतिमादित्यं प्रतप्ते यतउपतिष्ठस्वेति प्रेष्यत् ॥ ततः सः स्वेब्रतानां व्रतपतेर सिन्नं तं चरिष्या
मितच्छकेयं तेन शकेयं तेन राध्यासामित्युपतिष्ठमानो ऽञ्जलिः परां जलिं सिंचेत् ॥ ततेन आचार्यस्तेन मंत्रे
णाकृतां जलिं बटुमादित्यमुपस्थापयेत् ॥ ततः अनालोक्या लोका संभाष्य संभाषणा निवर्तयेत् बटुना
ह्निसंमीलने वाग्यमनं चकारयेत्वा त्रयस्त्रिंशद्देवता प्रीत्यर्थं वेदत्रयमनुस्मरन्त्रहतेन वाससा बद्धौ
मुखसहितं शिवामकर्णौ देशभारभ्य त्रिप्रदक्षिणा वेष्टयित्वा यथान्वासीन पततितथाबध्नीयात् कर्णे
कत्रैत्रिरात्रं वैवं भूतो ह्वपनूभवेति प्रेष्यालिखं कृत्वादि होमशेषं समापयेत् ॥ बटुर्ह्ववश्य कर्तव्यं मे
ध्यावं दनारन्यत्लाचे भोजनाचक्रमेवोसास्तां कालं नयेत् ॥ ततएकरात्रपक्षे द्वितीयदिने त्रिरात्रपक्षे चतु

राम०
९८

यैर्दिने ग्रामाद्बहिः परिस्थितायां दिशि शिष्यैः संचारस्मृत्ये प्रचौरदेशेऽन्यो ब्रह्मचारी आग्नेस्तंडिलादुत्तर
तो भिक्षुः करकमंडलुमश्मानं च निधाय तत्स्मृत्य गुरुरग्रे शमहानाम्न्यस्य प्रवराह्णे द्वितीयेऽपि संगतानां यो
गिनामाश्रयार्थं रम्यारण्यं द्विवर्षावत्सतंतरीतदस्मभवेष्वतां वा बध्वा चायां पर्वदर्यत्र गतः तत्राचार्यः स्थ
द्विले उपलेपनादिपर्युक्षणांते ममग्निं प्रतिष्ठाप्य नीतं कृत्वा तत्र श्रुत्वा त्रागंथ्य पुत्ररौ पुरः शानस्थानेद्दवाच्छ
मानयन्निवतरभिमुख उपविशेत ॥ ततः शिष्या वेष्टितवस्त्रं किंचिदपसार्य मुखं प्रक्षाल्य कंठस्था
ने कृत्वा चम्याग्निमाचार्यं च प्रदक्षिणीकृत्य गुरुमभिवाद्य तस्यैवासनदर्भस्य पश्चिमे कृती स्थित्वानु
शकृ सान्निरीक्षणेन नीरं दहं तत्र भिक्षुख उपविश्य स्कंधमंतरा गमनं निर्हरणार्थं स्वपृष्ठमाचार्य
पृष्ठेन सहसंधाय महानाम्नीभो अनुब्रूहीति मनसा वदेत् ॥ ततो गुरुः कालप्रमाणेन तदृक्तिं हा
त्वा पुनस्तद्दहरुत्तरां त्रवृत सोपानरपक्षानुतापि नेम्प्रदधानायवर्ववे स्वयमर्द्धिराशी सन्निमीत्य वि

प्र० रत्न०
९९

रामयचन्द्रिकायां घानवकल्पः ॥ एवाहेग्नाः ३३ इत्यादि नवपुरीषपदानि चवास्त्वचन्द्रयातम् ॥ शिष्यो पित्रिवा
रं पठेत् ॥ ततस्तस्य शिरोवेष्टनमनुमन्त्र्यादित्यमीक्षस्वेति वदेत् ॥ ततो बटुर्मित्रस्य त्वा चक्षुषा प्रती
क्षे मित्रस्य त्वा चक्षुषा समीक्ष इति मंत्रद्वयेनादित्यमीक्षेत ॥ ततोऽस्यादित्यभार्यपुतादिशो मित्रस्य
वश्चक्षुषानुवीक्ष इतीक्षेत ॥ पुनरादित्यमीक्षस्वेत्युक्तो ॥ मित्रस्य त्वा चक्षुषा प्रतिपश्या ॥ मियास्मा
न्द्वेष्टि यं च वयं द्विष्मस्तं चक्षुषा हिंति रुच्छलित्यादित्यमीक्षेत ॥ ततोऽग्न इलेत्याघष्ठमंत्रेण भुवमुपस्थे
त ॥ तेच ॥ अग्न इलोकमेश लानमरूपिभ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो नमो वो अस्तु देवेभ्यः शिवा नः शं
तमा भव सुमृळीका सरस्वतीमा ते व्योम संदृशि १ मंद्रं कर्मेभिरित्यस्य गोतमो राहूगणो विश्वे
देवा त्रिष्टुप् ॥ भूम्युपस्थाने वि० ॥ मंद्रं कर्मेभिः० ऋक् १ शं न इन्द्राग्नी इति वसिष्ठो विश्वेदेवा त्रि
ष्टुप् ॥ भूम्युपस्थाने वि० ॥ शं न इन्द्राग्नी० ऋक् १ तत्र पञ्चनं हुत्वा तमित्यग्निश्चाविश्वेदेवाः त्रिष्टुप् ॥

राम०
९९

भूर्भुवः स्वः क्षेत्रनं सुव्रतेनच्चसीमि॰ ऋ॰ ऋ॰ १ कयानश्चित्र इति तृचस्य वामदेव ऋषिः इन्द्रो गायत्री॥ भूर्भुवः॥
कयानश्चित्र आभुवत्॰ ऋ॰ ऋ॰ ३ स्योना पृथिवीमेधातिथिः ऋषिः भूमिर्गायत्री॥ भूर्भुवः॰ स्योना पृथिवी भव॰ ऋ॰
ऋ॰ २ एते मैत्रे मू॰ मिं॰ स्थापवत्सतरीं गुरवे दत्वा॰ गुरुमवचनीयार्थमुपनयनवत्तंडुलान् अभि॰ हुत्वा गुरवे निवे
निवेद्य ईदृवैवत्रस्तोदनहोमं कुर्यात् तत्र क्रमः॥ देशकालौ निर्दिश्य मम होमाम्युष्यमनोगमतमनुप्र
वचनीयहोमं करिष्ये इति संकल्प्याग्नेरवनादग्निं प्रतिष्ठाप्य नीतं कृत्वा पुनर्देशकालौ निर्दिश्यानुप्रव
चनीयहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये इत्याघाराघारावाज्येनेत्यतमुत्काः सदसस्पतिं महानाम्नी
ःऋषीमष्टया॰ ता॰ प्रधानदेवताः स्विष्टकृदेषेण शेषेण शेषेणाह्विष्टकृतमित्यादि सधायस्पर्सत्यंतमुत्कासमि
द्वयमाधायोद्देशत्यागौ कृत्वा परिसमूहनादि पूर्णपात्रनिधानान्तं कृत्वा भैक्ष्यतंडुलान् स्वत्रुत्रो मुष्टीन् त
स्मांदेवतानयस्य विप्रद्वयभोजनायचनिह्यन्तथैव प्रोक्ष्य श्रपयित्वाभ्यतानुप्रवेचनीयइतिसुरवेनि

७०

प्र०र०

१००

वेदयेत ॥ ततः शिष्येणान्वारब्धः आज्यसंस्कारादाघारांतं कृत्वाज्यभागवर्जमवदानधर्मेणाचरुमव
दाय ॥ सदसस्पतिं काण्वो मेधातिथिः सदसस्पतिर्गायत्री ॥ अनुप्रवचनीयप्रधानहोमे वि० ॥ ॐ सदस
स्पतिमद्भुतं प्रियं स्वाहा ॥ सदसस्पतय इदं० ॥ इति प्रथमाहुतिः ॥ ॐ महानाम्नीभ्यः स्वाहा ॥ महानाम्नी
भ्य इदं० इति द्वितीया ॥ ऋषिभ्यः स्वाहेति तृतीयमाहुतिं हुत्वा स्विष्टकृदादि होमशेषं समापय्य ॥ मही
कर्मांत कर्तव्यं स्वस्तिवाचनं कृत्वा ब्राह्मणान्भोजयित्वा वेदसमाप्तिरस्त्विति प्रतिब्रूयुरिति ॥ ॥
इति प्रयोगरत्ने महानाम्नीव्रतप्रयोगः ॥ ॥ अथ महाव्रतप्रयोगः ॥ ॥ आचार्यः पूर्ववदुदगयना
दि स्वस्तिवाचनादि होमशेषसमाप्त्यंतं महानाम्नीव्रतवत्कृत्वा संवत्सरं महाव्रतमाचार्यः पूर्ववदु
पदिश्य परेति बटुं प्रेष्यते न संवत्सरं व्रतमाचरिष्यति ग्रामाद्बहिः शुद्धदेशे प्रागग्रेषु दर्भेषु प्राङ्मुखस्त
पविष्टः शिष्येणाविधिवदभिवादनेन पूर्वकं महाव्रतं भो अनुब्रूहीति वचने नैवोक्तः प्राङ्मुखमु

रम०

१००

प्रवेश्याथ महाव्रतमित्याघारएयकं त्रिर्ब्रूयात् ॥ ततः शिष्यस्तथैव त्रिवारमुक्त्वा पूर्ववन्मंत्रद्वयेनादि
त्यमवेक्षेत ॥ ततो गुरुः शिष्यावयवाँल्लोहितमिमैत्रैर्मर्मिं स्पृशेत् ॥ ततः आचार्यो महानाम्नीभ्यः स्वाहेति
स्वाग्ने महाव्रताय स्वाहेति द्वितीयामाज्याहुतिं हुत्वा सर्वमनुप्रवचनीयं कुर्यात् ॥ ॥ इति महाव्रतप्रयोगः
॥ ॥ अथोपनिषद्व्रतप्रयोगः ॥ ॥ आचार्यः पूर्ववद्धोमसमाप्त्यंतं महानाम्नीवत्कृत्वा संवत्सरमु
पनिषद्व्रतमाचरेति बटुं प्रेष्यते नूतपा व्रते कृते प्राग्वदुपनिषदं भो अनुब्रूहीत्युक्तस्तेमारुण्युखमथो
तः संहितायामुपनिषदि ब्रह्मणि कुर्यात् ॥ ततः आचार्यो महाव्रतत्याघारएयकं त्रिर्ब्रूयात् ॥ शिष्यस्तथै
वात्रिरुक्त्वा पूर्ववदादित्यावेक्षणाग्निस्पर्शब्रह्मोरस्तनअश्मनिवेदनानि कुर्यात् ॥ ततः आचार्यो मह
व्रतस्थानेउपनिषदे स्वाहेति हुत्वा सर्वमनुप्रवचनीयं कुर्यात् ॥ आचार्याभावे शिष्यः स्वयमेव म
हावाक्याध्ययनादिकं कुर्यादिति ॥ इत्युपनिषद्व्रतं ॥ ॥ इति महानाम्न्यादिव्रतत्रयं ॥ ॥ अ

थ गोदानव्रतप्रयोगः ॥ ॥ जन्मतः षोडशे वर्षे उत्तरायणे शुक्लपक्षे चौलोक्ततिथ्यादौ गोदानं कुर्यात् ॥
तत्र पूर्वेद्युः कराचार्यः कृतनित्यक्रियः कृतस्नानो ब्रह्मचारिणं स्वदक्षिणतः उपवेश्य प्राणानाय
म्य तिथ्यादि संकीर्त्य अस्य ब्रह्मचारिणो गोदाने कर्तुं तदंगत्वात् लिंगाच्च नांकुरार्पणं ग्रहयज्ञाभ्युद
यिकानि करिष्ये इति प्रत्येकं संकल्प्य तानि कर्माणि कृत्वा परेद्युः कृतनित्यक्रियं बटुं दक्षिणत
उपवेश्य कौतुकमाबध्य सुमुहूर्ते उपलेपनाद्यग्निप्रतिष्ठापनांतं कृत्वा पुनर्देशकालौ स्मृत्वा
मया क्रियमाणे गोदानहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये ऽस्मिन्नन्वाहिते ऽग्नावित्या
द्याघारावाज्यभागान्तमुक्त्वा त्रिरग्निं यवमानं प्रजापतिं चैताः प्रधानदेवता आज्येन शेषेण स्विष्ट
कृतमित्याद्युक्त्वा समिद्द्वयमन्वाधाय पर्णपात्रनिधानांतं कृत्वोदगग्नेः शराल्यां(?) शारदेषु(?) ब्रीहियव
माषतिलैः पृथक्पूरितान् शरावान् चतुष्टयं क्रमेणैकैकशः प्राक्संस्थं मासाद्य प्रत्यगग्नेः शमी

नस्यकर्त्तुर्दक्षिणतोबटोर्मौंजामास्तृत्यासीत॥ मातुःपुरस्तादग्नेःपश्चाद्दर्भस्तुहरशाकृतशरावंशमी
पर्णाशरावंचस्थापयेत्॥ ततोब्रह्मैकविंशतिकुशान्कुशानन्दधानोमातुर्दक्षिणतस्तिष्ठेत्॥ ततोबटुना
न्वारब्धःकर्त्तापर्वतेत्रमाधारान्तेहुत्वा॥ अग्न्यस्मत्राप्यशीतोदकेवर्त्मभिर्मंत्रैःपर्वेवराज्याउष्णीकृत्वा
दृशत्यागंकृत्वाशीतोष्णोदकेनपात्राभ्यांपृथगानीयबटोःपश्चिमतःस्थित्वातदुदकमन्यस्मिन्पा
त्रेपातयित्वामातुर्हस्तेनवापयेदुदकेनेहीतियुगपाणिनीयतदेकदेशंनवनीतेनदध्नावामेलयित्वाव
टोर्वामहस्तमस्तुप्रदेशमारभ्यप्रदक्षिणमदितिःश्मश्रूणिवपत्त्वायर्वेदंतुवर्चसइतिमंत्रावृत्यात्रिः
श्मश्रूण्येवलेकदायित्वाब्रह्महस्तात्स्त्रैकविंशतिकुशानेपुत्रीनेकुशानादाययबटोरभिमुखंपश्चि
माग्रान्केशांत्वोषधेत्रायस्वैनमितिदक्षिणाश्मश्रूभागेनिधायतेष्वंकुरेषुताम्रमयंक्षुरंस्वधिते
मैनंहिंसीरितिनिधायाचिपेनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्॥ तेनब्रह्मा

प्र०स्त०
१०२

गोचयते स्मस्यायुष्मन्नरद्दधिये यथासा इति सश्मश्रुकान्कुशो कुशान्छित्वा प्रागग्रान्छरावृशमीपर्णै

रे कीकृत्य मातुः करे दद्यात् ॥ सा च तानानडुहे गोमये प्रागग्रान्निदध्यात् ॥ एवं द्वितीयादिछेदने कुशां

कुरत्रयनिधानादि समंत्रकं कार्यं ॥ विशेषस्तु ॥ येन धाता बृहस्पतेरग्नेरिंद्रस्य चायुषेवपत् ॥ तेन त आ

युषे वपामि सुश्लोक्याय स्वस्तय इति मंत्रे द्वितीयछेदने ॥ येन भूयश्च रात्र्यां ज्योक्च पश्याति सूर्यं ॥ तेन त आ

युषे वपामि सुश्लोक्याय स्वस्तय इति तृतीये ॥ चतुर्थे तूष्णीं ॥ एवं दक्षिणश्मश्रुभागे चत्वारि छे

दनानि कृत्वोत्तरभागेप्येवं त्रीणि छेदनान्यादितो मंत्रत्रयेण कुर्यान्न चतुर्थं ॥ ततः क्षुरधारां ॥ यत्क्षु

रेण मर्चयता सुपेशसा वप्ता वपसि केशश्मश्रु ॥ शुंधि शिरो मुखं मास्यायुः प्रमोषीरित्यग्रतश्चारभ्या

मूलमवमृज्य नापितमाहूय ॥ शीतोष्णाभिरद्भिरर्थं कुर्वाणः क्षौरं कुरु कुशलीकेशश्मश्रुलोम

नखान्युदक्संस्थानि कुर्विति प्रैष्यप्रैषार्थं चावबोध्य तेन पूर्ववत्सेकावशिष्टैः शीतोष्णाभिरद्भिरप्रपा

रा०म०
१०२

॥शीनाद्इ कृत्य केशश्मश्रुलोमनखान्युदकसंस्थाने वापयित्वा स्नातं बटुं पूर्ववदुपवेश्य स्विष्टकृदा
दि होमशेषं समाप्य ब्रीह्यादिपात्रचतुष्टयं नापिताय दद्यात्॥ ततो बटुरहःशेषं मौनेन नीत्वा वं दितसा
यंसंध्यो गुरोरंतिकं गत्वा वरं ददामीति वाचं विसृजेत् तस्मा अनड्वाहं गां चेद् दक्षिणात्वेनयाभ्वि त्वा बा
द्यात्॥ ततः परेद्युः संवत्सरं गोदानव्रतमाचरेत् आचार्येणोक्तो ब्रह्मचारी संवत्सरं केशश्मश्रुशि
धत्वा पूर्वोक्तब्रह्मचारी नियमेन गुरुसमीपे व्रतं चरेत्॥ ॥इति श्रीमेश्वरभट्टसूरिसूनुनाराय
णभट्टकृते प्रयोगरत्ने गोदानप्रयोगः॥ ॥अथ ब्रह्मचारिव्रतलोपप्रायश्चित्तं॥ ॥तत्र बौधायनः॥
अत्र शौचाचमनसंध्यावंदनदर्भभिक्षाग्निकार्यराहित्य शूद्रादिस्पर्शनकौपीनकटिसूत्रयज्ञोपवी
तमेखलादंडाजिनत्यागदिवास्वापछत्रधारणपादुकाधारणशोहरणमाल्याधारणोद्वर्तनानुलेपनां
जनजलक्रीडाद्यूतनृत्यगीतवाद्यादिभिर्गतिपारवेदादिसंभाषणपर्युषितभोजनादिब्रह्मचारिव्रत

प्र०र०ल०
१०३

लोपजनितसकलदोषपरिहारार्थं ब्रह्मचार्यं ब्रह्मचारी कृच्छ्रत्रयं चरेत्॥ महाव्याहृतिहोमं कुर्यात्॥ तद्य
था॥ लौकिकाग्निं प्रतिष्ठाप्य अन्वाधानाद्याज्यभागांतमुक्त्वा॥ त्र प्रधाने॥ अग्निं वायुं सूर्यं प्रजापतिं ४
अग्निं पृथिवीं महांतं० वायुं अंतरिक्षं महांतं० आदित्यं दिवं महांतं० चंद्रमसं नक्षत्राणि दिशः महांतं०
अग्निं० विश्ववेदसं० विभावसुं० शतक्रतुं० अग्निं० अग्निं० अग्निं० वायुं० सूर्यं० प्रजापतिं च० १८ ए
ताः प्रधानदेवता आज्येन शेषेण स्विष्टकृतमित्यादि आज्यभागांतं कृत्वा॥ प्रथमं व्यस्तसमस्तव्या
हृतिभिश्चतस्र आज्याहुतीर्हुत्वा॥ ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा॥ अग्नये पृथिव्यै महत
इदं०॥ ॐ भुवो वायवे चांतरिक्षाय च महते च स्वाहा॥ वायवेंतरिक्षाय महत इदं०॥ ॐ स्वरादित्या
य च दिवे च महते च स्वाहा॥ आदित्याय दिवे महत इदं०॥ ॐ भूर्भुवः स्वश्चंद्रमसे च नक्षत्रेभ्यश्च दि
ग्भ्यश्च महते च स्वाहा॥ चंद्रमसे नक्षत्रेभ्यो महत इदं०॥ ॐ पाहि नो अग्न एनसे स्वाहा॥ अग्नय

राम०
१०३

इदं०॥ ॐ याहिनो विश्वचेदसे स्वाहा॥ विश्वचेदस इदं०॥ ॐ यत्त्वं पाहि विभावसो स्वाहा॥ विभावसव इदं०॥
ॐ याहि त्वो विश्ववेशतक्रतो स्वाहा॥ शतक्रतव इदं०॥ ॐ पुनरूर्जा निवर्त्तस्व पुनरग्न इषायुषा॥ पुनर्नः पा
हि विश्वतः स्वाहा॥ अग्नय इदं०॥ ॐ सहरय्या निवर्त्तस्वाग्ने पिन्वस्व धारया॥ विश्वप्स्निया विश्वतस्परि स्वाहा
॥ अग्नय इदं०॥ पुनर्व्याहृतिभिर्हुत्वा विष्टकृदादि होमशेषं समापयेदिति॥ एतद्व्रत्य धर्मलोपे प्रायश्चित्तं
॥ बहुधर्मलोपे तु प्रायश्चित्ते विशेषो ऋग्विधाने शौनकोक्तः॥ तं बोधियाज्ञयमंत्रेत्रिः हुत्वा चैव शिवालये
॥ ब्रह्मचारी त्वधर्मे च न्यूनं चेत्सर्वमेवतदिति॥ महानाम्न्यादि व्रतेषु पुनस्त्वेषु तारतम्येन त्रीन्यद्वा द्वादश
वा कृच्छ्रान्कृत्वा पुनर्व्रतं प्रारभेतेति स्मृत्यर्थसारे॥ ॥ इति ब्रह्मचारिव्रतलोपप्रायश्चित्तं॥ ॥ अथ समावर्त्त
नप्रयोगः॥ ॥ आचरितब्रह्मचारिनियममहानाम्न्यादि व्रतचतुष्टयो ब्रह्मचारि विद्यां तेगुरुसमर्थदानेन संप
न्यते मातुस्तातो ज्योतिर्विदुक्ते शुभकाले आचार्यगृहे समावर्त्तनं नाम कर्म कुर्यात॥ ब्रह्मचारिनियमव्रत

लुप्तव्रतलोपपक्षे प्रायश्चित्तं कृत्वा पुनः संधानं कुर्यात्॥ तत्रायं क्रमः॥ पूर्वेद्युरस्तिथ्यादि संकीर्त्य मम श्रौताचार्यमना
दिसर्वब्रह्मचर्यनियमलोपप्रायश्चित्तद्वारा श्रीपरमेश्वरप्रीत्यर्थं होमपूर्वकं कृच्छ्रत्रयमाचरिष्य इति संकल्प्य
लौकिकाग्निप्रतिष्ठाप्याज्यहोमधर्मेणान्वाधानपूर्वकं पूर्वोक्ताष्टादशाज्याहुतीर्हुत्वा कृच्छ्रप्रत्याम्ना
यत्वेन कल्पितगोदानसहस्रतिलहोमदशसहस्रगायत्रीजपादिष्वन्यतमं चरित्वा होमशेषं समापयेत्॥
महानाम्न्यादिव्रतलोपपक्षे प्रत्येकं गायत्र्याशतसंख्याऽष्टाविंशतिमष्टौ वाज्याहुतीर्हुत्वा एकैकं कृ
च्छ्रं चरित्वा शुभदिने महानाम्नीव्रतं कृत्वा तथैव महाव्रतादिव्रतत्रयं कृत्वा गुरवे दक्षिणां दत्वा तेनाशु
ज्ञातो मध्यादीन्येकादशोपकल्पयेत्॥ तानि च॥ मणिकुण्डले वस्त्रयुगं छत्रमुपानद्युगं दंड एककीगं
ककरंजफलपिष्टं श्रीखंडाद्यनुलेपनं मंजनमुष्णीषमिति॥ एतान्यात्मने चाचार्याय च यक्रमयोनेविंदे
ताचार्यायैव संपाद्यानि॥ यस्मिन्नहनि समावर्तनं तस्मिन्प्रातरपराजितां दिशं गत्वा यत्र हि यव्रह्नः स्पेशा

नीशारवं छित्वाऽस्त्वमादेशमितां समिधमावर्त्तनेऽग्न्याहृत्यम्भूमेरन्यत्रोपरि निदध्यात् ॥ ब्रह्मचारी कृतनित्य
क्रियः कृतप्रातरग्नीकार्यश्च प्राणानायम्य तिथ्यादि संकीर्त्य मम गृहस्थाश्रमांतरप्राप्तिद्वारा श्रीपरमेश्व
रप्रीत्यर्थं समावर्त्तनं करिष्ये इति संकल्प्य तदंगभूतं स्वस्तिवाचनांकुरार्पणग्रहयज्ञाभ्युदयिकानि संकल्प
पूर्वकं कृत्वा प्रागुक्तरीत्या समिधमाहृत्योपरि निधाय ब्रह्मचर्यव्रतसंपूर्त्यै ब्राह्मणाय गां दत्वाऽद्दिलान्योऽजे
पित्वा विधिवत्कौतुकमाबध्य शुभकाले स्थंडिलोल्लेखनाद्यग्निप्रतिष्ठापनांतं कृत्वा पुनर्देशकालौ निर्दिश्य
मया क्रियमाणे समावर्त्तनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये अस्मिन्नन्वाहितेऽग्नावित्याद्याघारावा
ज्येनेत्यंतमुक्त्वा त्रिरग्निं पवमानं प्रजापतिं चैताः प्रधानदेवता आज्येन अग्निमर्ध्वसमिधा विश्वान्देवान्चरु
शासमिद्भिः शेषेण स्विष्टकृतमित्यादि संधायस्य परत्वीतमुक्त्वा समिद्ध्यमग्नावाधाय पशीपात्रनिधा
नांतं पुरस्तंतंत्रे महत्पुष्पाद्यो रगग्नेरास्तीर्णेषु दर्भेषु ब्रीहि ह्रियवमाषतैलैर्व्यस्य कूपपपरितानि च त्वाहि

शरावाणि क्रमेणैकैकशः प्राक्संस्थमासादयेत्॥ ताम्रमयं चौडं वाहुरं शीतमुष्णं चोदकं नवनीतदधिद्रप्सा
न्वामलपापघेकादशद्रव्याणि चार्गरूतरतश्चादयेत्॥ ततः प्रत्यगग्नेरासीनस्य कर्तुर्दक्षिणतो माता प्राङ्मुखोसी
त॥ तस्याः पुरः अग्नेः पश्चात् एकस्मिन् शरावे शमीपर्णान्यपरस्मिन्वानडुहं गोमयमासादयेत्॥ ततो ब्रह्मैके
विंशतिस्वर्णशतं वै (वा) विंशतिकुशाङ्कुराग्रधानो मातुर्दक्षिणतस्तिष्ठेत्॥ ततो ब्रह्मचारी पुरस्तनं तत्र माघ्रा
ातं कृत्वा॥ अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः॥ अग्निः पवमानो देवता॥ गायत्री छंदः॥ समावर्त
नप्रधानाज्यहोमे वि०॥ ॐ अग्न आयूंषि० दुच्छुनां स्वाहा॥ अग्निः पवमानो देवत(ा) यपवमानाय इदं०॥ प्रजा(प)
ॐ अग्निर्ऋषिः ग यं स्वाहा॥ अग्नये पवमानाय इदं०॥ ॐ अग्ने पवस्व स्वपा० स्वाहा॥ अग्नये पवमानाय इदं०॥
प्रजापते हिरण्यगर्भः प्रजापतिर्त्रिष्टुप्॥ समावर्तनप्रधानाज्यहोमे वि०॥ ॐ प्रजापते० रयीणां स्वाहा॥ प्रजाप
तय इदं०॥ ततो ब्रह्मचारी तोक्तवारितीपात्राभ्यां पृथगानीय॥ वेद्याः पश्चिमदेशे स्थित्वा तेनोदकमन्यस्मिन्पात्रे

॥ ॐ उष्णेन वाय उदकेनेहीति मंत्रेणायुगपन्निनीय तत्रैकदेशं गृहीत्वा नवनीतेन दधिद्रप्सेन वाभिमंत्र्य पित्वा
बटोर्वाम श्मश्रुप्रदेशमारभ्य प्रदक्षिणं ॥ ॐ अदितिः श्मश्रूणि वपत्वाप उंदंतु वर्चस इति मंत्रं प्रतिश्लोकं उंदनमा
वर्त्तयन्नात्रिवारं श्मश्रूणि एषवल्केन दधित्वा दक्षहस्तस्थितेष्वेकविंशति कुशांकुरेषु त्रीन्कुशांकुरानादाय दक्षिण
श्मश्रुभागे ब्रह्मचार्यभिमुखं प्रत्यग्रं निदध्यात् ॥ तदा ब्रह्मचारी ॥ ॐ ओषधे त्रायस्व मामिति जपेत् ॥ ततो
ब्रह्मा तेषु कुशांकुरेषु ताम्रमयं क्षुरं निदध्यात् ॥ तदा ब्रह्मणो वपतेदमायुष्मान्नरदष्टिर्यथा चारी ॥ ॐ स्व
धिते मा मा हिंसीः ॥ ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्माणो वपतेदमा
युष्मान्जरदष्टिर्यथासदिति जपेत् ॥ ततो ब्रह्मचारी ॥ येनावपदिति मंत्रेणोच्चारितेन ब्रह्मा सश्मश्रु कान्कु
शांकुरान्छित्वा तान् कुरान्साग्रान् शरावस्थशमीपत्रैः सहैकीकृत्य मातुः करे दद्यात् ॥ सा च तान्सश्म
श्रुशमीपर्णकुशांकुरानानडुहे गोमये निदध्यात् ॥ एवं द्वितीयादिच्छेदनेषु कुशांकुरत्रयनिधानादि सम

प्र०र० १०६

त्रकं कार्यं ॥ छेदनमंत्रे तु विशेषः ॥ ॐ येन धाता बृहस्पतेरग्नेरिंद्रस्य चायुषेऽवपत् ॥ तेनम आयुषे वपामि सुश्लो-
क्याय स्वस्तये ॥ इति द्वितीयछेदने मंत्रः ॥ ॐ येन धाता बृहस्पतेः भूयश्च रात्र्यां ज्योक्च पश्पाति सूर्यं ॥ तेनम
आयुषे वपामि सुश्लोक्याय स्वस्तये ॥ तृतीयछेदने ॥ चतुर्थे तु ॥ येनावपत् ० येन धाता येन भूयश्चेति त्रयोपि
मंत्राः ॥ एवं दक्षिणश्मश्रुभागचत्वारि छेदनानि कृत्वोत्तरश्मश्रुभागेप्यनयावृत्त्या घानि त्रीणि छे-
दनानि प्रत्येकं मंत्रैः कुर्यात् ॥ न तु सर्वमंत्रैश्चतुर्थं ॥ ततः क्षुरधारां ॥ ॐ यत्क्षुरेण मर्चयता सुपेशसा वप्ता
वपसि केशश्मश्रूणि ॥ शुंधि शिरो मुखं मा मायुः प्रमोषीः ॥ इत्यग्रत आरभ्यामूलमवमृज्य नापितमाहूय ॥ ॐ शीतो-
ष्णाभिरद्भिरवशेषं कुर्विति ॥ कृणवन्तु शालीके श्मश्रुलोमनखान्युदक्संस्थानि कुर्वीति प्रैषेणानुशास्य
प्रैषार्थं वाचबोध्य नापितेन यथावशेषितं शीतोष्णाभिरद्भिः कृत्स्नकेशश्मश्रुलोमनखान्युदक्संस्थानि
वापयित्वा न द्वौ हौ दशरावचेत्तुष्टये नापिताय दद्यात् ॥ ततः करंजबीजपिष्टेन स्वशरीरमुद्वर्त्य शीतोष्णा ॥ म०

१०६

भिरद्भिः स्नात्वा त्वा उदीच्यां दिशि शराब्धचतुष्टयं द्विराचम्य पुनर्चर्चं कं तिकं गत्वा एकं च वस्त्रं समंत्रं परिधायान्यद्

वस्त्रं प्रावृणुयात् ॥ तत्र मंत्रः ॥ युवं वस्त्राणीत्यस्य दीर्घतमा मित्रावरुणौ त्रिष्टुप् ॥ वाससोधारणे वि० ॥ ॐ यु

वं वस्त्राणि० ऋ० कृ० शततो द्विराचम्य पाणिना तन्नमादाय ॥ ॐ अश्मनस्तेजोसि चक्षुर्मे पाहीति मंत्रेण

स्वत्यास व्यद दक्षिणे चक्षुषी क्रमेण स्नात तथैव ॐ अश्मनस्तेजोसि श्रोत्रं मे पाहीत्यनेन कुंडलाभ्यां दक्षि

णासव्यश्रोत्रे ॐ स्नात्वा कुंकुमाद्यनुलिप्य भ्यां पाणिभ्यां एवं मुखमनुलिप्य पश्चादितराणां अनुलि

प्य करौ प्रक्षाल्य ॐ अनाधृष्यनामासि ... शिरसि स्रजं बध्वा ॥ ॐ रेवानां प्रतिछन्न

हे सर्वतो मा पाहीत्यनेन चर्मेमं पानहौ ... पादाभ्यामारुह्य ॥ ॐ दिवस्पृष्ठ ... सीति

मंत्रेण छत्रं धृत्वा ॥ ॐ वेणुरसि वानस्पत्योसि सर्वतो मा पाहीति वैणवं दंडं गृहीत्वा ॥ आयुष्यमिति

सूक्तेन सुवर्णमणिं कंठे बध्नीयात् ॥ आयुष्यमिति सूक्तस्य सनक सनंदन सनातना ऋषयः ॥ हि

१०६

रण्यं देवता आद्यास्त्रयोनुष्टुभः ॥ पंचमी त्रिष्टुप् षष्ठ्यनुष्टुप् ॥ सप्तम्यतिशक्करी ॥ अष्टमीनवम्यौ त्रिष्टु
भौ ॥ दशम्यनुष्टुप् ॥ एकादशी जगती ॥ कंठे माला धारणे वि० ॥ ॐ आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं ॥ इदं
॥ इदं हिरण्यं वर्चस्वज्जैत्रायाविशतादु मां ॥ उच्चैर्वाजि पृतनाषाट् सभासाहं धनंजयं ॥ सर्वाः समग्रा ऋद्धयो
हिरण्येस्मिन्त्समाहिताः ॥ शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ ॥ तेन मां सूर्यत्वचमकरं पुरुषु प्रियं ॥
सम्राजं च विराजं चाभिष्टिर्या च मे ध्रुवा ॥ लक्ष्मी राष्ट्रस्य या मुखे तया मा मिंद्र संसृज ॥ अग्नेः
प्रयातं परि यद्धिरण्यममृतं जज्ञे अधि मर्त्येषु ॥ य एनद्वेद स इदेनमर्हति जरामृत्युर्भवति यो बिभर्ति
१ यद्वेद राजा वरुणो यदु देवी सरस्वती ॥ इंद्रो यद्वृत्रहा वेद तन्मे वर्चस आयुषे ॥ न तद्रक्षांसि न पिशा
चास्तरंति देवानामोजः प्रथमजं ह्येतत् ॥ यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः
स मनुष्येषु कृणुते दीर्घमायुः ॥ यदाबध्नं दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ॥ तन्म आ

वर्धामि शतशारदाय आयुष्मान् जरदष्टिर्यथासत्॥ धृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं धरुणं धारयिष्णु॥ कृण
क्रमं सपत्नानधरांश्च कृण्वदारोह मां महते सौभगाय॥ प्रियं वर्चिराजतिभिः मा कुरु देवेषु प्रियं राजसु मा कु
रु॥ प्रिहस्तु॥ रुरा कृ सपत्नानधरांश्च कृण्वदारोह मां महते सौभगाय॥ प्रियं मा कुरु देवेषु प्रियं राजसु मा
कु राजसु मा कुरु॥ प्रियं विश्वेषु गोप्तृषु मयि धेहि रुचा रुचं॥ अ प्रियं येन विराजति सर्वो येन विराजति॥
विराज्येन विरतिते नास्मान्ब्रसत्यस्य ते विराज समिधं कुरुः २ अनंतरमुल्लीषेण प्रादक्षिण्येन धि
रः संवेष्टय पानहौ संत्यज्य॥ उपरि निहितां प्रागुक्तां समिधं गृहीत्वा तिष्ठन्नेव॥ स्मृतं च म इत्यादी
न्स्वाहांतान्मंत्राननुक्त्वा आवादध्यात्॥ एषां मंत्राणां प्रजापतिरग्निर्ऋषिः समिदाधाने विनि०॥ ॐ स्मृ
तं च मे अस्मृतं च मे तन्म उभयं व्रतं॥ निंदा च मे अनिंदा च मे तन्म०॥ विद्या च मे अविद्या च मे तन्म०॥
इष्टं च मे अनिष्टं च मे तन्म० श्रद्धा च मे अश्रद्धा च मे तन्म०॥ प्रज्ञा च मे अप्रज्ञा च मे तन्म० २
श्रद्धा च मे अश्र

१०

प्र०र०लौ०
१०८

ष्टंचमेअनिष्टंचमेतन्म०॥हुतंचमेअहुतंचमेतन्म०॥अधीतंचमेअनधीतंचमेतन्म०॥कृतंचमेअनकृ
तंचमेतन्म०॥दत्तंचमेअसत्तंचमेतन्म०॥श्रुतंचमेअनश्रुतंचमेतन्म०॥व्रतंचमेअव्रतंचमेतन्मेत्रमयं
व्रतं॥यदग्नेसेंद्रस्यसप्रजापतिकस्यसऋषिकस्यसऋषिकस्यसऋषिराजन्यस्यसपितृकस्यसपि
तृराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाकाशस्यसातीकाशस्यसानुकाशस्यसप्रतीकाशस्यस
देवमनुष्यस्यसगंधर्वाप्सरसस्यसहारोपश्वयस्तुमिर्यामोश्चयन्मआत्मनआनिव्रततन्मेसर्वव्रतमि
दमहमग्नेसर्वव्रतोभवामिस्वाहेति॥अयंयरदं०॥अथोपविश्याऽन्याःप्रादेशसमिधोममाग्नेवर्चो
विहवेष्वित्यनेनसूक्तेनप्रत्यृचंकृगंतेआवारध्यात्॥पश्चात्स्वाहाकारमुच्चारयेत्॥ममाग्नइत्यस्य
सूक्तस्यविहव्यऋषिंपेअवारध्यात्॥पश्चात्स्वाहाकाषिःविश्वेदेवारेवारेवता॥अंत्याजगतीअन्या
स्त्रिष्टुभः॥समिधादानेवि०॥ॐममाग्ने०जयेमत्वोहा॥विश्वेदेवाभ्यइदंनममेतिसर्वत्रत्यागः॥ॐमम

राम०
१०८

दिवा० अस्मिन्स्वाहा ॥ ॐ मयि देवा० सुवीराः स्वाहा ॥ ॐ मह्यं यजंतु० वीचतानः स्वाहा ॥ ॐ द्वौ वीः पलुवं० रालन्स्वाहा ॥ ॐ अग्ने मन्युं० नेशात्स्वाहा ॥ ॐ धाता धातॄणां० न्यर्थात्स्वाहा ॥ ॐ उरुव्यचा नो महिष० परादाः स्वाहा ॥ ॐ येनः सपत्ना० मक्रन्स्वाहा ॥ ॐ अर्वाचमिंद्रममुतो हवामहे यो गोजिद्धनजिघः ॥ इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा स्वाहा ॥ इति दश मंत्राः ॥ ततः स्विष्टकृदादि होमशेषं समापयेत् ॥ ततः स्नातको नैमित्तिकं विना न कंनन्यम्भ्रुन्त्वायामि ॥ नग्नं स्वियं नेक्षेत तथा वर्षति न धावामि ॥ वृक्षं नारोहामि ॥ कूपं नावरोहामि ॥ न बाहुभ्यां नदीं तरेत्येवं संकल्पयेत् ॥ ततः कौपीनं मेखलां च विसृजेत् ॥ केशश्मश्रुलोमनखान्यपराजितायां दिशि निखनेत् ॥ ततो यत्र मधुपर्कादि पूजाऽस्य संभाविता तत्रैतां रात्रीं वसेत् ॥ समावर्तनानंतरं त्रिरात्रमाशौचं कुर्यात् ॥ ॥ इति रामेश्वरभट्टसूरिसुत विष्णुनारायणभट्टकृते प्रयोगरत्ने समावर्तनप्रयोगः ॥ ॥ अथ क्रमप्राप्तो विवाहः ॥

१०८

॥ ॥ तत्र तावदुपयोगितया किंचित्संक्षेपेणोच्यते ॥ अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ॥ आश्रमे
ण विना तिष्ठन्प्रायश्चित्तीयते हि सः ॥ इति दक्षस्मृतेः ॥ गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया ॥ वेदव्र
तानि वा पारं नीत्वा ह्युभयमेव वा ॥ अविप्लुत ब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत ॥ अनन्यपूर्विकां
कांतामसपिंडां यवीयसीं ॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजामिति च याज्ञवल्क्योक्तेः ॥ वि
विधोपि ॥ विदव्रतोभयस्नातकोऽविलुप्तत्वेन लक्षणादिविशिष्टां स्त्रियं नपुंसकव्यावृत्तये स्त्रीत्वेन
पधिक्षितामुद्वहेत् ॥ तत्रापि कुलमग्रे परीक्षेतेति गद्यवचनात् दौःसदाचारादिगुणावत्तया हीन
क्रियत्वादिदोषहीनतया च परीक्ष्य कुर्वीत ज्ञाधाहा ॥ तदनु लक्षणैः पिपरीक्षेत् ॥ लक्षणानि
चेस्तु भीस्तु भस्तूचकानि तनुलोमकेशदन्तत्वादीनि प्रत्यक्षगम्यानि बाह्यान्यंतराणि चाष्टौ पिंडेन्यस्य
देत्यादिनागृह्योक्तानि द्विविधान्यपि महाग्रंथेभ्यो ज्ञेयानि विस्तरभयान्नोच्यते ॥ पादानेनोप

मोगेन वायुरूपांतरपूर्विकाव भवति सा न र्द्धुवो व्यावर्त्यते ॥ कां ता ॥ वो द्रुमेनो रत्ना ऽग्निपरिगतास
समं प दंनी ताभुक्ता ग्रहीत गर्भाप्रसूताच्वेति सम्प्रपुनर्भुवो व्यावर्त्यते ॥ कां ता ॥ वो पूर्विकातं ॥ अनेन
वाग्दत्ता मनोदत्ता ऽग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीत गर्भा प्रसूता चेसप्त पुनर्भुवो व्यावर्त्य
ते ॥ कां ता ॥ वो द्रुमेनो नयनयोरा ल्यादकं ॥ समान एकः पिंडदानक्रिया मूलपुरुषशरीरं वाय
स्यान विद्यते सा ऽसपिंडा ॥ तां कथं चिदेकपिंड क्रियानुप्रवेशेन निर्वाप्य सापिंड्यं केचिदूचुः ॥ एकश
रीरावयवान्वयेन य सापिंड्यं विज्ञानेश्वरादयो निरीचभ निरे ॥ अत्र बहुतरं वक्तव्यं विचारस्तु ताव
त्या म प्रयोगरत्नता भंगभीत्या नोच्यते ॥ नन्वेवं विधात्तु शरीरावयवतु शरीरावयवान्वयेन सापिंड्याति
प्रसंगेन कार्यं सपिंडत्वत आह ॥ याज्ञवल्क्यः ॥ पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति ॥ मातृके
पंच मातृपितृपक्षे सप्तमादूर्ध्वं सापिंड्यं निवर्तते इति शेषः ॥ क्रूटस्थमारभ्यात्र गणना ॥ तदुक्तं ॥ मौ

वध्वा रस्य वा ततः कूटस्थाच्च दिसप्तमः ॥ पंचमी चेत्तयोर्मो त्तातत्सापिंड्यं निवर्त्तेत इति ॥ कूटस्थो मूलपुरु
षः यतः संतानभेदः ॥ एवं च मातृपितृद्वारक सापिंड्यवती या कन्यका नाभियंसंख्यासेक लेनाउ
द्वोढुः पितरौ पितुः पितरो तज्जन्मकं दंपती द्वंद्वं तस्य च तुष्क मष्टकं ततोप्यस्य क्रमात्षोडश ॥ वंशारंभ
कं दंपति प्रमिति रित्या सप्तक द्वयं रद्दा एकैकान्वय कन्यकाः पितृकुले त्वासप्तकस्य बंधुवो ॥ पचप्य
कस्य बंधोपि तु तास्तु तदपाहतु ॥ संबंधसाम्पादे कैव गणाते त्यवधार्यता १ एकस्मान्मिथुनात्तु
तोथद्वहिता द्वंद्वद्वयं ततद्वयात्तस्मा द्वंद्व चतुष्कं मष्टं च ततोत्तः षोडशा तो रद्दाः ॥ यावत्सप्तमकस्य म
ग्नि कृतवत्कन्या रद्देकान्वये ता दंतैर्गुणितां रसै कस्वदृशोसपिंडाः पितुः ३ मातुर्जन्मदं दंपती
च मिथुनं द्वंद्वं तयोः साकरस्तस्यापं चैक द्रुमम्ब मिति रित्येकान्वयः प्रस्तुते ॥ द्वंद्वाद्द्वंद्वयुगं ततो
व्ययद्वतो द्वापं चकात्ते शरे द्वैराप: सप्तगुण्णाः शराप्त विषधेवा मातुः सपिंडाः कुले ४ । कुलद्वयस्य राम०

कन्यकापुत्राभिधः सपिंडकाः॥ हिमांशुदत्तव्यराशो २१२॥ विवाहकर्मवर्जिताहिता॥ प्रयवीयसीत्वा
पेक्ष्यावयसा कनिष्ठा चन्यूनां ॥ अरोगिणी अचिकित्स्यराजयक्ष्मादिरोगरहितां॥ भ्रातृमतीभि
पुत्रिकाकरणशंकाविरहार्थं॥ यत्र तु पुत्रिकाकरणाभावनिश्चयस्तामभ्रातृकामप्युद्वहेत्
॥ असमानार्षगोत्रजां॥ ऋषेरिदमार्षं॥ गोत्रप्रवर्त्तकस्य मुनेर्व्यावर्त्तकः प्रवर इत्यर्थः॥ गोत्रं वंशः
परंपराप्रसिद्धं॥ स्वसमानेआर्षगोत्रे यस्यास्तज्जाया न भवति॥ तां॥ याज्ञवल्क्यवाध्यसमौकानां भिन्नगो
त्राणामपि॥ भार्गववैतहव्यसावेतसेति प्रवरैक्यमस्ति तत्र विवाहो माभूदिति असमानार्षजामि
त्युक्तं॥ आंगिरसाम्बरीषयौवनाश्वेति मांधात्रां चरीषयौवनाश्वेति आंगिरसमांधातृप्रवरभेदे
पियौवनाश्वगोत्रैक्यं॥ तादृशविवाहवारणाय समानगोत्रजामित्युक्तं॥ तथा च गोत्रप्रवरै
पृथक्पर्यदासे निमित्तभूतौ॥ प्रवरैक्यविशेषमाह बौधायनः॥ पंचानां त्रिषु सामान्यादविवा

प्र०रत्न०
१११

हात्रिषु द्वयोः ॥ ७८ एवं गोगोगरोघेवंशेषेष्वेकोपिवारयेत् ॥ ॥ इतिगोत्रप्रवरनिर्णयः ॥ सपिंडप्रव
सगोत्रंविवाहप्रायश्चित्तादिचमहाग्रंथतोऽवसेयंविस्तरभयादिहनोच्यते ॥ सापत्नमातामहकुले
ष्वातिदेशिकात्सापिंड्यादविवाहः ॥ तथाचसुमंतुः ॥ पितृपत्न्यःसर्वामातरस्तद्भ्रातरोमातुलास्तद्भ
गिन्योमातृष्वसारस्तद्दुहितरश्चभगिन्यस्तदपत्यानिभागिनेयान्यन्यथासंकरकारिणःस्युरिति ॥ अ
त्रयावद्वचनंवाचनिकमितिन्यायेनपरिगणितेष्वेवातिदेशिकंसापिंड्यंनतुपंचमसप्तमपर्यंतं ॥ क्व
चित्तुवचनंनेदंचविवाहनिषेधः ॥ यथागृहपरिशिष्टे ॥ अथविवाहेस्वपकन्यमध्येविरुद्धसंबंधास्तुप
यच्छेतेस्तुत्योऽतेदंपत्योभिर्यःपितृमातृसाम्येरुद्धसंबंधोयथाभार्यास्वसुर्दुहितापितृव्यपत्नीस्व
साचेतिद्वयमेवविरुद्धसंबंधाविहितः ॥ तथाचनारदः ॥ प्रत्युद्वाहोनैकदामुडनद्वयः ॥ अन्यत्रापि ॥
एककोजन्येचकन्याद्वयपुनर्योनैकजन्मनोः ॥ नपुत्रीद्वयमेकस्मैप्रदद्यात्तुकदाचनेति ॥ अथवरगुणाः ॥ स

रत्न०
११२

।। तत्र बुद्धिमते कन्यां प्रयच्छेदिति गृह्यं ।। यम: ।। कुलं च शीलं च वयश्च रूपं विद्या च वित्तं च सनाथता च वित्तं च
सनाथता च ।। एतान् गुणान् सप्त परीक्ष्य देया कन्या बुधैः शेषमचिंतनीयं ।। अन्योपि गुणदोषविचारो ग्रंथां-
तरादवसेयः ।। अन्यच्च ।। कुले ऋतुत्रयादर्वाङ्[illegible]नान्नात्तु मुंडने ।। पत्न्योद्वाहान्ते नवपुत्रीविवाहोपि ऋतु-
त्रये ।। अब्दांतरान्मुंडनं च नैकदा मुंडनद्वयं ।। अब्दभेदे तु नैव दोष इति संहितासारावल्यां ।। फाल्गुने चै-
त्रमासे तु पुत्रोद्वाहोपनायने ।। भेदाद्वत्सरस्य कुर्वीत नर्तुत्रयविलंबनमिति ।। इत्यर्थः ।। २ ये कालामहाग्र-
यतोहे[illegible]यः ।। वध्वरयोर्हस्तस्यादिद्विवर्षे शुद्धिर्विवाहकालस्तु द्विवर्षो विस्तारादिघटनाते तु सार्द्धे
वत्सरे चैषां मांगल्यकार्यं च निषिद्धं ।। रत्नकोशः साधकबाधकव्यवस्था चत्स्याति षग्रंथेभ्यो विवेचनीयेति दि-
क् ।। तथा ।। ज्येष्ठमासे ज्येष्ठगर्भस्य जन्ममासे च सर्वेषां मांगलकार्यं च निषिद्धं ।। रत्नकोशः ।। जन्मर्क्षे
जन्मदिवसे जन्ममासे ज्येष्ठभं त्यजेत् ।। ज्येष्ठमासाद्यगर्भस्य ज्येष्ठभं वर्जयेत् स्त्रिया अपीति ।। ।। अथ कन्या

स्मृ०च०
११२

दातारः॥ ॥तत्र याज्ञवल्क्यः॥ पिता पितामहो भ्राता सकुल्यो जननी तथा॥ कन्याप्रदः पूर्वनाशे प्रकृति
स्थः परः परः॥ अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ॥ गम्यं त्वभावे दातॄणां कन्या कुर्यात् स्वयंवरं॥
सकुल्यः प्रत्यासत्तिक्रमेणादौ पितृकुलस्थस्तदभावे मातामहकुलस्थः॥ सर्वाभावे जननी॥ प्रकृतिस्थ उ
न्मादादिदोषहीनः॥ गम्यं गमनार्हं सावर्ण्यादिगुणयुक्तं॥ नारदोपि॥ पिता दद्यात् स्वयं कन्यां भ्राता वानु
मते पितुः॥ मातामहो मातुलश्च सकुल्यो बांधवस्तथा॥ माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते॥ तस्या
मप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥ यदा तु नैव कश्चित् स्यात् कन्या राजानमाव्रजेदिति॥ ॥अथ वि
वाहभेदाः॥ ॥मनुः॥ ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्ट
मो मतः॥ एतेषां लक्षणं फलं चालंकृत्य कन्याभिलषितगृह्य स्वयं देयं गंतव्यं॥ एतेषां स्ववर्णाश्रमतो॥ च
त्वारो ब्राह्मणस्याद्या राज्ञां गांधर्वराक्षसौ॥ राक्षसश्चासुरो वैश्यशूद्रेष्वंत्यस्तु गर्हितः॥ अंत्यः पैशा

राम०
११२

चः॥ गांधर्वो द्विष्वपि भार्यापतिभावापपश्चाद्धोमादिसंप्रपद्यंतं कार्यं॥ गांधर्वासुरपैशाचा विवाहा राक्षसश्च
यः॥ पूर्वं परिग्रहस्तेषु पश्चाद्धोमो विधीयते॥ इति परिशिष्टात्॥ होमाद्यभावे वरेतरायदेयासतितु नेमित्वेधा
यनं स्रोह॥ बलादपहृता कन्या मंत्रैर्यदि न संस्कृता॥ अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति॥ बलादि
ति छलादेरुपलक्षणं॥ इत्यादि स्मृतिपरिवेत्तादि विघ्नेऽपि द्विघृताविचयथानस्यात्तथाविचार्य विवाहः
कार्यः॥ अस्माभिस्तु विस्तरभीतैर्नेलिख्यते॥ ॥अथ मुख्यब्राह्मविवाहांगभूतवाग्दानविधिः शिष्टपरिशिष्टा
चारसंमत्योच्यते॥ ज्योतिर्विदादिष्टे विवाहनक्षत्रादिषु तेषु शुभकाले द्वौ चत्वारो ष्टादयो वा प्रशस्तवेशाः वरेणार्त्विर
ग्वंदनावा॥ अन्नद्धेरारूतवः संतु पथ्यार इति प्रकृतालत्वावतीभिः पुरंध्रीभिर्मंगलगीततूर्यैश्च सहशकुनदर्शनपू
र्वकमलंकृतवरयुतास्तदयुता वा कन्यागृहमेत्य शुभे सवस्त्रपीठासने प्राङ्मुखीं सालंकारां सुवेषां कन्यामु
पवेश्य तद्धस्ते फलतांबूलादि दत्वा तत्पित्रादिपुरतः श्रीगणपत्यास्मरणपूर्वकं प्राङ्मुखोसीनाः प्रत्यङ्मुखा

112

प्र०रत्न०
११३

वाऽमुकप्रवरान्विताऽमुकगोत्रोत्पन्नायामुकपुत्रायामुकनाम्नेवरायामुकप्रवरोपेतामुकप्रपौत्रीममुकपौत्रीम
मुकप्रपौत्रायामु मुकनाम्नीं कन्यां भार्यात्वाय प्रददामी महे इति ब्रूयुः ।। अथ दाता भार्या ह्यातिबंध्वनुमतिं कृत्वा यथो क्त
मन्त्र प्रधानं प्रदवाह्ं गामी महे इति ब्रूयुः ।। अथ दाता भार्या ह्यातिबंध्वनुमतिं कृत्वा यथोक्तमन्त्र प्रधानं प्रदवाह्ं गामी ध्वमिति
वरे दत् ।। एवं पुनर्द्धिः प्रयुज्य प्रदास्यामीति चोच्चैस्त्रिर्वदेत् ।। ततो वरपिता हिरण्यादिकं तत्प्रभव स्वयुग्मं प्रदातोऽन्तःपु
ष्पादिभिः कन्यां पूजयेत्संप्रदायागतमंत्रैः ।। ततः कन्यादाता प्राङ्मुखः कन्यां वामतउपविश्य आचम्य देशका
लौ स्मृत्वा करिष्यमाणविवाहांगभूतं वाग्दानमहं करिष्य इति संकल्प्य ।। तदंगं गणपतिपूजनं करिष्य इति
संकल्प्य गंधादिद्रव्यैर्गणपतिं पूजयित्वा यथाचारं कलशपूजनादि कृत्वा स्वस्थाने कन्यां पूजयित्वा र
मुपवेश्य स्वयं तत्प्राच्यां प्रत्यङ्मुखउपविश्य पूतं गंधताहचस्यानादिना पूजयेत् ।। पश्चद्दाता आचारतो हरिद्राखं
डं पंचद्ध पुगीफलानि च गंधाक्षताचं कृतानि गृहीत्वाऽमुकप्रवरान्विताऽमुकगोत्रोत्पन्नायामुकप्रपौत्रायामु

राम०
११३

कपौत्रायामुकपुत्रीममुकनाम्नीमिमां कन्यां ज्योतिर्विद्भिरायामुकनाम्ने वरायामुकप्रवरान्विताममुकगोत्रोत्पन्ना
ममुकप्रपौत्रीममुकपौत्रीममुकस्यममुकपुत्रीममुकनाम्नीमिमां कन्यां प्रवं ज्योतिर्विदादिष्टे सुमुहूर्ते दास्ये इति वा
चा संप्रददे इति चोक्त्वा ॥ अत्रांगे पतितेन एको वेद शा॰ दोषविवर्जिते ॥ इमां कन्यां प्रदास्यामि देवाग्निद्विजसंनिधाविति
तिवरपित्रादिवस्त्रं प्रीतेनानिपुंगीफलानि प्रदक्षिण्यप्रतिष्ठामंत्रेण ततः स्वित्यादिना वस्त्रैर्बध्वा ग्रंथिं चंदनेन चर्चयेत्सा
चारप्राप्तं ॥ ततो हरिद्राखंडं पंचपुंगीफलानि तथैव वरपित्रादिर्गृहीत्वा अमुकगोत्रामुकवरविषयेभ्यं तो निश्चितां
भवं विवितिरादत्त वस्त्रं अंतमक्षेपादि कुर्यात् ॥ ततो दाता ॥ वाचा दत्ता त्वया कन्या पुत्रार्थे स्वीकृता मया ॥ वराः वरा वधो
कनविधो निश्चितत्वं सुखी भवेति ॥ दातामं प्रतिपठेत् ॥ वाचा चार्दे स्वीकर्तरि मात्रार्थ्यं मित्रार्थ्यामित्रार्थ्यं ॥ मित्स्फुहः कार्यं ॥
ततो ब्राह्मणाः शिवा आपः संतु ० सौमनस्यमस्तु ० अक्षतं चारिष्टं चास्तु ० दीर्घमायुः शांतिः ० पुष्टिश्चास्तु ० एतद्वः स
त्यमस्ति स्वस्त्युक्त्वा ॥ समानीव आकूतिः ० ऋक् १ प्रस्तु गर्भं ताविय मानस्य सकृशि ० ऋक् १ इति मंत्रोपठेयुः ॥ ततो दा

प्र०व०ल०
११४

तग्याक्षस्थापित तंदुलपुंजेषु शची मावाह्य षोडशोपचारैः पूजयेत् ॥ तांच कन्यैवं प्रार्थयेत् ॥ देवेंद्राणि नमस्तुभ्यं दे
वेंद्रप्रिय भामिनी ॥ विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे इति ॥ ततः पुरंध्रीभिर्नीराजनादि मांगलिकं कार्यं ॥
विप्राश्च गंधतांबूलादिना पूजिता आशीर्मंत्रान्पठेयुः ॥ ते च ॥ हिरण्यवती० ऋक् १ समिद्धस्य श्रयमाणः० ऋ
क् १ वनस्पते शतवल्शो विरोह० ऋक् १ इंदुर्देवानामुपसख्यमायन्० ऋक् १ अस्य पिब स्तुमत० ऋक् १ घृ
तादुल्लुप्तं मधुमत्सुवर्णं० ऋक् १ इति सौभाग्याय परांताः षट् ॥ तदस्तु मित्रावरुण० वरयोस्तेच रुणा० ऋक् १ गृहा
वै प्रतितिष्ठा० इत्यादि यजुः ॥ ॥ इति वाग्दानविधिः ॥ ॥ ततो वैवाहिके शुभमुहूर्ते वध्वा वधूवरयोस्तैलहरिद्रारोपण परमा
दि यथाचारं कार्यं ॥ वाग्दानोत्तरं देशांतरं गते वरे नारदः ॥ प्रतिरुद्धे तु यत्केन्या चरो देशांतरं व्रजेत् ॥ त्रीनृतून्सम
तिक्रम्य कन्यान्यं वरयेद्वरं ॥ वरस्मरणे तु वशिष्ठः ॥ अद्भिश्च वाचा दत्तायां म्रियेताथो वरो यदि ॥ न च तौ दंपती स्यातां
कुमारी पितुरेव सा ॥ यस्यैवाग्दत्ता तस्य दोषयोगे प्रशस्तं च हि वरांतरलाभे च तस्मै न देयेत्याह याज्ञवल्क्यः ॥

राम०
११४

दत्तामपि पितुर्गेहात्स्ववीर्च्छ्रेयांश्चेद्वरस्त्राप्नोते इति ॥ अत्र पूर्वस्य च दोषयोग इति विज्ञानेश्वरः ॥ मतिश्चत्याप्यधर्मेण
संयुक्तायनरघा इति च स्मृतिः ॥ अन्य याहरणेतु स एव दंडमाह ॥ सकृत्स्वरीयते कन्याहरंस्तां चोरदंडभागि
ति ॥ ॥ विवाहे मंडपप्रकारमाह वसिष्ठः ॥ षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं ॥ मंडपं तोरणैर्युक्तं तत्र
वेदिं प्रकल्पयेत् ॥ अथ हस्तांतु रचयेत्स्पंडपं वा द्विषट्कम् ॥ द्विषट्करं द्वादशकरं ॥ वेदिकानिर्माणमा
ह नारदः ॥ हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समंततः ॥ स्तंभैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनि ॥ समां
तथा चतुर्दिक्षु सोपानैरतिशोभितां ॥ प्रागुदक्प्रवणां रंभास्तंभहंसमुकादिभिः ॥ विचित्रामंकितां कुं
भैर्वर्धितैस्तोरणांकुरैः ॥ भृंगारपुष्पानिकरैर्वर्णकैः समलंकृतां ॥ विप्राशीर्वचनैः पुण्यस्त्रीभिर्दूर
यैर्मनोरमां ॥ वादित्रनृत्यगीताद्यैर्हृद्यानंदिनीमुभां ॥ एवं विधामारुह्य के मिथुने साग्निवेदिकामिति
॥ हस्तोच्छ्रयां ॥ सोपानकरणं पश्चिमभागे ॥ उपरि चतुर्दिक्षु वा अन्ये यथाचारं ॥ सोपानातिरेके

प्र०रत्न
११५

राचतुर्हस्ताचतुरस्रा॥ ॥इतिविवाहवेदी॥ ॥अथविवाहसर्वविधिनिरूपणं॥ ॥वधूपितावरपिताचवि
वाहदिनात्पूर्वेद्युः पूर्वाह्णे सपत्नीकः कृताभ्यंगो धृतमांगलिकवेषः कृतलेपनमांगलिके प्रागग्रेषु भा
सनेषु प्राङ्मुखउपविश्य स्वदक्षिणतः पत्नींतद्दक्षिणतः कन्यावरयोरुपवेश्याचम्यप्राणानायम्येष्टदेवता
गुर्वादिनमस्कारं कृत्वादेशकालौसंकीर्त्यास्मामुकशर्मणःपुत्रस्यमुष्वःकरिष्यमाणविवाहांगभूतंस्व
स्तिवाचनादीनिकुर्यात्॥ ततोनांदीश्राद्धात्पूर्वंवरपात्रोपरिवस्त्रेणशापत्याघागोर्यादिषोडशमा
तृ्यादिसप्तमातृकासंपुटकपुंजेषुस्तकेरीत्याप्रतिष्ठापूर्वकंपूज्याः॥ प्रयोगपारिजातेतुनांदीश्राद्धम
ध्येघृतमातृकास्वस्तिवाचनोत्तरंतुवरकर्तृकमित्युक्तंगृह्यचारेणीयो॥ कन्यापितापि अस्माऽमुकना
म्न्याः कन्यायाः करिष्यमाणोत्पत्तिविशेषणसंकल्प्यसर्वंकुर्यात्॥ ततोवरपिताचार्येणकौतु
कबंधायेस्वत्रदयंपूर्वोक्तरीत्याकारयेत्॥ ततद्वयमाचार्यःकौतुकबंधोक्तमंत्रेसंतत्रेणाभिषिंचयजा

एम०
११५

तवेरसरत्यचामंत्राहृत्वागंधेनलेपयित्वास्वुदेशेमत्स्यातंमिरध्यात् पमंडपरेवत्ताप्रतिष्ठाचेत्यंकार्या॥
हूर्वाशमीपत्रेकुलरेवंवृक्षपत्त्रवानाम्नादिप्रशस्तवृक्षेषत्रैवेष्ठितान्सूत्रेणावेष्टावेष्टयेत्॥ तत्रैकत्र
मुशलमेकत्रचक्षुरिकादिशाहृत्यमध्येमक्षिप्यवेष्टयेत्॥ तानिषड्डूंशपात्रेनिधायतन्मध्ये३कंलंच्छिपु
चलुपुष्केमणानेरिनीनलिनीमेत्रामासतुतरस्थमुसलगर्भेपत्रुवनीतदुतरस्थेशत्रुगर्भेभगव
तीतंडुलपूगीफलयुतेन्युज्जशरावपिहितहारिद्रादिमंडितेशरावेशासहस्रवेष्टिते [illegible] तेर
[illegible] स्थानकलशे आविघ्नसंसंगणपतिं चावाह्यतदक्षयग्रहायै प्रतिष्ठेति [illegible] नोंकारस्थितम
तिष्ठापयनीराज्यश्रीस्नानादिनाचमनीयांतोपचारैःपजयित्वातेलोद्धृतैनोहेडारकैरभ्यंगस्ना
नंपक्ष्लावेष्टितानांकारयित्वागंधादिदक्षिणांतोपचारैःपूजयेत्॥ पश्चात्लिंदत्वानीराज्योत्थाय
सपत्नीकश्चाग्नेयकोणस्थमंडपस्तंभोपरिनंदिनीनामकंवेष्टितंतदक्षयग्रहायै इतिस्थापयित्वातत्र

प्र० रत्न०
११८

नंदिनीं पूजयेत्॥ तच्चेत्थं॥ समुद्रस्येष्ठा आपोहिष्ठा इति मंत्राभ्यां प्रोक्षणं गंधद्वारामिति गंधाक्षतैर्दधिक्राव्णा
इति दधिकांडात्कांडादिति दूर्वापुष्पाणि समर्पयेत्॥ ततो नैर्ऋत्यवायव्येशानस्तंभेषु मंडपमध्योपरिभागेका
ष्ठे चक्रमेखानलिनीमंत्रामायुष्मत्वर्द्धिनीनामकवेष्टितां निवृत्तं स्थापयित्वा पूजयेत्॥ या आयो दिव्या इति
न लिंग्याः प्रोक्षणे मंत्रः॥ या संराडेति मेनकायाः॥ या सुराजेत्युमायाः॥ समुद्रस्येष्ठा इत्यादि चत्वारोपि पञ्चवर्द्धि
न्याः॥ अन्यत्सर्वं समानं॥ ततो वंशपात्रेण सह भगवती गौर्यादि मातृकास्थापने वंशपात्रं चत्वरं गृहीत्वा
अविघ्नकलशं च पत्न्या आहरयित्वा सब्राह्मणाः कनिक्रदज्जनुषमिति सुमंगलसूक्तं पठन्मंगलवाद्यघोषपुरः
गृहं तत्र गत्वा प्रशस्तेलंकृते शानदेशे तंदुलादिपुंजे तत्र योपवित्री स्थापयित्वा तत्र स्कु गृहावेद इति पठि
त्वा चंदनादिना पूजयेत्॥ अन्यदपि यथाकुलधर्मं सर्वं कुर्यात्॥ एवमेव मंडपे मंडपदेवकप्रतिष्ठा चोपन
यनेपि ज्ञेया॥ ततः कर्मांगदेवताकुलदेवताप्रीत्यर्थं द्विजसुवासिन्यादिभोजनं कार्यं॥ आगतोत्तु॥ सर्वमे

२

रत्न०
११८

तद्विवाहदिनएवपूर्वंकुर्यात्॥ ॥इतिप्रयोगरत्नेमंडपदेवकादिप्रतिष्ठा॥ ॥अथवरस्यवधूगृहगमनं॥
॥वरःकृतनित्यक्रियोविधिवत्कृतस्वस्तिवाचनोब्राह्मणैःसहसात्विकाहारंभुक्त्वाअभुक्त्वावाइष्टदेवतां
नत्वासदशंपरेणा छत्रंवस्त्रयुगलंचधृत्वाअलंकृतःस्त्रग्वीइष्टदेवतांपित्रादींश्चनमस्कृत्यतैरनुमोदितोऽश्व
याविभवमन्यद्वादियानमारुह्यधृतसितछत्रःस्वर्चितेर्दीप्तिबाधकैः॥ कनिक्रदज्जनुषमितिसुमंगल्यसू
क्तपठनपरैर्ब्राह्मणैःपुरंध्रीभिःपूर्णकलशदर्पणकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगलद्रव्यैश्च
सहवधूगृहंगत्वातद्द्वारदेशेप्राङ्मुखस्तिष्ठेत्ततोनीराजनपूर्णकुंभयुतैःपुरंध्रीजनैःप्रत्युद्यातोनीराजि
तोऽन्तर्गृहंप्रविश्यतदंगणेमंडपाधःसोत्तरच्छदेहर्षितदर्भास्तीर्णेचतुष्पादभद्रपीठेप्राङ्मुखउपवेशयेत्
॥ ॥अथमधुपर्कः॥ तत्रकन्यादातावरस्यपुरतःसुस्नातामलंकृतामहतवाससंगंधानुलिप्तांस्त्रग्विणीं
भुक्तवतींकन्यांमपाविधायसनेप्रत्यङ्मुखीमुपावेश्यतांपुरस्कृत्यसामात्यःसपत्नीकउपविश्यागतो

लौकिकाचमनार्थं

प्र॰रत्न॰ यद्वरायतच्छाखोक्तविधिना मधुपर्कं कुर्यात् ॥ तत्रायं क्रमः ॥ पाद्यार्घ्याचमनीयार्थं मंत्रवान्नं राचमनीयार्थं च ज
११७ लपात्रचतुष्टयं मधुयुक्तं दध्याख्यं मधुपर्कं कांस्यपात्रं गां च पंचविंशतिदर्भैः वाग्रग्रंथ्या मावर्तेन कृतं
विष्टरं च संपाद्य प्राशनाय मध्यदेशकालौ स्मृत्वा ॥ कन्यार्थिने गृहागताय स्मै स्नातकाय वराय कन्याद
नोगभूतं मधुपर्कं करिष्ये इति संकल्प्य ॥ कन्यार्थिनमित्यादि द्वितीयांतमुक्त्वा मधुपर्केणार्हयिष्ये इ
ति वा संकल्प्य प्रागुक्तलक्षणं गां दर्भमयं कूर्चं विष्टरो विष्टरो विष्टर इति त्रिर्निवेद्य ॥ स नार्थं वरः हस्तेन द्या
त् ॥ वरस्तु ॥ अहं वर्ष्म त्यस्य वामदेवो विष्टरो नुष्टुप् विष्टरे विनि ॥ ॐ अहं वर्ष्म सजातानां विद्युतामि पवेशाने
व सूर्यः ॥ इदं तमभितिष्ठामि यो मा कश्चाभिदासति इति मंत्रेणोदगग्रे विष्टरे उपविशेत् ॥ विशेत् ॥ वि
ष्टरं मंत्रेण पादयोरास्यमाक्रम्य वा ॥ सीत ॥ प्रयोगपारिजाते तु अयमत्र मंत्रेऽकृष्यादित्यस्यांने छंदिति ॥ त
तो द्वितीयेन पाद्यं पाद्यं पाद्यमिति त्रिर्निवेदितं पाद्यं वरो गृह्णीयात् ॥ ततोऽर्चकस्तेनोदकेन वरस्य दक्षि राम॰
११७

णामव्योपादौ क्रमेण क्षालयेत्॥ ततो वरो लौकिकेन जलेनाचम्य॥ गंधमाल्यफलादिसंयुक्तं पूर्वव
त्त्रिर्निवेदितमर्घ्यमंजलिना प्रतिगृह्य पूर्ववत्त्रिर्निवेदितमाचमनीयं प्रतिगृह्य ततस्यैकदेशं गृही
त्वा अमृतोपस्तरणमसीति मंत्रेण पीत्वा लौकिकजलेनाचम्याऽनीयमानं मधुपर्कमभिवस्य त्वा च
क्षुषा प्रतीक्षस्व इत्यवेक्ष्य॥ मधुपर्को मधुपर्को मधुपर्क इति त्रिर्दात्रा निवेदितं मधुपर्कमादेवस्य त्वा
सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति मंत्रेण जलिना प्रतिगृह्य अंजलि
स्थमेव मधुवाता इति तृचेनावेक्षेत॥ मधुवाता इति तृचस्य राहूगणो गोतमो विश्वेदेवा गायत्री
॥ मधुपर्कावेक्षणे विनियोगः॥ ॐ मधुवाता ऋतायते० ऋक् ३ ततः पात्रं सव्यहस्ते धृत्वांगुष्ठानामिकाभ्यां
मधुपर्कं त्रिः प्रदक्षिणमालोड्यांगुलिगतं मधुपर्कलेपं वसवस्त्वा गायत्रेण छंदसा भक्षयंत्विति पू
र्वस्यां निक्षिपेत्॥ एवं रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंत्विति दक्षिणस्यां दिशि निक्षिपेत्॥ आदित्यास्त्वा जागते

प्र॰रत्न॰
११८

नछंदसामभक्ष्यंत्विति पश्चात्॥ विश्वेत्वादेवा आनुष्टुभेन छंदसा भक्ष्यंत्विति [illegible] स्तुतर
तः क्रित्वा॥ न्यूते भ्यस्त्वितित्रिरावृत्तेन मंत्रेण [illegible] मध्या॥ किंचित्किंचिदाहृहीत्वा त्रिरूर्ध्वं क्रित्वा मधु
पर्कपात्रं भूमौ निधाय [illegible] देशं गृहीत्वा॥ विराजोदोहोसीतिप्राश्य लौकि
कोदकेनाचम्य॥ पुनर्गृहीत्वा विराजोदोहमशीयेति प्राश्य पूर्ववदाचम्य पुनर्गृहीत्वा॥ मयिदोहः
पद्यायै विराजः इति प्राश्य [illegible] पूर्ववदाच

प

म्य॥ मधुपर्कशेषमुदङ् [illegible] ब्राह्मणाय प्रयच्छेत लौकिकोदिद्विरुत्वाधाऽप्सु निक्षिप्य॥ पूर्ववन्निवेदि
तान्चमनीये कूर्चे शं॥ अमृतापिधानमसीति पीत्वा लौकिकोदकेनाचम्याऽचमनीयजलशेषं सर्वं गृ
हीत्वा॥ सत्यं यशः श्रीर्मयि श्रीः श्रयतामिति प्राश्य लौकिकोदकेन द्विराचामेत्॥ ततो दात्रा गोर्गौरि
वितित्रिर्निवेदितां गां॥ माता रुद्राणामित्यस्य भार्गवो जमदग्निर्गौर्द्विष्टुप्॥ गोउत्सर्जने वि॰॥ ॐ मा

रा॰म॰
११८

तारुद्राणां दुहिता वसूनां० ऋक् १ इति मंत्रं जपित्वा ओमुत्सृजतेत्युक्त्वा विसृजेद्गां ॥ ततो दाता गंधमाल्य
वस्त्रयुग्मोपवीतयुगाभरणादिभिर्वरं यथाविभवं पूजयेत् ॥ ततो वरेणासहागतानुक्तद्रव्यैस्तानपि पूजयेत्
॥ विष्टरलक्षणं परिशिष्टे ॥ पंचाशता भवेद्ब्रह्मा तदर्धेन तु विष्टरः ॥ ऊर्ध्वकेशो भवेद्ब्रह्मा लंबकेशस्तु वि
ष्टरः ॥ दक्षिणावर्तको ब्रह्मा वामावर्तस्तु विष्टर इति ॥ मद्ब्रा ॥ पंचविष्टरा ऊर्ध्वक इति ॥ पद्या ॥ पंचविंश
तिदर्भाणां वेण्यग्रे ग्रंथिभूषिता ॥ विष्टरे सर्वयज्ञेषु लक्षणं परिकीर्तितं ॥ मधुपर्के दध्यलाभे पयोनस्तेवा
प्रतिनिधिः ॥ मध्वलाभे घृतं गुडो वा ॥ वरशाखया मधुपर्कदानमुक्तं गृह्यपरिशिष्टे ॥ वरस्य यामवेच्छा
स्वातच्छाखाश्च गृह्योदितः ॥ मधुपर्कः प्रदातव्यः अन्यशाखेपि दातरीति ॥ ॥ इति मधुपर्कः ॥ ॥ अथ
कन्या स्नाता परिहिताहतवस्त्रा गृहान्तःस्तंभे वेष्टितोपलसहितदृषदुपरि हरिद्रानिर्मितां गौरीं हरौभा
ग्यादिकामनया प्रणयित्वा इंद्राणीं चेतत्रैवाकृतं पूजेत्पूजयित्वा प्रार्थयेत ॥ देवेंद्राणि नमस्तुभ्यं देवेंद्र

प्रियभामिनि॥ विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमेइति॥ ततोगौरींसौभाग्यादिप्रार्थयमानातत्रैवति
ष्ठेत्॥ अथकन्यादानाचर्यजलमुद्दि[illegible]पुरोधावरदक्षिणातउदङ्मुखउपविश्यमध्येमांगल्यान्वा
द्यभोगास्तीर्यतेषुतेनसंमुखदत्तीर्थादितत्तत्पूर्णकलशंनिधायव्रीहियवानोप्यगंधपुष्पादिभिरलंकृत्य
दूर्वापल्लवैर्मुखमवस्तीर्यदि[illegible]गामिर्गभिमभिमंत्रयेत्॥ अथकन्यादानादि॥ ब्राह्मणाःस्वलंकृतेवस्त्रम
निसमंगलतूर्यनिर्घोषेक्रियमाणेपूर्वापरभागयोर्हस्तांतरालंविहायप्रत्येकंप्रत्येकं[illegible]प्रस्थ
मितंतंडुलैर्द्रोणराशीकृत्वामध्येकुंकुमादिकृतस्वस्तिकंकृत्वमंतःपटंधारयोर्मध्येउत्तरदशंधारयेयुः॥ अ
थएवंराश्यौप्रत्यङ्मुखवरंपश्चिमराशौचप्राङ्मुखींकन्यांतंडुलगुडजीरकयुतांजलीउभावपहस्तावुद्धि
त्राःसत्यनेत्रमितीतिसूक्तंपठेयुः॥ पुरंध्रयोमंगलगीतीःकुर्युः॥ वधूवरौचमनसेष्टदेवताध्यायंतौसम
माहितौतिष्ठतां॥ अथज्योतिर्विकेनमंगलपपघपा[illegible]पाठएवंकंसुमुहूर्तोऽस्तुतदेवलग्नमितिपठि

तेप्रविष्टिकालेसमयेंतःपटमुद्दगपसार्यकन्यावरांभ्यांपरस्परस्मिन्नंजलिस्थतंडुलगुडजीरकाववकिर
णंपरस्परनिरीक्षणंचकारणीयं॥तदाकरः॥अत्रमंत्रः॥अभ्रातृघ्नींवरुणापतिघ्नींबृहस्पते॥इंद्रापुत्रघ्नींलक्ष्म्यंतामस्मै
सवितःसुवइतिजपन्वीक्षेत॥अघोरचक्षुरपतिघ्न्येधीतिकन्ययावरस्यमानोजपित्वा॥दर्भाग्रेणतस्याभ्रुवोर्म
ध्येॐभूर्भुवःस्वरितिव्याहृतिभिःपरिमृज्यदर्भंनिरस्यापउपस्पृशेत्॥ततस्त्रिवारंपंचवारंवापरस्परंशि
रसिरुक्मकंचुकादिखंडांतेवधूपूर्वकमेकत्रस्थापितौकृतौपरस्परांकारणीयमाचारात्॥अथ्याऽन्नकृशाकु
नवःसावित्रिवरंप्राश्नुर्वंवधूंचप्रत्यश्नुर्वीकृत्वा॥पित्रादिदत्तालंकारवस्त्रादिरहितांस्वदेयाभरणाच्छ
दंकृतांवधूंवस्त्रसंहतेकाहतवस्त्रपरिधानामुक्त्वास्थापनावरायरघात्॥तत्रायंक्रमः॥दातावधूवरदक्षि
णतःस्वदक्षिणहस्तदेशस्थपत्नीसहितउदङ्मुखउपविश्यबद्धशिखःस्पृश्यचिराचम्यउत्तरीश
याशिःप्राणानायम्यदेशकालौसंकीर्त्य॥ममसमस्तपितृणांनिरतिशयसानंदब्रह्मलोकावाप्त्यादि

१७

म०र०ल०
१२०

कन्यादानकस्योक्तफलावाप्तयेऽनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंततत्या द्वादश वरान्द्वादश प
रान्पुरुषान् पवित्रीकर्तुमात्मनश्च लक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करि
ष्ये इति कुशाक्षतसहितयुतजलेन संकल्प्य सपत्नीकश्वशुरो ददन्नुरवे एव कन्यां संप्रतिगृह्य ॥ कन्यां क
नकसंपन्नां कनकाभरणैर्युतां ॥ दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ विश्वंभराः सर्वभूताः सा
क्षिण्यः सर्वदेवताः ॥ इमां कन्यां प्रदास्यामि पितॄणां तारणाय च इति मंत्रौ पठित्वा ॥ वरदक्षिणात सहभार्याद
त्तं पूर्वकल्पितजलधारामविछिन्नां नवकांस्यपात्रोपरि धृतकन्याञ्जल्युपरिस्थ वराञ्जलिधृते करोह
स्ते क्षिपन् दद्यात् ॥ कन्यातारयतु पुण्यं वर्धतां ॥ शिवा आपः संतु सौमनस्यमस्तु ० अक्षतं चारिष्टं चास्तु ०
दीर्घमायुः श्रेयः शांतिः पुष्टिर्वर्धतां ॥ [illegible] ० ॥ यच्छ्रेयस्तदस्तु ॥ यत्पापं तत्प्र
तिहतमस्तु ० पुण्याहं भवंतो ब्रुवंतु ० स्वस्ति भवंतो ब्रुवंतु ० ऋद्धिं भवंतो ब्रुवंतु श्रीरस्त्विति भवंतो ब्रुवंतु

ए.म०
१२०

॥ अमुकगोत्रोऽमुकशर्माहं ममसमस्तेत्यादि प्रीतयस्त्पंतं एवोक्तमुक्त्वा अमुकामुकप्रवरोपेताममु
कगोत्रायामुकगोत्रायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकशर्मणे श्रीवररूपिणो वरायामुक
प्रवरोपेताममुकगोत्राममुकप्रपौत्रीममुकपौत्रीममुकस्य मम पुत्रीममुकनाम्नीं कन्यां श्रीवररूपिणीं प्र
जापतिदेवत्यां प्रजोत्पादनार्थं तुभ्यमहं संप्रददे न मम कन्यां प्रतिगृह्णातु भवान् इति वरहस्ते सकुशाक्ष
तं जलं क्षिपन् प्रजापतिः प्रीयतां ॥ मतिं मनसा स्मरेत् ॥ कन्यादानेन ममेति न वाच्यमिति केचित् ॥ एवं वारत्र
यं कन्यां तारयत्वित्यादि कन्यादानं कार्यमिति शौनकस्त्वाह ॥ वरः ॐ स्वस्तीमुक्त्वा कन्याया दक्षिणांसमभि
मृश्य ॥ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामं समुद्रमावि
श कामेन त्वा प्रतिगृह्णामि पृथ्वि वदेत् ॥ दाता कामैतत्ते हे वि रश्मि ये त्वा ददातु पृथिवी प्रतिगृह्णात्विति
जपित्वा ॥ धर्मप्रजासिध्यर्थं कन्यां प्रतिगृह्णामि इति वदेत् ॥ दाता ॥ गौरीं कन्यामिमां विप्र यथाशक्ति

क०र०ल०
१२१

विभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः॥ कन्ये मे
पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयां॥ मम वंशकुले जाता पालिता वर्षसप्तकमित्याद्यूहः कार्यं॥ धर्मे वा
त्सराष्टकं॥ तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्द्धिनी॥ न्यूनवयस्कायां पालिता वर्षसप्तकमित्याद्यूहः कार्यः
॥ धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयं॥ नातिचरामीति वरः॥ दाता देशकालौ स्मृत्वाहृत्य तस्य कन्या
दानस्य प्रतिष्ठासिध्यर्थमिमां दक्षिणां तुभ्यमहं संप्रददे इति सजलं यथाशक्ति सुवर्णं दानदक्षिणात्वेन
वरहस्ते दत्वा न ममेति वदेत्॥ ॐ स्वस्तीति वरः॥ ततो दाता जलभाजनभाजनगोमहिष्यश्वगजदासी
दासभूवाहनालंकारादि यथाविभवं वैपकस्य पूर्वकं वराय दद्यात्॥ तत्र मंत्राः॥ पत्नसाधनभूता या विश्व
स्याघप्रेरणी शुभा॥ विश्वरूपधरो देवः प्रीयतामनया गवा॥ गोः॥ सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता॥ अ
नंतसस्यफलदा अतः शांतिं प्रयच्छ मे॥ भूमेः॥ इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता॥ सदा कर्मकरी मे

॥भ०
१२१

ग्याय पेषं भद्रमस्तु ते ॥ दास्यः ॥ अश्वन्यंशयने नित्यमनंतं ॥ श्रियमुन्नतिं ॥ सौभाग्यं देहि मे नित्यं शय्या
दानेन केशव ॥ शय्यायाः ॥ हिरण्यगर्भसंभूते सौवर्णं चांगुलीयकं ॥ सर्वप्रदं प्रयच्छामि प्रीणातु क
मलापति ॥ ॐ उलद्धयोः ॥ इदं गंधं गं हाराः ॥ ह्वसर्वेषा ॥ अंगुलीयकस्य ॥ क्षीरोदमथने पूर्वमुद्ध
तं ॐ उलद्धयं ॥ श्रियासह समुद्भूते देवश्रीः प्रीयतामिति ॥ ॐ उलद्धयोः ॥ इदं गं हं गं हाराः ॥ त्वं सर्वौ पल्क
रसंयुतं ॥ तव विप्रप्रसादेन मम स्यादभिमतं फलं ॥ गृहस्य ॥ इंद्रादि लोकपालानां या राज्यमहिषी
शुभा ॥ महिषासुरस्य जननी सा त्वं मे सर्वकामदा ॥ महिष्याः ॥ परामवारदपैः पूज्यां देव भक्तस्य च
भक्तरणात् ॥ ७ तस्य न्यायप्रदानेन ताम्रपात्रस्य नश्यंतु ॥ ताम्रपात्रस्य ॥ यानि यापान्यकाम्यानि का
मोत्यानि कृतानि च ॥ कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदा ॥ कांस्यपात्रस्येत्यादि ॥ अथ वद ॥ य
त्को ह्वीवांसं वनेन विमुंचे देवाऽनुपूप ॥ उस्य भिमर्शने वि० ॥ ॐ यत्को ह्वीवांसंवने उत्रो अंगिरसा

मवेत्॥ तेन नो घव्विश्वे देवाः संमियां समचीचरन् नित्यनेन कन्यार्द्दिराक्त विमभिमर्शेत्॥ अथ पुरो
धाः कांस्यपात्रे पूर्वाह्लितकलशजलमासिच्य अनाधृष्टमित्यस्य वामदेव आपो ग्रह त्रीऽदकाभिमंत्र
णे वि०॥ ॐ अनाधृष्टमस्यनाधृष्यं देवानामोजो अभिशस्तिपाः॥ अनभिशस्त्यं जसा सत्यमुपगेषं स्वि
ते माधाः इति जलमभिमंत्र्य सहिरण्यपवित्रया सकुशदूर्वया पल्लवयासपरीयोदुंबर्या इं शाखया वधूं व
रां च अभिषिंचेत् तत्र मंत्राः॥ आ नः प्रजामिति च ततस्रः सोमः सूर्या सावित्री सूर्या सावित्री आपो जगती द्वि
तीया त्रिष्टुप् तृतीयेत्यादि अनुष्टुभो अभिषेके वि०॥ ॐ आ नः प्रजां जनयतु० ऋ०४ समुद्रज्येष्ठा इ
ति चतसृणां वसिष्ठ आपस्त्रिष्टुप् अभिषेके वि०॥ ॐ समुद्रज्येष्ठाः० ऋ०४ आपो हि ष्ठेति तिसृणां
मांबरीष सिंधुद्वीप आपो गायत्री अभिषेके वि०॥ ॐ आपो हि ष्ठा० ऋ० ३ वरुणेवोदकाभिमंत्र
णा कन्याभिषेकौ कुर्यादिति कश्चित्॥ ततो दुग्धाक्तेन द्विगुणगुणसूत्रेण सारं यती कंठदेकटिदेशे

शेकटिदेशेचैशान्नीमारभ्यपंचवारंचतुर्वारंवाप्रदक्षिणंवेष्टयेत्॥ पुरेपाश्तैर्मंत्रैः॥ ॐ परित्वागि
र्वणोगिरः॰ रू कू १ ताम्बेवामहोमरुतएवया वृ॰ कक १ २ शावनिभ्योदृशाकर्केभ्यो॰ कक ४ ततः कंठ
देशस्थंसूत्रमधोनिष्काश्यपक्तौकमात्केमणीयुक्तंचक्रत्वा तेनहरिद्राखंडंबध्वातद्वर्ष्वामहस्तप्रको
ष्ठेवरोबध्नीयात्॥ नीललोहितंभवतीतिमंत्रेण॥ कटिदेशस्थंसूत्रमुपरिनिष्काश्यतादृशंकृत्वा
वरदक्षिणहस्तप्रकोष्ठेवध्वर्बध्नीयात् तेनैवमंत्रेण॥ कटिदेशस्थंसूत्रंवेष्टनापकृत्वैवपूर्वसं
पादितकौतुकसूत्रद्वयमध्येएकंसूत्रंपुरोधसाविभक्ता तेसर्वेनेघुञ्कक १ इतिमंत्रेपठितेकन्याव
रस्यदक्षिणहस्तेबध्नीयात्॥ वरोप्यपरंसूत्रंतथैवकन्यायावामहस्ते॥ परिसूत्रवेष्टनंक्रियतेतत
दातत्सूत्रबंधनमेव॥ कौतुकसूत्रसंपादनंतुपूर्वोक्तेनकार्यं॥ ततः अग्नेविश्वेभिरवरतहव्यागृणावि
पृ॥ ऋणाहिकबंधनेवि॰॥ ॐ अग्नेविश्वेभिःस्वनिकटैवेरितिमंत्रेणवध्वादक्षिणात्त्रेके

शेपक्रयोः क्रमेणमंत्रावृत्याकुशंडेदशां वध्नीयात्॥ कुशस्तकबंधनमाचारतः॥ कृताकृतं शिरवेविमुंचतियदिकृते भवतइत्यग्रेसत्रनिर्देशात्॥ अथवधूवरयोः पूर्वेद्युर्नकरमकृतारोपसंकुर्यातां॥ तद्यथा॥ तैजसपात्रेगव्यक्षीरे घृतमाषिच्यपात्रांतरेऽनोद्गीकृतशुष्कशालितंडुलानादायवरःक्षालितपाणिः प्रक्षालितवध्वंजलौ क्षीरघृतेस्वहस्तद्वयांगुलिभिर्द्विरुपस्तीर्यद्विवारंतथैवतंडुलानोप्यतेनतथैवद्विरभिघारयेत्॥ ततोवरांजलावप्येवमेवदात्रान्येनवापूरिते दाताततंजल्योः सुवर्णंनिधाय वरांजलिंकन्यांजलसुपरिनिधाय॥ कन्यातारयतु० दक्षिणाःपांतु० वहुदेयंचास्तु० पुण्यंपवर्द्धतां० शांतिःपुष्टिस्तुष्टिश्चास्तु० तिथिकरणमुहूर्तनक्षत्रसंपदस्तु० इत्युच्चार्यकन्याम्रुद्धृत्यतपोजलिस्थानकृतान्भगोमेकामःसमृध्यतामितिवरमूर्द्धन्यारोपयेत्॥ ततोवरःस्वांजलिस्थांश्चयहोमेकामःसमृध्यतामितिकन्याशि

रश्मिन्क्षिपेत्॥ एवं पुनर्द्विवारं कार्यं॥ तत्र द्वितीये श्रियो मे कामः समृध्यतामिति वधूः॥ धर्मो मे कामः समृध्यता
मिति वरः॥ तृतीये प्रजा मे कामः समृध्यतामिति वधूः॥ यशो मे कामः समृध्यतामिति वरः॥ ततः कन्याव
रांजलिं द्विरुपस्तीर्य द्विःसंतुष्टैः लाजैः पूर्य द्विरभिघारयेत्॥ ततो दात्राऽन्येन वा पूर्ववत्कन्यांजलौ वापरितेदा
तापूर्ववद्द्विःशांयमिधाय कन्यांजलिं वरांजलौ निधाय पूर्ववत्कन्यातारयांत्विन्त्यादिवाक्यं पठन्वदेत्॥
ततो वरः॥ यज्ञो मे कामः समृध्यतामिति कन्यामुद्धे दत्तान्निक्षिपेत्॥ कन्या तु भगो मे कामः समृध्यता
मिति वरमुद्दिश्य॥ एवं पुनर्द्विवारं कारं कार्यं॥ तत्र द्वितीये धर्मो मे इति वरः॥ श्रियो मे इति वधूः॥ तृतीये
यशो मे इति वरः॥ प्रजा मे इति वधूः॥ अथ वरो वध्वंजलिं पूर्ववच्च दापूर्य स्वांजलिमन्येन पूर्ववत्पूरयित्वा
भौ वधूपूर्वकं तत्स्थलीमकृत्वा नारोपयेत्॥ एवं सप्तवारमकृतारोपणं कार्यं॥ केचिदकृतारोपणो भगो
मे इत्यादिमंत्रानेच्छंति॥ अथ वरः स्वशिरः पुष्पमेकं क्षीरघृते मात्स्याव्यते न कन्याललाटे तिलकं कु

प्र० रत्न०
१२४

यीत॥ सापि स्वशिरः पुष्पेणातथैव वरललाटे तिलकं कृत्वा पुष्पमालां वरकंठे निदध्यात्॥ वरोपि कन्या
कंठे॥ ततो वरपक्षस्तुवासिनी वधूवरौ प्राङ्मुखावुपवेश्याचारप्राप्तपट्टसूत्री संवेष्टि[illegible]तकं वस्त्रद्वयं
सकंचुकं कन्यमरोसस्त्रपुतं बध्वैस मर्प्यतामेकं परिधाप्याऽपरमुत्तरीयं कुर्यात्॥ ततो वरस्तत्सूत्रा
मोगल्यतंतुनानेन भर्तृजीवनहेतुना॥ कंठे बध्नामि सुभगे सा जीव शरदां शतमिति मंत्रेणाष्टदेवतां स्म
रन्वधूकंठे बध्नीयात्॥ भूपरौ स्त्रायुष्यं वर्चस्यमिति सूक्तं पठन्नुपयेत्॥ ततो हरिद्राखंडयुतानि पं
चपुगानि स्त्राचारात्लडुकयुतानि पात्रे निधाय तत्र पुरोधाउभाभ्यां पूजां कारयेत्॥ तत्र ब्राह्मणेभ्यो
वरेणायथाशक्ति गणपतिप्रीतये दक्षिणा देया॥ ततः पुरोधा लानि हरिद्राखंडादियुतानि तंदुलो
त्तरीयांतयोः पृथक् पृथक् बध्वा विवाहव्रतरक्षणार्थं गणपतिं मे तुष्यत्वप्रीतामंत्राभ्यां बध्नीयात्॥
वधूवरौ विवाहव्रतसमाप्त्यंतं न पृथि द्वयेन विसर्जेतां॥ ततः पुरोधा ना चलो हितं भवतीति मंत्रेण ता तागमं०

१२४

योरुत्तरीयांतौमिथो बध्नीयात् ॥ ततः सभार्यो दाता वृद्धाः पुरंध्रयो ज्ञातिबांधवाश्च क्रमादाशीर्भिरार्द्रीकृता
शेषरां कुर्युः ॥ ततो दंपती पात्रस्थाक्षितंडुलपुंजत्रये ३ २ कुमंस्थयाम हाल स्मीपार्वतीशचीच षोडशोपचारै
र्नाममंत्रेणाभ्यर्च्य सौभाग्यादि प्रार्थयेतां ॥ अथ तिथ्यादि समकीर्त्य चतुर्दिवसपर्यंतं विवाहव्रतं च रिष्या
वहे इतिसंकल्प्य प्रथमदिने गौरीहरी सोमाम्बुनारायणौ पूजयेतां ॥ ततो वधूर्हरिद्राक्षीरकादि मंग
लद्रव्यपरिपूर्णानि वंशपात्रोपायनानि सुवासिनीभ्यो लक्ष्म्यादिदेवतात्रयप्रीत्यै यथाशक्ति दद्यात्
॥ अथ द्विजेभ्यो शिषो देयाः ॥ तत्र मंत्राः ॥ भद्रं कर्णेभिः ० ऋ कु १ ८ विश्वेदानाय विशामः ० ऋ कु १ सविता
पश्चातात् ० ऋ कु ० नवो नवो भवति ० ऋ कु १ ३ ब्राद्दिवि ० ऋ कु १ ८ क्रिशाग वतामित्यादयश्चाशुः पठंताः
॥ ततो वधूवरौ परस्परहस्तधारणेन बहिरंगणस्थापर्चौकस्ल कणांवेदीमंत्रघोषणागच्छेतां ॥ प्रयो
गपारिजाते तु गृह्यपरिशिष्टानुसारेण कन्यादानतत्प्रतिग्रहनवधिकाप्पर्वकमंत्रवन्निर्दिष्टीकृता

कृताशेषगणाशास्त्यादिदानपुरोधःकल्ठकाभिषेकपरस्परक्षीरघृततिलककरणमाल्यारोपणापूर्वं संपादि
तकौतुकसूत्रबंधगणपतिपूजकमुकबंधनादीत्येवमनुष्ठानक्रमउक्तः सच देशाचारवशेनानु
सर्तव्यः ॥ अथ खलूच्चावचाजनपदधर्माग्रामधर्माश्च तान्विवाहे प्रतीयादिति सूत्रतः पदार्थानामत्र
सूत्र इव क्रमेपि समत्वाद्देशाचारप्रामाण्येनानुष्ठानावैनिदिक्॥ ॥इति रामेश्वरभट्टसूरिसूनु
नारायणभट्टकृते प्रयोगरत्ने कन्यादानप्रयोगः ॥ ॥ अथ विवाहहोमः ॥ ॥ वरः प्रागुक्तवेदि
कायां पीठासने प्राङ्मुख उपविश्य पश्चिममार्गेणानियमितवाचं वधूमानीय स्वदक्षिणत उपवेश्य
द्विराचम्य प्राणानायम्य देशकालौ संकीर्त्य प्रतिगृहीतायामस्यां वध्वां भार्यात्वसिद्धये गृह्याग्निसिद्धये
च विवाहहोमं करिष्ये तदंगं स्थंडिलोल्लेपनोल्लेखनाद्यग्निप्रतिष्ठापनं च करिष्य इति संकल्प्याऽग्निप्र
तिष्ठापनांते कृत्वाऽग्नेः प्रत्यक् दृषदं सोपलां प्रतिष्ठाप्य प्रागुदीच्यां धान्यराशौ रूपर्युदकपूर्णं कुंभं

निधाय तं पल्लवैरपिधाय गंधपुष्पैरलंकृत्योदगग्नेः समंततंडुलराशीन्नुपकल्प्य समिद्द्वयमादाय देशका
लकथनपूर्वकमस्मिन्विवाहहोमे देवताः परिग्रहार्थमन्वाधानं करिष्य इति संकल्प्याऽस्मिन्नन्वाहिते
ग्नौ जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं चाघारदेवते आज्येनाऽत्र प्रधानं अग्निं पवमानं अग्निं प
वमानं अग्निं पवमानं अग्निं प्रजापतिं चाज्येन अर्यमाग्निं वरुणाग्निं पूषाग्निं प्रजापतिं च लाजद्रव्येण
ज्यशेषेण स्विष्टकृतमित्याद्युक्त्वा समस्तव्याहृतिभिरन्वाधाय प्रजाप्य इदं न ममेति त्यक्त्वा परिसमू
हनादि कृत्वा पात्रासादने कुर्यात्॥ तत्र प्रोक्षणी स्रुवं चमसाज्यभाजने इध्माबर्हिष्यासाद्य पात्रपश्चिम
तो लाजशूर्पं चासाद्याज्याधिश्रयणांतं कृत्वा लाजैः सह पर्यग्निः कृत्वाज्योत्पवने कृत्वा लाजान् त्रिः प्रोक्ष्य स्रु
वं संमृज्य बध्वा चारं ध्वं इध्माधानाद्याघारहोमोक्तं यात्॥ आज्यभागौ हुत्वा॥ अथ प्रधानहोमः॥ आं यं पी
ति तिसृणां शातवैखानसा ऋषयः अग्निः पवमानो देवता गायत्री छंदः॥ विवाहप्रधानाज्यहोमे वि०॥ ॐ

१२५

प्र०रत्न०
१२६

अग्न आयूंषि०दुच्छुनां स्वाहा। अग्नये पवमानायेदं०॥ अग्निर्ऋषि० महागयं स्वाहा। अग्नये पवमानायेदं०॥
अग्ने पवस्व० पोषं स्वाहा। अग्नये पवमानायेदं०॥ त्वमर्यमा वसुश्रुतोऽग्निस्त्रिष्टुप्॥ विवाहप्र
धानान्यहोमे वि०॥ ॐ त्वमर्यमा भवसि०क्र गोभिः स्वाहा॥ अग्नय इदं०॥ प्रजापते हिरण्यगर्भः प्रजापति
स्त्रिष्टुप्॥ विवाहप्रधानान्यहोमे वि०॥ ॐ प्रजापते० रयीणां स्वाहा॥ प्रजापतय इदं०॥ एवं पंचाज्याहुती
र्हुत्वा प्राङ्मुखोपविष्टायाः पुरः प्रत्यङ्मुखस्तिष्ठन्वर उत्तानं दक्षिणं पाणिं सांगुष्ठमुत्तानेन नीचेन वा
स्वदक्षिणहस्तेन गृभ्णामि त इति गृह्णीयात् गृभ्णामीति सूर्या सावित्री सूर्या सावित्री त्रिष्टुप्॥ पाणि
ग्रहणे वि०॥ ॐ गृभ्णामि ते सौभगत्वाय हस्तं० रुक्॥१ ततो वधूमुत्थाप्य तया करेणालंभयित्वा तल्लिंको
रयित्वा प्राङ्मुख्यास्तस्या अंजलौ वरः स्रुवेणाज्यमुपस्तीर्य वधूभ्राता तत्स्थानीयेन वा पितृव्यपुत्रादिना
तिष्ठता शूर्पस्थाँल्लाजान्मुष्ट्या द्विरावाप्य तदुपरि च तं चावत्तोत्तरात्रिरवाप्य हवं शूर्पस्थानभिधार्यांजलिस्थ

रत्न०
१२६

नपिसकृदग्नि घार्यं॥ अर्यमणं वामदेवो ऽर्यमाग्निरनुष्टुप्॥ विवाहप्रधानलाजाहोमे वि० ॐ अर्यमणं
नु देवं कन्या अग्निमयक्षत॥ स इमां देवो अर्यमा प्रेतो मुंचातु नामुतः स्वाहेति मंत्रेण पठित्वा तिष्ठन्तिष्ठंत्या
व्रतांजलिरं जल्य विच्छेदेनां गुल्यग्रे रंजलि पार्श्वगणवा होमयेत॥ वरो अर्यमाग्नय इदं न ममेति त्यजेत्॥
ततो दक्षपदुपलवजेमग्निमुरस्कं मंपात्राणि च वर्ज्यं प्रदक्षिणं परिणाय स्वयमश्मारोगच्छन्‌जपेत्॥ ॐ अमोऽह
मस्मि सा त्वं सा त्वमस्यमोऽहं द्यौरहं पृथिवी त्वं सामाहमृक्त्वं तावेह विवहावहै प्रजां प्रजनयावहै संप्रियौ
रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतमिति॥ ततो वध्वं प्राङ्मुखीं द्वाभ्यामपि पादाभ्यां दृषदं॥ इममश्मा
नं वामदेवो वध्व्रनुष्टुप्॥ अश्मारोहणे वि०॥ ॐ इममश्मानमारोहाश्मेव त्वं स्थिरा भव॥ सहस्व पृतना
यतोऽभितिष्ठ पृतन्यतरः इति मंत्रेणारोपयेत॥ पुनः पूर्ववदं जल्युपस्तरणादि॥ वरुणं नु वामदेवो वरुणोऽग्नि
रनुष्टुप्॥ विवाहप्रधानलाजहोमे वि०॥ ॐ वरुणं नु देव कन्या अग्निमयक्षत॥ स इमां देवो वरुणः प्रे

तोमुंचातुनामुतःस्वाहेति पूर्ववेद्यावपित्वा कृणायायाग्नयइदंनममेतित्यक्त्वा। पुनरमोहमस्मीति पूर्वव
त्परिणीयेममश्मानमभितिष्ठस्वमाश्मारोपयेत्।। पुनः पूर्ववदंजलस्थुपस्तरणादि।। पूषणंनुवामदेवः पूषाग्निर
नुष्टुप्।। विवाहप्रधानलाजहोमेवि०।। ॐ पूषणंनुदेवंकन्याअग्निमयक्षत।। सइमांदेवः पूषाप्रेतोमुं
चातुनामुतस्वाहेति पूर्ववद्वावपित्वा पूषाग्नयइदंनममेतित्यक्त्वा।। पूर्ववदमोहमस्मीत्यग्निंपरिणा
येममश्मानमारोपयेत्।। ततोवधूवरौ।। वावशिष्टान्सर्वान्लाजानाभिमुखंशूर्पकोणेनजुहोति।। न
दावरः प्रजापतयइतिमनसास्मृत्वास्वाहेत्युच्चार्य प्रजापतयइदंनममेतित्यजेत्।। अत्रपरिणयनाश्मा
रोहहोमस्तः।। ततोवरः प्रत्वामुंचामीतिद्वयोः सूर्यासावित्री सूर्यासावित्री आद्यात्रिष्टुप्।। द्वितीयानुष्टु
प्।। शिखाविमोचनेवि०।। ॐ प्रत्वामुंचामि० द्वाभ्यां।। इतिरहिता शिखांविमुंचति।। ॐ प्रेतोमुंचामिना
मुतः० सुभगासतीत्युत्तरशिखांविमुंचति।। शिखाबंधनाभावेनविमोकः।। अथाग्नेरुदीच्यांसप्ततंडुला

शीन्याग्निमादितो बध्वादेन वरः क्रमेणा ऽभ्युक्त्वा मयेत्यमंत्रैः ॥ तत्र इष एकपदी भव सा मामनुव्रता भव ॥ पुत्रान्वि
दावहै बहूंस्ते संतु जरदष्टयः इति प्रथमं ॥ ऊर्जे द्विपदी भवे सादिना द्वितीयं ॥ रायस्पोषाय त्रिपदी भवेत्यादिना
तृतीयं ॥ मायोभव्याय चतुष्पदी भवेत्यादिना चतुर्थं ॥ प्रजाभ्यः पंचपदी भवेत्यादिना पंचमं ॥ ऋतुभ्यः ष
ट्पदी भवेत्यादिना षष्ठं ॥ सखा सप्तपदी भवेत्यादिना सप्तमं राशिं ॥ भवेत्यादिः सर्वत्रानुषंगः ॥ ततः पूर्वं स्था
पितस्तु दकुंभं केनचिदानाय्य तत्र स्थ एव वरः स्वशिरः यावत् स्वशिरः संयोज्य कलशस्थमुदकमादायादा
यादावात्मशिरः पश्चाद्वधूशिरः ॥ शोभिर्हिष्ठेत्यादि पंचदशमंत्रैरभिषिच्य स्वासनमुपविश्याज्येन स्विष्टकृ
द्धोमं कृत्वा इध्मसन्नहनहोमादि बर्हिर्विप्रणीपावनिनयनांतं समाप्य विस्रते वंदने कृते चमरस्तु पस्था
यपर्वं बद्धा वुत्तरीयां ततः स्त्री वि[illegible] स्वस्थिते विवाहे सायं संध्यामुपास्य ध्रुवारुंधती सप्तर्षिप्रभृतीन्वध्वा
सह दृष्ट्वा जीपेवेत्री प्रजां विंदेयेति वध्वा वाचयेत ॥ ततो वधूर्वा ड़िय मे विसृजेत ॥ रात्रिविवाहे संध्याम

प्र०रत्न०
१२८

नुपास्येवधूकवादिदर्शनादिप्रदोषकालोपलक्षणामेतत्॥ तेनमघादिनानक्षत्रदर्शनेपि तस्मिन्कालेवा
ग्विसर्गः॥ उत्तरातादिनादिवानक्षत्रदर्शनेपिनविसर्गः॥ एतदादिविवाहाग्निमभिरक्षेत्॥ विवाहादार
भ्यदंपतीगृहप्रवेशनीयहोमात्तरंत्रिरात्रं द्वादशरात्रं संवत्सरं वायावदक्षारालवणाशिनावलंकुर्वा
णावधःशायिनौ ब्रह्मचारिणौस्याताम्॥ ब्राह्मणस्यास्वगृहे द्वायावत्पतिकायाजीवत्सजायागृहे एतौरात्री
वसेताम्॥ ग्रामांतरेगांतव्ये पर्यंतरावासःस्यात्तदायंविधिःस्वग्रामेविवाहेतुन॥ ॥अथगृहप्रवेशनीयहो
मः॥ ॥अयंचगृह्यकृताप्रयाणविधेरनंतरमुक्तत्वात्समाख्यावशाच्च विवाहदिने दिनांतरे वास्वगृ
हएवगत्वाकर्तव्यइतिमुख्यःकल्पः॥ शिष्टास्त्वन्यत्रपुरगृहएवकुर्वंति॥ अत्रयथादेशाचारव्यवस्था
॥ प्रयोगपारिजातेप्येवं॥ ॥अथप्रयोगः॥ ॥वरःस्वगृहेदेशकालौसंकीर्त्य ममविवाहार्थंगृहत्व
सिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंगृहप्रवेशनीयहोमंकरिष्यइत्यादिसंकल्प्य स्थंडिलकरणाद्यग्नि

रत्न०
१२८

प्रतिष्ठां तं कृत्वा श्वसुरगृहे विवाहहोमानंतरमेवैतत्कर्त्तो तु अग्नेः स्थापितत्वात्संकल्पमात्रं कृत्वा प्रत्यगग्नेः
स्तरणं कृत्वा देशे प्राग्ग्रीवमुत्तरलोमकमानडुहं चर्मास्तीर्य तस्मिन्वधूमुपवेश्य तयान्वारब्धो गृहप्रवेशनीयहो
मे देवतापरिग्रहार्थमन्वाधानं करिष्य इति संकल्प्यास्मिन्नन्वाहिते ग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा
सूर्यासावित्रीं चतुर्वारमाज्येन शेषेण स्विष्टकृतमित्याघारकाले ऽग्नौ समिधावाधाय परिसमूहनादि कुर्यात् ॥
पत्न्यन्वारब्ध इध्माधानाद्याज्यभागांते कृत्वा ॥ आ नः प्रजामिति चतसृणां सूर्यासावित्री सूर्यासावित्री आद्या
जगती द्वितीयादि त्रिष्टुप् अंत्यानुष्टुप् ॥ गृहप्रवेशनीयप्रधानाज्यहोमे वि० ॥ ॐ आ नः प्रजां जनयतु०
शं चतुष्पदे स्वाहा ॥ सूर्यासावित्र्या इदं० ॥ ॐ अघोरचक्षु० शं नो भव द्विपदे शं चतुष्पदे स्वाहा ॥ सूर्यासावित्र्यै
इदं० ॥ ॐ इमां त्वमिंद्र० पतिमेकादशं कृधि स्वाहा ॥ सूर्यासावित्र्या इदं० ॥ ॐ सम्राज्ञी श्वशुरे भव० देवृषु स्वा
हा ॥ सूर्यासावित्र्या इदं० ॥ अत्र ऋगंते स्वाहाकारं पठन्नाज्याहुतीर्जुहुयात् ॥ समंजंत्वित्यस्य सूर्यासावित्री सू

प्र०र०स्त्र० १२९

यो सा क्विष्यन्तु पुत्र ॥ दधिप्राशने आज्यशेषेण हृदयांजने वा विं० ॥ ॐ समंजंतु विश्वेदेवाः दधातु नौ ॥ अनेन सह कृ
त्य ठि तेन दधि प्राश्य पत्नीमपि प्राशयेत् ॥ कृतशिष्टाज्येन वा स्वस्य पत्न्याश्च हृदयांजनं कार्यं ॥ हस्ते प्रस्था
प्यास्येन हविष कृत्वादि होमशेषं समाप्य पतिपुत्रवतीभिः कृतनीराजनौ दंपती द्विजाशीर्योगं गृहीत्वा सुदि
तौ तिष्ठेतां ॥ अत्र विशेष महाचार्यः ॥ अर्धरात्रे व्यतीते तु परेद्युः प्रातरेव हि ॥ गृहप्रवेशनीयस्यादिय
सं विदो विदुरिति ॥ ततो विवाहाद्द्वितीयाहे दंपती अप्सरोगंधर्वेभ्य ल्वामहादेवीत्व तीयाहे त्वाहाग्नाभ त्वा
कालिकां चतुर्थीहे मानवैभ्य ल्वाश्वे करी मावाहनादिभिः पूजयेतां ॥ गृहप्रवेशनीयांतेष चौक्तं त्रिरात्रा
दिकालेन व्रतं चरित्वा विवाहकाले बध्वा परिहितं वासः म कृत्या ॥ सत्येनोत्तभिता भूमि रित्यादि ऋक्वा ल्स र
र्यापाठतोऽर्थतश्च जानते ब्राह्मणाय वधो दद्यात् ॥ ततो व्रतसंपत्यर्थं यथाशक्त्या ब्राह्मणान्भोजयित्वा ति
भ वंतो ब्रुवंत्विति तानुक्त्वा ॥ ॐ स्वस्तीति तैर्वाचयेत् ॥ ॥ अथ विवाहात्षष्ठेयदिनरात्रौ तत्र भद्रादि संभवेदि

र०प्र० १२९

न एव वा शिष्टाचारप्राप्तं कर्मान्वितत्समायेवा ऐरिणयरव्य स्तुद्रपोडशावंशस्य येपुत्तमहावंशपात्रं न कार्यं॥
कन्यादात्रा॥ सर्वस्वफलतां तुल्ये दंपत्या वंशकेडुने॥ शैरिणया स्व वंशपात्रे पक्कान्नैः परिपूरितं॥ कर
कैरूद्रसंख्याकैः सुवर्णेः परिपूरितैः॥ एतावदैरिणीरूप्यं कर्तव्यं किल सूरिभिः॥ एवं संपाद्य कन्या
दाता सभार्यो देशकालौ संकीर्त्य विवाहसंपूर्णफलप्राप्तये वरस्य तत्पितृमात्रादीनां च त्म ह्यौ यायारणां
यथाविभवं वस्त्रादिभिः पूजनं महं करिष्य इति संकल्प्य॥ वरं तत्पितृमातृभ्रात्रादिभ्यः क्रमेण यथा
विभवं पट्टपट्टीडुकूलवस्त्रादि दत्वा॥ अनेन त्वष्ट्यादि संकीर्त्य मामेमाम हेश्वर प्रीति द्वारा कन्यादान
फलं संपूर्णतायै वंशाभिवृद्धये च ऐरिणीपूजनं वरमात्रे ऐरिणीदानं च करिष्ये॥ ऐरिणी त्वं सुमा देवी
मर्हेशो माहिमालापतिः॥ अतस्त्वां पूजयिष्यामि वंशवृद्ध्या मम ऐरिणी सर्वकामदां॥ सवस्त्रां च करिष्याम सदै
वाचमस्त्रैः षोडशोपचारैः पूजयित्वा केशभिर्हतां॥ वरमात्रे प्रदास्यामि कन्यादानस्य सिद्धये ऽस्तिसं

कन्या॥ महावंशपात्रेऽस्मिन् मया हेम्नः शैवो भूषणाय चारैः। पूजयित्वा वंशपात्रं वरमात्रे त्वामंत्रयन्न्येहं त॥ वंशो
वंशो वंशकरः श्रेष्ठो वंशो वंशसमुद्भवः॥ अनेन वंशदानेन तुष्टो वृद्धिं करोतु मे॥ वंशपात्रमिदं पुण्यं वं
शजातसमुद्भवं॥ वंशानामुत्तमं दानमतः शांतिं प्रयच्छ मे॥ वंशपात्राणि सर्वाणि मया संपादितानि
वै॥ उमां तोषयतां नित्यं मम गोत्राभिवृद्धये॥ वंशवृद्धिकरं दानं सौभाग्यादिसमन्वितं॥ वस्त्रेण छादि
तं पूगफलहेमसमन्वितं॥ सर्वपापक्षयकरं नानाद्रव्यैः प्रपूरितं॥ दानानामुत्तमं दानमतः शां
तिं प्रयच्छ मे इति॥ ततः कन्यावरपितृमातृमातुलसंगयोः पृथगुपवेश्य॥ प्रत्येकं कृतौ प्रार्थयेत॥
सप्तवर्षात्प्रियं कन्या पुत्रवत्पालिता मया इदानीं तव पुत्राय दत्ता स्नेहेन पाल्यतामिति वरमात्रा वधूमात्रा वधू
मात्रादितत्पत्नीस्तु वासिनीभ्यः सकंचुकवस्त्रं वंशपात्रं वायनदानादि वृद्ध्याकाररीत्य मित्याचाराच्च प्राप्तं यथाचारं देयं॥
इदमैरिणी पूजनादि वधूपितृभ्याममुक्तवद्यावत्कृत्वा भोजनं कार्यं इति नारायणभट्टकृते प्रयोगरत्ने ऐरिणीपू

जनादिचतुर्थदिनकृत्यं अथ देवकोत्थापनमंडपोद्वासनविधिः तत्रकालः समेवदिवसे कुर्याद्देवकोत्थापनं
बुधः षष्ठं च विषमं नेष्टं मुक्त्वा पंचमसप्तमौ समेषु षं विषमेषु पंचसप्तमातिरिक्तेषु दिनेनात्रे स्तु मित्यर्थः उक्तकाले
मंडपांतः सपत्नीकः स्वासने उपविश्य आचम्य प्राणानायम्य देशकालसंकीर्त्तनांते कृतस्य विवाहांगत्वेन स्थापित
देवतानामुत्थापनं मंडपोद्वासनं पुण्याहवाचनं च करिष्य इति संकल्प्य सर्वा देवताः प्रत्यहवत्संपूज्य पित्वा उति
ष्ठन्नग्रास्थते अभ्यारमिद्दृप० इति विसर्ज्य भगवत्यादीनां मंडपांतस्तैलाभ्यंगोद्वर्त्तनोक्षेस्फसामानिका
रयित्वावेष्टनसूत्रमुन्मुच्य स्वस्तिवाचनं कुर्यात् ततो द्विजैरभिषेकः कार्यः अभिषेकांते पुरोधास्तच्छाखोदिवं
प्रापात्रे निधाय तदुपरिप्रक्षिप्ताभिषेकजलं सकुटुंबयजमानशिरसि किंचित्स्रावयन् ॥ प्रतिचे तिचेत्येतद्वेसर्वं त्व
स्सपतं यस्येति चेति चेति तिनद्योस्पप्रियस्यात्रमेतेनानुमंत्रयेत । प्रतिचेति स्वस्तिवगच्छ तिस्वस्तिपुनरागच्छतीति
ब्राह्मणां पठेत् एवं त्रिः कुर्यात् ॥ ततः कर्त्ता शिरसि बद्धांजलिरस्त्रोत्रेषट्सु षट्सु मासेषु शोभनमस्त्वि

तिद्विजान्संप्रार्थयेत्॥ तेवदंत्यास्त्विति ब्रूयुः॥ ततो द्विजांश्च दत्तांबूलदक्षिणादिनाभ्यर्च्य विसृज्य तदाशिषो मंत्रोक्ता मंत्रोक्ता
गृह्णीयात् शिष्टाचारकुलाचारानुसारेण कार्यं इति देवकोत्थापनादि अथ वध्वाः प्रथमगृहप्रवेशः वधूप्रवेशः प्र
थमे तृतीये शुभप्रदः पंचकेऽथवाह्नि॥ द्वितीयके वाथ चतुर्थके वा षष्ठे वियोगाभयदुःखदः स्यात् लल्लः स्वभ
वनपुरप्रवेशे देशानां विप्लवे तथोद्वाहे॥ नववध्वा गृहगमने प्रतिशुक्रविचारणा नास्ति॥ मांडव्यः॥ नित्ययाने गृ
हे जीर्णे प्राशने तीर्थयात्रासु॥ वधूप्रवेशमांगल्ये न मौढ्यं भृगुजीवयोः॥ ज्योतिःप्रकाशः॥ वामे शुक्रे नववोढायाः सुखं
हानिश्च दक्षिणे॥ यतो धात्री वहत्सके स्थे सर्वनाशः पुरस्थिते॥ नवोढायास्तु वैधव्यं पृष्ठे शुक्रे सम्मुखे भृगौ॥ तद्देवं वि
बुधैस्त्याज्यं केवलं तु द्विरागमे॥ पर्वतेऽस्तमुदिते शुक्रे प्रयायाद् दक्षिणापरे॥ पश्चादभ्युदिते चैव यायात्पूर्वोत्तरे दिशौ
॥ तथा भाद्रपदमासमारभ्य पूर्वादि मुख्यदिक्षु प्रतिदिशं मासत्रयं क्रमात्त्याज्यं॥ चैत्रमारभ्य पूर्वादि घट्टदिक्षु
मुख्यदिशि मासद्वयं विदिक्ष्वेकमासं क्रमेण कंटकं ज्ञानीयात्॥ दूरस्थे ग्रामांतरेण ववधूगमने वर्ज्यानि

यतकालेपिकदाचिन्निषेधमाहगार्ग्यः॥ व्यतीपातेचसंक्रांतौग्रहणेवैधृतावपि॥ श्राद्धंविनाशुभंनैवप्राप्तका
लेपिमानवः॥ तथा॥ अमासंक्रांतिविष्ट्यादौप्राप्तेकालेपिनाचरेदिति॥ ॥ इहप्रियंप्रजयातेसमृध्यतामितिमंत्रेण
वधूंस्वगृहंप्रवेशयेत्॥ सवधूकोवरोगणपतिलक्ष्मीचपथ्याचारंसंपूज्यपुण्याहंवाचयित्वाविप्राशिषोगृह्णीयात्॥ विवा
हात्प्रथमेपौषेआषाढेवाधिमासके॥ भर्तृगृहेवसेत्कन्याचैत्रेतातगृहेतथा॥ ॥ इतिप्रयोगरत्नेनववधू
गृहागमनविधिः॥ ॥ अथविवाहेआशौचादिनिर्णयः विधिवत्कृतेकन्यावरणेत्रिरात्रादिव्रतसमाप्तिप
र्यंतेमध्येआशौचप्राप्तौतदपोह्यसद्यःशौचंविधीयतइतिवदिकाकारआह॥ तत्रयाज्ञवल्क्यः॥ दानेविवाहे
यज्ञेचसंग्रामेदेशविप्लवे॥ आपद्यपिचकष्टायांसद्यःशौचंविधीयतइति॥ दातुर्वरस्यकन्यायाश्चसद्यःशौ
चंविवाहउदस्तर्थः बृहस्पतिः॥ विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके॥ पूर्वसंकल्पितार्थेषुनदोषःपरिकीर्ति
तः॥ षट्त्रिंशन्मते॥ विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके॥ परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः॥ विष्णुः॥

॥अतेयत्तद्विवाहेषुश्राद्धेहोमेर्चनेजपे॥प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकं॥प्रारंभश्चतेनैवोक्तः॥प्रारंभोवरणाय
ज्ञेसंकल्पोव्रतसत्रयोः॥नांदीश्राद्धंविवाहादौश्राद्धेपाकपरिक्रियेति॥नांदीमुखावधिश्चावश्यकत्वेऽधिकउक्तः॥
एकविंशत्यहर्यज्ञेविवाहेदशवासराः॥त्रिषट्चौलोपनयनेनांदीश्राद्धंविधीयतइति॥तेनएकविंशत्याद्यहरं
तःपातित्याद्यत्नात्स्मिवतितथाआवश्येयत्नादौपूर्वंश्राद्धंकुर्यादित्यर्थः॥प्रारंभाभावेपिकन्यायाअधार्यत्वेस
न्निहितलग्नांतराभावेचहोमादिसर्वकं विष्णुरनुज्ञामाह॥अनारब्धविशुध्यर्थंकूष्मांडैर्जुहुयाद्घृतं॥गांद
द्यात्पंचगव्याशीततःशुध्यतिसूतकिइति॥उपकल्पितबहुसंभारस्यापिसन्निहितलग्नांतराभावेनसंभारधा
रणाशक्तौआशौचाभावमाहविष्णुः॥नदेवप्रतिष्ठाविवाहयोःपूर्वसंभृतयोरिति॥अथविवाहकालेकन्या
रजस्वलाचेत्तत्राहयज्ञपार्श्वः॥विवाहेवितनेतंत्रेहोमकालउपस्थिते॥कन्यामृतुमतींदृष्ट्वाकथंकुर्वंति
याज्ञिकाः॥स्नापयित्वातुतांकन्यामर्चयित्वायथाविधी॥युंजानामाहुतिंकृत्वाततःकर्मणियोजयेत्॥श्री

हुति मंत्रस्तैत्तिरीयशाखायां ॥ युंजानः प्रथमं मनस्तत्त्वाय सविता धियः ॥ अग्निर्ज्योतिर्निचाय्य पृथिव्या अध्या
भरदिति ॥ यद्वा ॥ विवाहहोमे प्रक्रांते यदि कन्या रजस्वला ॥ त्रिरात्रं दंपती स्यातां पृथक्शय्यासनाशनौ ॥ चतुर्थे
ह्नि संस्नातौ तस्मिन्नग्नौ यथाविधानि ॥ जुहुयान्नामिति शेषः ॥ ॥ इति विवाहे आशौचादि निर्णयः ॥ अथ प्र
संगात्पुनर्विवाह उच्यते ॥ कृते विवाहे यं वा गृहच्छिद्राद्यादि दोषश्चेत्स्यात्तदा ज्योतिःशास्त्रोक्तविशेषे पुनर्वि
वाहः कार्यः ॥ तदाह नृसिंहः श्रीधरीये ॥ पुनर्विवाहं वदामि दंपत्योः शुभवृद्धिदं ॥ लग्नेंदु लग्नयोर्दोषे ग्रह
तारादिसंभवे ॥ विवाहे चापि दंपत्योराशौचादिसमुद्भवे ॥ तस्य दोषस्य शांत्यर्थं पुनर्वैवाह्य मिष्यते ॥ अत
यं चोत्तरं श्रेष्ठं वर्द्धयेत्तु विशेषतः ॥ आषाढमार्गशीर्षौ च वर्ज्यौ शेषाः शुभावहाः ॥ विवाहोक्तर्क्षतिथ्यंशराशि
वारादि वर्जिताः ॥ करणायोगसंज्ञाति ग्रहगोचरयोगकाः ॥ तस्मिन्विवाहसमये शुभदाश्च तथैव हि ॥ स्व
ल्पे सर्वरात्रे च विवाहः शुभदो भवेदिति ॥ ॥ अद्वितीयादि विवाहविधिः ॥ ॥ तत्राधिवेदनीया आह

याज्ञवल्क्यः ॥ सुरापी व्याधिता धूर्त्ता वंध्यार्थघ्न्यप्रियंवदा ॥ स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥ अधिविन्ना
तु भर्त्तव्या महदेनोऽन्यथा भवेत् ॥ अधिवेत्तव्या तदुपरि स्त्र्यंतरं कर्त्तव्यमित्यर्थः ॥ आपस्तंबः ॥ धर्मप्रजासंपन्ने दारे ना
न्यां कुर्वीतेति ॥ अधिवेदने प्रतीक्षाकालमनुराह ॥ वंध्याऽष्टमेऽधिवेत्तव्या दशमे तु मृतप्रजा ॥ एकादशे स्त्रीजननी
सद्यस्त्वप्रियवादिनी ॥ रत्यर्थं तु विवाहांतरे विशेषः ॥ एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति ॥ समर्थस्तोषयित्वा
र्थैः स्वैर्वोढामपरां वहेत् ॥ याज्ञवल्क्यस्तु ॥ आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं ॥ त्यजन् दाप्यस्तृतीयांशम
द्रव्यो भरणं स्त्रियाः ॥ सधनो धनतृतीयांशमधनोऽशनाच्छादनात्मकं भरणं दाप्य इत्यर्थः ॥ या त्वेतावताऽपरि
तुष्टा गृहान्निर्गच्छेत्तां प्रत्याह मनुः ॥ अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात् ॥ सा सद्यः संनिरोद्धव्या
त्याज्या वा कुलसंनिधाविति ॥ बहुभार्यो ज्येष्ठयैव सह धर्मं सपत्नीकः सोऽग्निधर्मं कुर्यादिति हेमाद्रौ कात्याय
नः ॥ अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया ॥ कारयेत्तद्बहुत्वं चेज्ज्येष्ठया गर्हिता न चेदिति ॥ शिष्टशु

श्रुषा अतिथ्यादिरजा॥ साच पत्नीसंपाद्यधर्ममात्रोपलक्षणार्था॥ गार्हितास्य मीयोग्यत्वापादकपातित्यादिदोषव
तीनवेदित्यर्थः॥ तादृशी चेन्न तया किं त्वनेनैव विधया कनिष्ठयापि कारयेत्॥ याज्ञवल्क्यः॥ सत्यामन्यां सवर्णायां धर्म
कार्यं न कारयेत्॥ सवर्णासु विधौ धर्मे ज्येष्ठया न विनेतरा॥ अन्या मसवर्णा॥ इदं चाधाने सहाधिकृतानेकभार्याविषयं॥
अनधिकृतायाः प्रसक्त्यभाव एव॥ तत्रापि केवलक्रत्वर्थमाज्यावेक्षणादि यजमानो द्वितीयां सम्मानार्थं देकयेव स
वर्णया ज्येष्ठया कारयेत्॥ पत्नीसन्नहनादि तु कर्तृसंस्कारकं सहाधिकृताभिः सर्वाभिरित्यादि मीमांसामांसलम
नसां सुज्ञानं॥ स्मार्त्ते त्वग्निसाध्ये तु कर्मणि सर्वासां सहाधिकारः॥ प्रथमविवाहाग्नावेवापरविवाहहोमविधानात्तदस
भवे ऽग्निद्वयसंसर्गविधानाच्च॥ अत एवात्राप्युक्तः एवकर्मसु कर्तृविवेकः॥ द्वितीयादिविवाहे ऽग्निनियममाह होमाय का
त्यायनः॥ सदारोन्यान्पुनर्दारानुद्वोढुं कारणान्तरात्॥ यदिच्छेदग्निमान्कुर्वन्क्व होमोस्य विधीयते॥ स्वाग्नावेव भवे
द्धोमो लौकिके न कदाचनेति॥ अयं च नियमः संभवे॥ ग्रामान्तरादावसंभवे तु लौकिकाग्नौ कृत्वा तयोर्यथा का

लंवस्यमाणाः संसर्गविधिः कार्यः॥ अत्र द्वितीयादिविवाहे जीवत्पितृकोऽपि स्वयमेव नांदीश्राद्धं कुर्यात्॥ नांदीश्राद्धं
पिता कुर्यादाद्ये पाणिग्रहे पुनः॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदीकमिति स्मृतेः॥ तत्र पितृवर्गं विहाय मातृमातामह
वर्गयोः कुर्यात्॥ मातरि जीवंत्यां मातामहवर्गस्यैव॥ तस्मिन्नपि जीवति द्वारलोपात् वृद्धिश्राद्धलोप एव॥ सो
पि साग्निकश्चेद्येभ्यः पिता दद्यात्तेभ्यः स्वयमपि दद्यात्॥ येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निक इति वच
नात्॥ अन्ये तु असाग्निकोऽपि पितृदेवताभ्यो दद्यात् एव पिता दद्यात्तेभ्यः कुर्वीत साग्निक इति वचनात्॥
अन्ये तु असाग्निकोऽपि पितृदेवताभ्यो दद्यात् स्वयं तु इति मैत्रायणीयपरिशिष्टादिस्याकुरित्यादि स्मृत्यंतरे त्रि
स्थलीसेतौ विस्तरो ज्ञेयः॥ द्वितीयादिविवाहे कालविशेषमनुक्तः संग्रहे। प्रमादान्मृत निवासरादितः पुनरुद्वाहविधि
वरस्य च॥ विषमे यरिवत्सरे युग्मे युग्मे चापि मृतिप्रदो भवेत्॥ जीवंत्यां तु पूर्वपत्न्यां द्वितीयादिविवाहे नायं का
लनियमः॥ अथ तृतीय मानुषीविवाहस्य निषेधत्वात्तस्मिन् कर्तव्येऽर्कविवाहविधिः॥ तृतीयाम्निषेधमा

हमात्स्येकस्यपः ॥ तृतीयां मानुषीं नैव चतुर्थीं यः समुद्वहेत् ॥ पुत्रपौत्रादिसंपन्नकुटुंबी साग्निको द्वरः ॥ उद्वहेद्
इति सिध्यर्थं तृतीयां न कदाचन ॥ मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीं ॥ नश्यत्येव न संदेहो गर्गस्य वचनं यथा
अन्यत्रापि ॥ तृतीयां यदि चोद्वाहेत् तर्हि सा विधवा भवेत् ॥ संग्रहे ॥ चतुर्थादिविवाहार्थं तृतीये ऽर्कं समुद्वहेत् ॥
आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे ॥ शुभे दिने वा पूर्वाह्णे तु यो ऽर्कविवाहकं ॥ देशादिक्रमपुराणे दर्शि
तं ॥ ग्रामात्प्राच्यामुदीच्यां वा सुपुष्पफलसंयुतं ॥ परीक्ष्य यत्नतो ऽधस्तात्स्थंडिलास्थिय्याविधि ॥ न्यासः ॥ स्ना
त्वालंकृतवासास्त्ररक्तगंधादिभूषितं ॥ सपुष्पफलशाखैकमर्कगुल्मं समाश्रयेत् ॥ सह्यद्वहरो न संयुक्त
मर्कं संस्थाप्य यत्नतः ॥ अर्ककन्याप्रदानार्थं मावार्थं कल्पयेत्सुरा ॥ अर्कसंनिधिमागत्य तत्र स्वस्त्या
दि वाचयेत् ॥ नांदीश्राद्धं हिरण्येन अष्टवर्गान्प्रपूजयेत् ॥ पूजयेन्मधुपर्केण वरं विप्रस्य हस्ततः ॥ य
ज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणं ॥ तुलसीगंधमाल्यादि वरायास्मै प्रसपयेत् ॥ स्वशाखोक्तप्रकारेण

मधुपर्कं समाचरेत्॥ब्रह्मपुराणे॥यथाविधीत्यस्यानंतरं॥कृत्वाऽर्कं पुरतस्तिष्ठन्प्रार्थयेत्तद्द्विजोत्तमः॥
त्रिलोकवासिन्साप्त छायया सहितो रवे॥तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥तत्राध्यारोप्य देवेशं छा
यया सहितो रवे॥तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥तत्राध्यारोप्य देवेशं छाया सहितं रविं॥वस्त्रै
र्माल्यैस्तथा गंधैस्तन्मंत्रेणैव पूजयेत्॥तन्मंत्रेणाऽकृष्णेनेत्यादिना॥अन्यत्रापि॥श्वेतवस्त्रेण सं
वेष्ट्य तथा कार्पासतंतुभिः॥गंधपुष्पैः समभ्यर्च्य प्य[illegible] क्लिन्नैरभक्षितैश्च॥गुडौदनं तु नैवेद्यं तांबूलं
च समर्पयेत्॥आसनं॥अर्कं प्रदक्षिणीकृत्य वै जन्ये मंत्रमिमं बुधः॥ मम प्रीतिकरा येयं मया सृष्टा पुरातनी॥अर्के
जा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु॥पुनः प्रदक्षिणीकृत्य मंत्रेणानेन मंत्रवित्॥नमस्ते मंत्रवित्॥नमस्ते
मंगले देवि नमः सवितुरात्मजे॥त्राहि मां कृपया देवि पत्नी त्वं मे इहागता॥अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहि
ताय च॥वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः॥तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय॥ततश्चक

न्यावरणां त्रिपुरुषं कुलमुच्चरेत् ॥ आदित्यः सविता वार्यः पुत्री पौत्री च नप्त्रिका । गोत्रं काश्यप इत्युक्तं लोके लौ-
कमाचरेत् ॥ मुहूर्ते कर्मिरी ह्नोत स्वस्तिसूक्तमुदीरयेत् ॥ आशीर्भिः सहितैः कुर्यात्सवार्यप्रमुखैर्द्विजैः ॥ अथाचार्यः समाहयवि-
धिनातन्मुखा च्चतां ॥ प्रतिगृह्य ततो होमं गृह्योक्तविधिनाचरेत् ॥ आचार्यस्य दानमंत्रमाह व्यासः ॥ अर्ककन्यामिमां विप्र य-
यथाशक्ति विभूषितां ॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रयेति ॥ अंजल्यं दानकर्माणि कृत्वा कंकणाद्यर्वकं ॥ यावत्संग्राह्य ते
सूत्रं तावद्दर्भं प्रवेष्टयेत् ॥ स्वशाखोक्तेन मंत्रेण गायत्र्या वाथवा जपेत् ॥ पंचीकृत्य पुनः सूत्रं स्कंधे बध्नाति मंत्रतः ॥ बृहत्साम-
ति मंत्रेण सूत्रं रक्षां प्रकल्पयेत् ॥ अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरयोस्तथा ॥ कुंभांश्च निक्षिपेत्पश्चाद्वस्त्रेणापि चलुष्टये ॥ स-
वस्त्रं प्रति कुंभं च त्रिः सूत्रेणैव वेष्टयेत् ॥ हरिद्रागंधसंयुक्तं प्रत्येकं च जलं जलं ॥ प्रतिकुंभं महाविष्णुं संपूज्य परमेश्वरं ॥
याचार्यादि निवेद्याथ कुर्यान्नाम्नैव मंत्रवित् ॥ अत्र होमप्रकारः शौनकेन दर्शितः ॥ तृतीये स्त्रीविवाहे तु संप्राप्ते
पुरुषस्य तु ॥ अर्कविवाहं वक्ष्यामि शौनकोहं विधानतः ॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादिवाचयेत् ॥ नांदीश्रा-

प्र·रत्नः
१३६

ठं प्रकुर्वीत स्थंडिले च प्रकल्पयेत्॥ अर्कमर्च्चेत्सो पोचगंधपुष्पाक्षतादिभिः॥ सौर्यासूक्ते देवस्य यास्त्रामु
क्तेनेत्यादि ऋचा॥ स्वयं चालंकृतस्तत्र धूपमाल्यादिभिः शुभैः॥ अर्कस्तोत्रं ददेशैतु समन्वाद्यरत्नं एतयो॥
उद्धृत्य वनादिकं कुर्यात् स्वाधांतमनः परं॥ आत्मा ऋतिवजुह्याज्जुह्यात्तं गोभिरन्नेषु कया॥ यस्मत्वा कामम का
मायेस्तेन यद्यनंतः परं॥ व्यस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत्॥ परिषेचनपर्यंतमयास्त्रे स्तादि
कं कमात्॥ प्रार्थनामंत्रादि विशेषमाद्व्यासः॥ पुनः प्रदक्षिणां कृत्वा मंत्रमेतमुदीरयेत्॥ उत्तुस्का शांति
सूक्ता निजस्थानं विसर्जयेत्पुनः॥ गोयुग्मं दक्षिणां दद्यादाचार्याय च भक्तितः॥ इतरेभ्योपि विप्रेभ्यो दक्षि
णां चापि शक्तितः॥ तत्स्वगुरवे दद्याद्देवं सपुराणपाठ वाचयेत्॥ अथ पंचमदिने कृत्यमुक्तं ब्रह्मपुराणे॥ च
तुर्थे दिवसेऽतीते सर्ववत्तांबृहज्जपं च॥ विसर्ज्य होममप्येवं च विधिना मानुषीप रो॥ उद्धेदेत्तथा नैव
पुत्रपौत्रादि वृद्धिमान्॥ न पश्यन्न च मित्राणि मंगलं नैवाप्नुयात्॥ एवमेतद्द्विजश्रेष्ठ विधिनासम्यगुद्वहे

रा.प्र.०
१३६

त्॥ धनधान्यसमृद्धिश्च इष्टापत्तिः पात्रेचेति॥ ॥ अत्रैवं संक्षेपतः प्रयोगः॥ ॥ उक्ते आदित्यादिवारादौ उ
क्ते देशे यथा अर्कसमीपं गत्वा च स्वप्राणानायम्य देशकालौ संकीर्त्य मम तृतीयमानुषीविवाहजदोषाभावार्थं
कर्म विवाहं करिष्ये इति संकल्प्य आचार्यवरणस्वस्तिवाचनाद्युक्तक्रमेण कुर्यात्॥ अत्र होमे विशेषः॥ देश
कालादि संकीर्त्यार्कविवाहांगभूतं होमं करिष्ये तदंगतया अन्वाधानं करिष्ये अस्मिन्नन्वाहिते अग्नाविध्मा
द्याघारांतमुक्त्वा प्रधानं बृहस्पतिमग्निमग्निवायुसूर्यं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्याद्यन्वाधा
नाद्याघारांतमुक्त्वा॥ संगोभिरित्यस्यांगिरसो बृहस्पतिस्त्रिष्टुप्॥ अर्कविवाहांगभूताज्याहुतिहोमे वि॰ ॐ संगोभि
रांगिरसः वाजो स्वाहा॥ बृहस्पतय इदं न॥ यस्मै त्वा कामेत्यस्य वामदेवोग्निस्त्रिष्टुप्॥ अर्कविवाहांगभूता
ज्याहुतिहोमे वि॰ ॐ यस्मै त्वा काम कामाय वयं सम्राडजामहे। तमस्मभ्यं कामं दत्वाथैतत्त्वं घृतं पिब स्वा
हा॥ अग्नय इदं न॥ ततो व्यस्तसमस्तव्याहृतिभिर्हुत्वा होमशेषं समापयेत्॥ ततः प्रदक्षिणा प्रार्थना स्विक

प्र०रत्न:
१३७

र्मशेषं समापन॥ ॥इति प्रयोगरत्ने अर्कविवाहः॥ ॥अथाग्निद्वयसंसर्गविधिः यदि सर्वप्रस्थायाश्चैव द्वितीया
दि विवाहहोमः कृतस्तेनैवाग्निना द्वितीयादिपत्नीगृह्यस्वकर्मसु सहाधिकारिणी॥ यदि दैवादन्याग्नौ द्वितीयादि
विवाहहोमः कृतस्तदा द्वितीयविवाहनिमित्तकत्रिरात्राद्यूर्ध्वं तयोरग्निद्वयसंसर्गः कार्यः॥ ॥तत्र विधिमाह शौन
कः॥ अरोगामुद्वहेत्कन्यां धर्मलोपभयाथाग्न्योर्गृह्ययोर्योगः सपत्नीभेदजातयोः॥ सहाधिकारसिध्यर्थमहं
वक्ष्यामि शौनकः॥ अरोगामुद्वहेत्कन्यां धर्मलोपभयात्स्वयं॥ कृते तत्र विवाहे च व्रतान्ते तु परेहनि॥ पृथक्स्थ
ण्डिलयोरग्नी समाधाय यथाविधि॥ तंत्रं कृत्वाज्यभागान्तमन्वाधानादिकं ततः॥ जुहुयात्पूर्वपत्न्यग्नौ तयान्वा
रब्धश्चाहुतीः॥ अग्निमीळे पुरोहितं सूक्तेन त्वृचे नतु॥ तस्मिन्नेव समारोप्याऽयं ते योनिरित्यृचा॥ प्रत्यव
रोहेत्यनया कनिष्ठाग्नौ निधापयेत्॥ आज्यभागान्ततंत्रादि कृत्वाऽन्यत्राहितः॥ समन्वारब्धपत्नाभ्यां पत्नी
भ्योऽजुहुयाद्धुतं॥ चतुर्गृहीतमेताभिर्ऋग्भिः षड्भिर्यथाक्रमं॥ अग्नावग्निश्चरतीत्यग्निनाग्निः समिध्यते॥ अ

राम०
१३७

स्तीर्णमिति तिसृभिः पाहि नो अग्न एकया ॥ ततः स्विष्टकृदादि होमशेषं समापयेत् ॥ गोयुग्मं दक्षिणां देयाच्छ्रो
त्रियायाहिताग्नये ॥ पत्न्यपेक्षायस्मिन्ताग्न्याहितेनैव तं पुनः ॥ आदध्यात्तान्यया सार्द्धमाधानविधिनागृहीति
अथ मन्त्रप्रयोगः ॥ ॥ द्वितीयादिविवाहव्रतो तेष्व भद्दिने प्राणानायम्य देशकालौ स्मृत्वा मम विवाहद्वयेन जात
योर्गृह्यस्वाग्न्योः संसर्गमहं करिष्य इति संकल्प्योद्धृत्य संस्थितयोर्द्वयोः स्थण्डिलयोरुपलेपनादि पूर्वं कंकमेलागत्या
यीप्रतिष्ठाप्य प्रथमाग्नावन्वाधास्यान् ॥ तत्क्रमः ॥ अस्मिन्नग्निद्वयसंसर्गकर्मण्यन्वाधानं करिष्ये अस्मि
न्नन्वाहिते प्राविस्यादाज्यभागांतमुक्त्वा प्रधानदेवतान्वमिराज्याहुतिभिर्यक्ष्ये ॥ शेषेणास्विष्टकृतमित्या
ज्यभागांतमुक्त्वा यथा पत्न्या समन्वारब्धो नवाज्याहुतीर्जुहुयात् ॥ अग्निमीले पुरोहितमिति नवानां मधुच्छन्दा अ
ग्निर्गायत्री ॥ अग्निद्वयसंसर्गप्रधानाज्यहोमे वि० ॥ ॐ अग्निमीले पुरोहितमिति नवभिः स्वाहान्ताभि
र्नवाहुतीर्हुत्वा प्रसाकृतिरग्नय इदं न ममेति त्यक्त्वा स्विष्टकृदादि होमसमुपस्थानांतं समाप्य ॥ अयं ते योनिरिति च

तस्यमिर्वेपस्थायतम्रग्निमयंतेयोनिरितिसमिधिसमारोप्यकनिष्ठाग्नेप्रत्यवरोहेतिमंप्रत्यवरोत्स्वोऽन्वाधानेप्र
वींवदस्यमागांतमुत्त्वाऽत्रप्रधानंवद्द्वारमग्निंचतुर्गृहीताज्येनशेषेतोस्विष्टकृतमित्याधाज्यभागांतंकृत्वा
॥ततःस्वस्तिकवेणाचतुर्थीरप्रभृतमाज्यंगृहीत्वायत्नीभ्यामन्वारब्धस्तेनाज्येनावयवशःषडाकृतीर्जुहुयान्म
त्रैः॥तेच॥अग्नावग्निश्चरतिप्रविष्ठऋषीणांपुत्रोअधिराजएषः॥तस्मैजुहोमिहविषाघृतेनमादेवा
नांमोमुहद्भागधेयेमाअस्माकंमोमुहद्भागधेयस्वाहा॥अग्नयइदं०अग्निनाग्निरंगिरसोविहृपो
ग्निरगीयत्री॥अग्निद्वयसंसर्गप्रधानाज्यहोमेवि०॥ॐअग्निनाग्निःसमिध्यते०जुह्वास्यःस्वाहा॥अ
ग्नयइदंनममेतिसर्वत्रत्यागः॥अस्तीदमधिमंथनमितितिस्त्रृणांविश्वामित्रोग्निरनुष्टुप्छंदस्त्वेदेत्रि
ष्टुभो॥अग्निद्वयसंसर्गप्रधानाज्यहोमेवि०ॐअस्तीदमधिमंथनं०पूर्वथास्वाहा॥ॐअरण्योर्नि
हितो०रग्निःस्वाहा॥ॐउत्तानाया०जनिष्ठस्वाहा॥पाहिनोअग्नएकयेतिप्रगाथोग्निर्बृहती॥विवि

योगः प्राग्वत्॥ ॐ पाहि नो अग्न एकया० वसो स्वाहा॥ गृह्यपरिशिष्टे सुवेणौ वाष्टाव आज्याहुतयः॥ तास्त्वा
अग्निनाग्निः समिध्यते इ सूक्तैकः १ त्वं ह्यग्ने अग्निना इत्यस्य आंगिरसो विरूप ऋषिः गायत्री॥ विनियोगः प्रा
ग्वत्॥ ॐ त्वं ह्यग्ने अग्निना० समिध्यसे स्वाहा॥ अग्नय इदं न ममेति सर्वत्र त्यागः। २ अस्तीदीमिति
त्व उक्तैः॥ पाहि नो अग्न इति तृचस्य प्रगाथो भर्गोऽग्निर्बृहती त्र्यंत्वे सतो बृहत्यौ॥ ॐ पाहि नो अग्न एक० व
सो स्वाहा॥ अग्नयः ॐ पाहि विश्वस्माद्रक्षसो० वृधे स्वाहा॥ अग्नय०॥ ॐ आ नो अग्ने वयोवृधं० रय
यशस्तरं स्वाहा॥ अग्नय इदं॥ एवं हुत्वा स्विष्टकृदादिहो अग्नय पू०॥ अमृतोपसमाप्याय तनेऽग्निं नि
धाय आपूर्वं परिचरेत्॥ ॥ इति प्रयोगरत्नेऽग्निद्वयसंसर्गप्रयोगः॥ ॥ अथोपासनाग्नेः संयमान हो
मोऽभिधीयते॥ ॥ तत्र विवाहहोमोत्तरकालीने सायंकाले मूद्राप्रतापाना। स्मिंभवे पिह्नतेवागृहे
प्रवेशनीयहोमे प्रारंभणीयः॥ यद्यह्नि विवाहहोमस्तदोत्तरे सायंकाले होमारंभः॥ रात्रौ विवाहहो

मेउत्तरेघः सायंहोमारंभः॥ तत्रकर्त्तारः॥ स्वयंस्वस्यासंभवेपत्न्यास्यः भगवान्॥ पत्नीकुमारीपुत्रोवाशिष्योवापि
यथाक्रमं॥ पूर्वपूर्वस्याभावेविद्ध्यादुत्तरोत्तरः॥ स्त्विक्पुत्रोगुरोभ्रीताभगिनेयोथविट्पतिः॥ एतैरेवहुतं
यत्तुतद्धुतंस्वयमेवतु॥ विट्पतिर्जामाता॥ एतश्चयज्ञमामानुज्ञयावाहोतव्यं॥ पर्वणितुसायंहोमः स्वयमेवका
र्योनान्येन॥ अन्येनहोमोदंपत्योः सन्निधानेऽन्यतरसन्निधानेवाकार्यः॥ उभयोरसमक्षंतुहवनमहुतमेवच॥
अथाग्निप्रादुष्करणकालः॥ ॥प्रादुष्करणमग्नेः प्रज्वलनं॥ कात्यायनः॥ सूर्येतुशैलमप्राप्ते षट्त्रिंशाङ्गि
गुलैः॥ प्रादुष्करणमग्नीनांप्रातर्भास्वतदर्शने॥ एतत्प्रादुष्करणकालात्ययेसमस्तमारुतिमिरेकोज्याहुतिःका
र्याः॥ अथहोमकालः॥ आश्वलायनः॥ समयाद्विप्लोषवतिरवौसायंजुहुयुःसदा॥ अथप्रातर्हुतेनित्यमुदिते
नित्यमुदितेकैर्यथाविधिः॥ कात्यायनोपि॥ यावत्सम्यङ्नभाव्यंतेनभस्यृक्षाणिसर्वतः॥ लौहितंतत्विजाण
त्वंचनापैतितावत्सायंतुहूयते॥ मनुः॥ रेखामात्रस्तुदृश्येतरश्मिभिस्तुसमन्वितः॥ उदितंतंविजानीयात्र

त्रहोमं प्रकल्पयेत्॥ अनुकल्पकालमाहस्तत्र कारः॥ प्रदोषांतो होमकालः संगवांतः प्रातस्तमतिनीयव
नुर्गृहीतमाज्यं जुहुयात्॥ अस्तोत्तरं त्रिमुहूर्त्तं उदयोत्तरं च त्रिमुहूर्त्तं क्रमेण सायंप्रातश्च होमकाल इति प्र
लितोर्थः॥ अत्र मुख्यकालातिक्रमे समस्तव्याहृतिभिरेकाज्याहुतिः॥ प्रायश्चित्ते विशेषेणायत्र नोक्तो भवे
द्विधिः॥ होतव्याज्याहुतिस्तत्र भूर्भुवः स्वरितीति चेति कारिकोक्तेः॥ गौणकालातिक्रमे तु मनोज्योतिर्मंत्रे
णा चतुर्गृहीताज्याहुतिरेकेति प्रायश्चित्तविवेकः॥ ॥ अथ होमद्रव्याणि॥ ॥ गृह्यपरिशिष्टे॥ पया
दधिपयवागुश्च सर्पिरोदनतंडुलाः॥ सोमस्तैलमापो व्रीहयो यवास्तिला इति होम्यानि तंडुलानि वारथपा
माकयावनालानां॥ व्रीहिश्यामालिपवगोधूमप्रियंगवः स्वरूपेणापि होम्यास्तिलाः स्वरूपेणैव॥ शत
चतुःषष्टिव्रीह इति व्रीहितुलानां नारद्धेस्तुलानां तद्द्धं सर्पिस्तैलयोः सैलं च तिजलिंलाउनसीकुसु
मानो॥ येन प्रपंचयां देवतां जुहुयात्तेनैव द्वितीयां जुहुयात् येन च सायं जुहुयात्तेनैव प्रातरिति॥

अत्र तेनैव प्रातरातिप्रतिनिधिवर्ज्यं॥ बृहस्पतिस्त्वाकृतिपरिमाणमाह॥ प्रस्थधान्यचतुःषष्ट्या कृतेः परिकीर्तितं॥ तिलानां च तदर्धं तु तंदुला व्रीहि[illegible]:समाः॥ प्रस्थमाह॥ प्रसृतिद्वितयं मानं प्रस्थं मानं चतुष्पमिति॥ बौधा[illegible]पनस्तु व्रीहिराणां वा यवानां वा शतमाहुतिरिष्यते॥ अगस्त्यः॥ द्रव्यस्य मानं स्यात्शागोकर्णादीर्घिका॥ सिद्धांतशेखरे॥ अंगुल्या स समं प्रोक्तं लौनामुष्टिमिताः॥ होमप्रकारस्तु संग्रहे॥ द्रवं हविस्तु चैतो वपाशिना कठिनं हविः॥ अंगुष्ठ्यैव होतव्यं न कृत्वांगुलिभेदनं॥ अंगुष्ठ्युत्तरपार्श्वेन होतव्यमिति तु स्मृतिः॥ नित्यहोमे पूर्वमुपरि च समिधमन्याधादधीत॥ तत्त्वेत्तूरा च स्मृत्यर्थसारे॥ पालाशत्वदिरा श्वत्थशम्युदुंबरजाः समित॥ अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः॥ सत्वचः समिधः कार्या ऋजुः श्लक्ष्णाः समास्तथा॥ शस्ता दशांगुलास्तास्तु द्वादशांगुलिकास्तथा॥ आर्द्राः पक्काः समच्छेदास्तर्जन्यंगुलिवर्तुलाः॥ अपाटिताश्चाद्विशाखाः कृमिदोषविवर्जिताः॥ ईदृशा हो

मयेत्माहः प्राप्नोति विपुलां श्रियं ॥ अयं च होम आयतने स्थंडिले वाऽग्निं प्रतिष्ठाप्य तत्र कार्यः ॥ कुंडे वा स्थंडि
ले वापि स्रुक्तैः ॥ आयतनं चोक्तं संग्रहे ॥ अरत्निमात्रमप्यर्थ कार्यमायतनं बुधैः ॥ यष्टीलमात्रमित्येके तद्वयं
सांतरं भवेत् ॥ स्थंडिलस्य लक्षणं त्वग्निमुखप्रकरणे उक्तं ॥ ॥ अथोपासनप्रयोगः ॥ ॥ शुद्धे देशे चतुर्विं
शत्यंगुलप्रमाणं सार्द्धद्वाविंशत्यंगुलप्रमाणं षोडशांगुलप्रमाणं वा चतुरस्रं प्रत्येकं चतुरंगुलोत्सेधमेख
लात्रययुक्तमायतनं कृत्वा स्थंडिलं वा निर्माय गोमयेन गोमयेनोपलिप्योल्लिख्य तत्र यथालाभं सिकता
पसपत्र्यादिसंभारान्निक्षिप्य तत्र गृह्याग्निं पूर्ववत्प्रतिष्ठाप्य विवाहोत्तरं संध्याकालादारभ्योपासनं कुर्यात् ॥
तत्रैवं ॥ यजमानः कृतसंध्यावंदनः एवं प्रादुष्कृतस्याग्नेः पश्चिमतः उपविश्य प्राणानायम्य देशकालौ निर्दिश्य
ऽग्निरूपपरमेश्वरप्रीत्यर्थं सोपासने करिष्य इति संकल्प्याग्नौ चत्वारि शृंगेति मंत्रेणायतनपुरुषस्य मस्तिध्या
त्वा सादकेन पाणिना समंतात् दक्षिणं पुनरुदकमादाय त्रिः परिमृज्य एवं वत्सरित्रीर्यत्रिः पर्युक्ष्य प्रा

प्र०रत्न
१४१

शुक्ले वा दशद्रव्येषु मध्ये प्रक्षालितानार्द्रसिततंडुलप्रसृतिमात्रं मध्येऽस्तरतो निधाय स्थलतादर्भेशरावद्वा
च्य प्रोक्षते नैव त्रिः पर्यग्निकृत्वा तंडुलमुकं निरस्यापस्पृश्याऽग्नेः पश्चिमतस्त्रास्तीर्णकुशेषु संनिधाय स
हहविर्निधाय विश्वानि न इति सूक्तस्यात्रेयो वसुश्रुतोग्निस्त्रिष्टुप् आज्यचर्वे विनियोगः॥ ॐ विश्वानि नो दुर्ग
हा जातवेदः पारयिन् शतेस्वस्ति॥ इति पूर्वाभ्यामरण्यां प्रतिपादेम प्रस्तुदिक्षु सुगंधादिनाग्निमभ्यर्च्योत्त
तीयया बद्धांजलिर्नमस्कृत्य दक्षिणांजान्वाच्य समिधत्स्लीमंत्रेण प्रक्षिप्याऽपउपस्पृश्य समिधिमदीता
यां विधमस्त्वालांगारेग्नौ शतसंख्यान्ससुच्छ्यचतुःषष्टीतम भागमितान्वा तंडुलान्दक्षिणहस्तेनादाय
सव्यपाणिं हृदि निधायांगुष्ठतर्जन्यावर्जसमिन्मलते अंगुलमर्द्देशे॥ ॐ अग्नये स्वाहेति हुत्वा अग्नय
इदं न ममेति त्यक्त्वा॥ तस्याऐशाने देशे पूर्वाहुते भस्मनि सीमाहुतिं प्रजापतये चतुर्थ्यं तं मनसा ध्यायन्स्वा
हेत्युच्चार्यासंस्पृश्य हुत्वा प्रजापतय इदं न ममेति त्यक्त्वा पर्वं वदुपविश्य परिस्तरणं विसृज्यापरिसमू

रा०म०
१४१

हनपर्युक्षणं कृत्वोपस्थानं कुर्यात्॥ तत्रेमे मंत्राः॥ अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः॥ अग्नी
ः पवमानो देवता गायत्री छंदः॥ अग्न्युपस्थाने वि०॥ ॐ अग्न आयूंषि० ऋ० ३ अग्ने त्वं न इति चतसृ
णां गौपायना लौपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्च क्रमेण ऋषयः॥ अग्निर्देवता द्विपदा विरा
ट् छंदः॥ अग्न्युपस्थाने वि०॥ ॐ अग्ने त्वं नो अंतमः० सदिवम्यः॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्
॥ प्रजापत्युपस्थाने वि०॥ ॐ प्रजापते० ऋ० १ तंतुं तन्वन् वामदेवो अग्निर्जगती॥ अग्न्युपस्थाने वि०॥ ॐ
तंतुं तन्वन्तु० ऋ० १ ऋ० १ हिरण्यगर्भ इत्यस्य हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजापत्युपस्थाने वि०॥ ॐ
॥ ॐ हिरण्यगर्भः समवर्तताग्रे० ऋ० १ एतैर्मंत्रैर्वा यथादेशं प्रह्वः कृतांजलिरग्निमीक्षमाण उपस्था
य एनं रूपविश्वरूप नाग्निरिक्ताञ्छि द्रव्यं विस्मृत्य स्मरणं कृत्वा ऽनेन होमेन भगवान् श्रीपरमेश्वरः प्री
यतामिति स्तुत्वा ऽग्निं संभारयेत्॥ ॥ एवं प्रातरुदयात्पूर्वं प्रादुष्करणं कृत्वा होमकाले पूर्ववत्सर्वं

प्र०रत्न
१४२

गाग्निंकृत्वा॥ॐसूर्यायस्वाहेतिसायंद्रव्येणैवप्रथमाहुतिंहुत्वा॥सायंकालवद्द्वितीयाहुतिवत्द्वितीया
हुतिंहुत्वापरिसमूहनादिकंकृत्वोपस्थानंकुर्यात्तत्रमंत्राः॥सूर्योनोदिवस्पात्वित्यस्यसौर्यश्चक्षुःसू
र्योगायत्री॥सूर्योपस्थानेवि०॥ॐसूर्योनोदिवस्पात्०ऋक्१उदुत्यंकाण्वःप्रस्कण्वःसूर्योगायत्री
॥सूर्योपस्थानेवि०॥ॐउदुत्यं०ऋक्१चित्रंदेवानामांगिरसःकुत्सःसूर्यस्त्रिष्टुप्॥सूर्योपस्थानेवि
०॥ॐचित्रंदेवानामुदगादनीकं०ऋक्१एभिश्चतुर्भिर्ऋग्भिः॥प्रजापते[illegible]नमोमित्रस्यसौर्योभितपाःसू
र्योजगती॥सूर्योपस्थानेवि०॥ॐनमोमित्रस्यवरुणस्य०ऋक्१एतैश्चतुर्भिर्ऋग्भिः॥प्रजापतेहिरण्य
गर्भःप्रजापतिस्त्रिष्टुप्॥प्रजापत्युपस्थानेवि०॥ॐप्रजापते०ऋक्१हिरण्यगर्भःसमवर्तताग्रे०ऋ
क्१एतैर्मंत्रैरुपस्थायोंचमेस्वरश्चमइतिप्रातर्होमेविशेषः॥ ॥इतिप्रयोगरत्नेसायंप्रातर्होमवि
धिः॥ ॥अथाशौचेहोमविधिः॥ ॥जननमरणाशौचयोःऋत्विगादिनासायंप्रातर्होमोकारयेत्

रत्न०
१४२

ता॥ त्वियं चेद्व्यत्यागकं कुर्यात्॥ क्वचिद्विगाघन्याभावे तु आशौचपातात्पूर्वं होमांते वक्ष्यमाणप्रकारेण॥
ऽग्निसमारोपणं कृत्वा सूतकनिवृत्तौ स्नात्वा कृतनित्यक्रियोऽग्निं प्रतिष्ठाप्य प्राणानायम्य देशकालौ
संकीर्त्य ममनित्यहोमातिक्रमजन्यदोषपरिहारार्थं प्रायश्चित्तपूर्वं अतिक्रांतहोमान् करिष्य इति संक
ल्प्य परिसमूहनादि कृत्वा अग्नेः पश्चिमतः सपवित्रे पवित्रे पात्रे आज्यमासिच्यांगारानायतनादु
त्तरतो बहिष्कृत्य तेष्वाज्यपात्रं निधाय तत्रैणानावज्वल्य दर्भाग्रद्वयं क्षिप्त्वा तेनैव त्रिः पर्यग्निकृत्वोदगु
कं निरस्य कर्षन्निवोदगुद्वास्यांगारान् प्रत्यावृत्तिस्तस्य सवितुष्ट्वेति मंत्रेण सकृदुत्पूय तूष्णीमेवं त्रिरुत्पू
यपवित्रे प्रोक्ष्याग्नौ प्रहृत्याज्यं पश्चिमतो दर्भेषु आसाद्य स्रुवं स्रुचं च संमार्जनं कृत्वाऽज्यस्कवेणाज्यं वि
चतुर्गृहीत्वा ॐ मनो ज्योतिर्जुषतामाज्यं विछिन्नं यज्ञं समिमं दधातु॥ या इष्टा उषसो याश्च निष्ठा
स्ताः संतनोमि हविषा घृतेन स्वाहा॥ मनसे ज्योतिष इदं न मम इति त्यक्त्वा॥ नित्यहोमार्थं पूर्ववत्तंडु

प्र०र०ल० १४३

लान्संस्कृत्य नित्यहोमवत्परिसमूहनादि समिल्लक्षेपणांतं तंत्रपूर्वकं अतीतकालाहारभ्यक्रमेणाद्वे द्वे आ
हुती हुत्वा तत्कालहोमं च कृत्वाऽग्निसूर्यप्रजापतिभ्यो उपस्थाय परिसमूहनाद्यंगजातं संस्कुर्यात् ॥
॥ ॥इत्याशौचे होमविधिः॥ ॥अथायत्कालैककर्तव्यो होमद्वयसमासप्रयोगः॥ ॥पूर्वेत्सायंकाली
नाहुतिद्वयं हुत्वा पर्युक्षणादिकं कृत्वा वा किंचित्कालेनिमील्यानिमील्य वा पुनः पर्युक्षणादिसमि[illegible]यं इ
[illegible]दावेत्यक्षेपणांते कृत्वाऽश्वः कर्तव्य प्रातराहुतिद्वयमपकृष्य हुत्वोपस्थानं कुर्यात् ॥एकैव चेत्समित्सा
यंहोमादावेव॥उपस्थाने मंत्राः॥हविष्यांतमिति पंचर्चस्य वर्गस्य मूर्द्धन्वा वामदेव्यः सूर्यवैश्वानरौ त्रि
ष्टुप्॥उपस्थाने वि०॥ॐ हविष्यांतमजरं स्वर्विदि० ऋक् ५ एभिर्मंत्रैः प्राजापत्येश्चोपस्थाय पर्युक्ष
णाद्यंगजातं संस्कुर्यात्॥ ॥अथगुर्वादिपक्षहोमः॥ ॥तत्र प्रतिपदि सायंकाले समित्क्षेपणां
ते पूर्वांगजातं कृत्वाऽऽहुतिममारोन तंडुलान्पात्रद्वये प्रतिपात्रे चतुर्दशवारं गृहीत्वा होमकाले प्र

राम० १४३

यमपात्रस्थानग्नये स्वाहेति सर्वान्जुहुयात् ॥ ततः प्राजापत्यर्थं गृहीतान्प्रजापतिशब्दं चतुर्थ्यंतं मनसाध्या
य स्वाहेति हुत्वोपस्थानाद्यंगजातं सकृत्कुर्यात् ॥ एवं द्वितीयायां प्रातः समित्प्रक्षेपणादि पूर्ववत्कृत्वा
सूर्याय स्वाहेति एवं वहुत्वा ॥ सायंकालीनोत्तराहुतिवत् द्वियाहुतिं च हुत्वोपस्थानाद्यंगजातं सकृत्कु
र्यात् ॥ यद्येकमध्ये वाऽयत्ता वागामि चतुर्दशी सायंकालीनहोमातान् शेषहोमान्सायं समस्येत् ॥
पर्वप्रातर्होमांतांश्च प्रातः शेषहोमान्समस्येत् ॥ सर्वेष्वापर्वसायंहोमः प्रतिपत्प्रातर्होमश्च पर्यगेव हो
तव्यो ॥ तत्र एवं वदग्निमभिरक्षेत् ॥ अंतरा पत्निवृत्तौ तु तदारभ्य पूर्ववत्सायंप्रातर्होमान्यथाकालं कु
र्यात् ॥ ॥ अथ समार्यस्य प्रवासप्रसक्तेऽग्निसमारोपविधिः ॥ कालहोमानंतरं ॥ अयं ते योनिर्ऋत्वि
य इत्यस्य गाथीपुत्रो विश्वामित्रोऽग्निरनुष्टुप् ॥ अग्निसमारोपणे वि० ॥ ॐ अयं ते योनिर्ऋत्वियः० वर्द्ध
या गिरः इत्यनेनाऽरणी द्वयेऽग्निं समारोपयेत् ॥ अथवाऽनेनैवात्मन्यसमिधि समारोपयेत् ॥ यदा ॥

प्र० रत्न०
१४४

ॐ याते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानं ॥ अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि ॥ यज्ञो भूत्वा यज्ञमा
सीद स्वां योनिं जातवेदो भुव आजायमानः इति मंत्रेण पाणी प्रताप्यात्मनि समारोपयेत् ॥ तत्र प्रादुष्करणका
ले अरणी समारोपये अरणी निर्मथ्य ॥ प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् ॥ प्रजां पु
ष्टिं रयिमस्मासु धेह्यथा भव यजमानाय शं योरित्यनेन स्थंडिले प्रतिष्ठाप्य प्रत्यवरोहेति स्थापयेत् ॥ अ
थ मंत्रेणाग्निं समिधं निदध्यात् ॥ आत्मसमारोपपक्षे सर्वदा स्पृश्यस्पर्शनं जले निमज्जनं स्नानं स्त्रीगम
नं चाह्नवनं मूत्रपुरीषोत्सर्गे शौचमकृत्वा चिरकालमतिष्ठन् होमकाले आत्मसमारूढमाग्नि
मुच्छ्वासरूपेण प्रत्यवरोहेति मंत्रेण लौकिकाग्नौ निदध्यात् ॥ एवं यथाधिकारमग्निं प्रतिष्ठाप्य काद
द्वयेऽकाले वाप्येवं कुर्यात् ॥ इदं समारोपणं द्वादशरात्रपर्यंतमेव कुर्यात् ॥ ॥ अत्र पुरुषस्यैव
प्रवासकाले कर्तव्यं ॥ ॥ प्रवासस्य साग्निकेन द्रव्यार्जनादिदृष्टकार्यार्थमेव केवलेन पुरुषेण का

राम०
१४४

ये:ऽज्ञानतुत्तीर्थयात्राप्रदृष्टार्थकार्मीर्थे॥ तत्र होमांते पूर्वोक्तमंत्रैरुपस्थाय पुनः प्रवासार्थमभयं वो भयं मे
स्त्विति मंत्रेणाग्निमुपस्थाय द्विमासमध्यवर्त्तिकाले षष्ट्यन्यतमकर्मपर्यंतं प्रोष्य पुनः स्वगृहसमीपमेत्य
ॐ गृहा मा बिभीता पवःस्वस्त्येवोस्मास्तु वः प्रजायध्वं मा च वो भयं गोपती रिषादिति मंत्रेण गृहं निरीक्ष्य
ॐ गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान्॥ इरां वहंतो घृतमुक्षमाणास्तेष्वहं सुमनाः सं
विशानीति मंत्रेण गृहं प्रविश्य॥ ॐ शिवं शग्मं शंयोः शंयोरिति पुनर्गृहं तु वीक्ष्य होमकाले उपस्थानं
तं कृत्वा॥ ॐ अभयं वो अभयं वो भयं मेस्त्विति पुनरग्निमुपतिष्ठेत्॥ ततो ज्येष्ठपुत्रशिरउभाभ्यां पाणि
भ्यां परिगृह्य॥ ॐ अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्रशिरउभाभ्यां पाणिभ्यां परि
गृह्य॥ ॐ अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमिति मंत्रं
जपित्वा मूर्द्धानं त्रिरवजिघ्रेत्॥ एवमितरेषां च पुत्राणां क्रमेण कृत्वाऽप्रत्तदुहितॄणां तूष्णीमेव शिरो

प्र०र०त्न०
१४५

जिघ्रेत॥ एतत्सूत्रेऽपि प्रोष्याऽऽगते भवति॥ अवगतमप्यग्निं यं प्रवासादागतं प्रतितद्दर्शने निवेदयेयुः॥ ॥अथाग्निसं
सर्गदोषे प्रायश्चित्तं॥ ॥सत्सु गृह्याग्निरन्यगृह्याग्निना संसृष्टश्चेदग्नी विभज्य भौमसमित्समारोपणे कुर्या
त्॥ ततः पूर्वहोता तामिध्मोऽग्निमवरोप्य देशकालौ संकीर्त्य समिद्द्वयमादाय अस्मिन्नत्र वृंहितेऽग्नावित्यादि
चक्षुषी आज्येनेत्यन्तमुक्त्वा विविचिमग्निं प्रधानदेवता चरुद्रव्येणाशेषेण स्विष्टकृतमित्यादि सद्योप्य स
इत्यन्तमुक्त्वा समिद्द्वयमन्याधाय परिसमूहनादि परिधानपात्रनिधानान्तं कृत्वाग्नये विविचये त्वा जु
ष्टं निर्वपामीति चरुं शेषं प्रोक्षितं सौम्यमोक्षणं चाज्यभागान्तं कृत्वाऽग्नये विविचये स्वाहेति हुत्वा स्विष्ट
कृदादि होमशेषं समापयेत्॥ अनुपक्रान्तदर्शपूर्णमासश्चेत् पूर्ववदाज्यं सकृत्त्वप्रवेशाद्दशवी
रं स्कविगृहीत्वाग्नये विविचये स्वाहेति सकृदाहुतिं हुत्वा काम्यहोमे चरेत्॥ पश्चाद्धोता तु अग्न
ये पथिकृते तु हुत्वा कुर्यात्॥ शवाग्निना संसृष्टश्चेदग्नये शुचये स्वाहेति हुत्वा कुर्यात्॥ पचेनाग्निना संसृष्टश्चे

राम०
१४५

॥ अथ नष्टाग्निपुन
दग्ध्ये संवर्गाय स्वाहेति जुहुयात् ॥ वैघृते न संसृष्टस्य स्वरस्यै यज्ञमते स्वाहेति जुहुयात् ॥
र्ध्याये संवर्गाय स्वाहेति जुहुयात् ॥ वैघृते न संसृष्ट स्वर स्यये स्तुमते स्वाहेति जुहुयात् ॥ ॥ अथ नष्टाग्निपुन
:संधानप्रयोगः ॥ ॥ तत्र प्रमादादग्निनाशे यजमानः पत्न्या सह स्नात्वा नादिष्टुचिर्भूत्वा देशकालौ संकीर्त्य मम
प्रमादिकाग्नित्यागदोषपरिहारद्वारा श्री परमेश्वरप्रीत्यर्थं प्रायश्चित्तं करिष्य इति संकल्पयेत् ॥ तत्र त्रिरात्रम
ग्नित्यागे प्राणायामशतं ॥ विंशतिरात्रे एकाहे नोपवासः ॥ मासद्वयेत ॥ तत्र त्रिरात्रोपवासः ॥ अर्धे प्राजापत्यके
च्छ्रः ॥ एवं त्यागकालानुसारेण प्रायश्चित्तं कृत्वा ॥ आयतनं गोमयेनोपलिप्योल्लिख्याभ्युक्ष्य यथालाभं पिकणादिसं
भारान्निदध्यात् ॥ ते यथा ॥ सिकताः पयस्यं च वराहविहतां च मृत्तिका ॥ सूदमाखुत्करं चाश्वपर्णकेशाः ॥ उदुम्बराश
निहतं पर्णाश्वत्थविकंकताः ॥ शम्यंकुराश्वत्थहे यात्रीवानद्वयसे क्लिताः ॥ ततः श्रोत्रियागाराद्धृतमग्निं
विधिवत्स्थापयित्वाग्निसमिध्यप्राशनाय मध्येदेशकालौ संकीर्त्य मम प्रमादाद्विच्छिन्नस्याग्न्याधाने पुनःसंधानेक
र्म करिष्य इति संकल्प्याज्यं पर्वेवत्संस्कृत्य सकं वंच संमृज्य ॐ अयाश्चाग्नेस्यनभिशस्तीश्च भेषजं स्वाहेति स

प्र०र० १४६

केशान्त्यं ऊर्ध्वं सायंकालपर्यंतमप्युपवसेत्तत दर्शकेो यजमानो वा ॥ सायं काले एव पूर्ववन्नित्यहोमं कुर्यात् ॥ द्वादशाहपर्यंते मथमन्युत्पत्ति विधिः ॥ तदूर्ध्वं तु वक्ष्यमाणो विवाहहोमविधिः ॥ आलस्यादिना बुद्धिपूर्वकमाग्नित्यागे तत्कालानुसारेण दं प्रायश्चित्तं ॥ द्वादशाहपर्यंतं त्रिरात्रमुपवासः ॥ मासपर्यंतं द्वादशरात्रमुपवासः ॥ अब्दपर्यंतं मासं पयोव्रतं ॥ द्विवर्षपर्यंते चांद्रायणं ॥ अब्दपर्यंतं चांद्रायणं सोमायने च ॥ तदूर्ध्वं अब्दकृच्छ्रं ॥ धनिनो गोदानं चेति प्रयोगपारिजाते ॥ स्मृत्यर्थसारे तु द्वादशाहातिक्रमे त्र्यहमुपवासः ॥ मासातिक्रमे द्वादशाहमुपवासः पयोभक्षणं वा इति विशेषः ॥ संवत्सरातिक्रमे मासमुपवासः पयोभक्षणं चेति ॥ एवं कालविलंबसंकल्पपूर्वकं प्रायश्चित्तं कृत्वा पुनः संधानं ॥ यत्र तु अग्निविच्छेदनिमित्तेन केनचिदग्निविच्छेदः कालविलंबश्च नास्ति तत्राकृत्वैव कृत्वेव प्रायश्चित्तं पुनः संधाने कार्यं ॥ ॥ अथ विच्छिन्नस्याग्नेः पुनः संधान विधिः ॥ ॥ पत्न्यामसह कृतेन स्नानादि नित्य क्रियोर

एम० १४६

शकालेऽसंकीर्त्यैतावंतं कालं गृह्याग्निविच्छेदजनितप्रत्यवायपरिहारार्थं एतावत्प्रायश्चित्तमसु
कप्रत्याम्नायेन करिष्य इति संकरिष्य इति संकल्प्य ॥ अग्निविच्छेदकालगणनया स्मृत्युक्तं प्रायश्चित्तं
दंपती सहकुर्यातां नव्यपथकुः ॥ समारोपितस्मिन्न अग्निविच्छेदेन लुप्तानां सायंप्रातर्होमानां तथा दर्शपूर्णमासम
स्थालीपाकानां च संपत्तिपर्याप्तमिदं व्रीहियादिद्रव्यमाज्यं च ब्राह्मणाय संप्रददे इति ॥ लुप्तसायंप्रातर्होम
स्थालीपाकगणनया तत्पर्याप्तं व्रीह्याद्यन्यं च ब्राह्मणाय दद्यात् ॥ ततः शुभकाले शुचिराचांतः प्राणाना
यम्य देशकालौ स्मृत्वा विच्छिन्नस्य गृह्याग्नेः पुनः संधाने करिष्य इति संकल्प्य स्थंडिलोपलेपनो
ल्लेखनाभ्युक्षणाग्निप्रतिष्ठापनानि कृत्वान्वाधानं कुर्यात् ॥ तद्यथा ॥ द्वे समिधौ गृहीत्वा देवतापरि
ग्रहार्थमन्वाधानं करिष्य इति संकल्प्याऽस्मिन्नन्वाहितेऽग्नौ जातवेदसमग्निं समिध्येन प्रजापतिं प्र
जायतिं चाघारदेवते आज्येनाऽत्र प्रधाने विरग्निपवमानं सकृद् अग्निं प्रजापतिं चाज्येनत्र्यं

प्र०र०ले
१५०

माग्निं वरुणमग्निं पृथाग्निं प्रजापतिं च व्याहृत्येन चतुर्वारं स्यां सावित्रीमाज्यद्रव्येणाशेषेण स्विष्टकृतमि
त्यादि ॥ परिसमूहनादि प्राकृतं पात्रासादने विशेषः ॥ प्रोक्षणीस्रुवं प्रणीतापात्रमाज्यपात्रे लाजेभ्र
पं मिध्मं बर्हिस्त्रयं दधि प्राशनपात्रे दधिचासादयेत् ॥ आज्यसंस्कारादि प्राकृतं पात्रान्त्येन सह लाजानामपि
पर्यग्निकरणं ॥ आज्योत्पवनासादयोः कृतयोर्लाजानामग्निः प्राकृतं ॥ स्रुवसंमार्जनादि पत्न्यन्वारब्धे र्घा
धानाघारांतं ऊर्यात् न चक्षुषी ॥ अथ प्रधानं ॥ अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः ॥ अग्नि
पवमानो देवता गायत्री छंदः ॥ अग्निपुनः संधानप्रधानाज्यहोमे वि० ॥ ॐ अग्न आयूंषि० दुच्छुनां स्वा
हा ॥ अग्नये पवमानायेदं० ॥ ॐ अग्निर्ऋषिः पवमानः० गयं स्वाहा ॥ अग्नये पवमानाय इदं० ॥ अथ पत्न्याः अ
ग्ने पवस्व स्वपा० योषं स्वाहा ॥ अग्नये पवमानायेदं० ॥ त्वमर्यमा भवसि स्रुतोग्निस्त्रिष्टुप् ॥ विनियोगस्तु कः ॥ त्वम
र्यमा भवसि० कृणोषि स्वाहा ॥ अग्नय इदं० ॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ विनियोगस्तु कः ॥ एम०

१४७

ॐ प्रजापते न त्वदेता०रयीणां स्वाहा ॥ प्रजापतय इदं० ॥ अथ पत्न्याः क्षालितांजलौ पतिराज्येनोपस्तीर्य द्विर्ला
जानोप्यपं चावत्तीनु त्रिरोप्य सूर्पस्थानभिघार्यांजलिस्थानप्यभिघार्य तिष्ठन्तिष्ठंत्या अंजलिं स्वकराभ्यां धृत्वा
॥ अर्यमणं वरुणं पूषणमिति स्मरणं वामदेवोर्यमाग्निर्वरुणाग्निः पूषाग्निरनुष्टुप् ॥ गृह्याग्निः पुनः संधानप्र
धानलाजहोमे वि० ॥ ॐ अर्यमणं नु देवं कन्या अग्निमयक्षत ॥ स इमां देवो अर्यमा प्रेतो मुंचातु नामुतः स्वाहेति य
ष्ठितमंत्रांते ऽञ्जलिमविच्छिंदती अंगुष्ठपर्यंतं अंजलिवामपार्श्वेन वा पत्नी जुहुयात् ॥ एवमग्रेपि ॥ अर्यमा अग्नय इदं न म
मेति पतिः ॥ ॐ वरुणं नु देवं कन्या अग्निमयक्षत ॥ स इमां देवो वरुणः प्रेतो मुंचातु नामुतः स्वाहा ॥ वरुणाग्नय
इदं० ॥ ॐ पूषणं नु देवं कन्या अग्निमयक्षत ॥ स इमां देवः पूषा प्रेतो मुंचातु नामुतः स्वाहा ॥ पूषाग्नय इदं० ॥ ततः
सूर्पकोणेन शिष्टान्सर्वांल्लाजान्पतिः पत्नीवाम्यात्मं प्रजापतिं ध्यायन्जुहुयात् ॥ प्रजापतय इदं० ॥ लाजानां त्रि
ष्टकृन्नास्ति ॥ तत उपविश्य पाठ्यं पतिर्जुहुयात् ॥ अग्निः संधाय प्रजामिति चतसृणां सूर्यासावित्री आघारग

तौ॥ द्वितीया त्रिष्टुबंत्यो द्वे अनुष्टुभौ॥ अग्निपुनःसंधानप्रधानाज्यहोमे वि०॥ ॐ अग्ने नः प्रजां जनयतु० शंचतुष्पदे स्वा
हा॥ सूर्यासावित्र्याऽऽर्षं इदं०॥ एवमग्रेऽपि त्यागः॥ ॐ अघोरचक्षु० शंचतुष्पदे स्वाहा॥ ॐ इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभ
गां कृणु॥ दशास्यां० कृधि स्वाहा॥ ॐ संस्राज्ञी श्वशुरे भव० देवृषु स्वाहा॥ ततः समंजंत्वित्यस्य सूर्यासावित्री सूर्या
सावित्र्यनुष्टुप्॥ दधिप्राशने अवशेषेण हृदयांजने वि०॥ ॐ समंजंतु विश्वेदेवाः०॥ दधातु नौ॥ एतेन त्वयं
दधि प्राश्नीयात्॥ आज्यशेषेण हृदयांजनं वा कुर्यात्॥ पत्न्यैच दधि प्रयच्छेत् सा चेत् स्त्री प्राश्नीयात्॥ स्वहृ
दयांजनपक्षे पत्न्या अपि तत् स्त्री हृदयांजनं॥ अथान्यनयरक्ष्युकर्मणा इति विघ्नकृतेऽजत्वा इध्मसन्नहन हो
मादिकर्मशेषं समापयेत्॥ अत्र कारिका॥ उपलेपादिकं कुर्यादाघारांतं विवाहवत्॥ विवाहाज्याहुती हु
त्वा लाजहोमो भवेदिह॥ गृहप्रवेशनीयाख्य उक्त्वा स्याद्धृदयांजनं॥ परिणीत्यादिनास्यत्र लाजा नावपति
स्वयं॥ ॥ इति प्रयोगरत्ने गृह्याग्निपुनःसंधानप्रयोगः॥ ॥ अथ नास्तिक्यादिदोषाग्नेरग्निःपुनःसंधा

नं॥ ॥तत्रकर्त्ता संकल्पपूर्वकं स्त्रियासहोपोष्य परेद्युः कृतनित्यक्रियः संकल्प्य एवंकं प्रायश्चित्तं कुर्यात्॥त
था॥ द्वादशाहपर्यंतं यथाशक्ति सुवर्णदानं॥मासद्वयपर्यंतं कृच्छ्रं॥मासचतुष्टयमतिकृच्छ्रं॥षण्मासपर्यंतं
पराकः॥ततोब्दपर्यंतं मासं पयोव्रतं॥अब्दपरे त्रैमासिकव्रतं॥ततः प्रतिवर्षं त्रैमासिकावृत्तिरिति॥ततः काय
गणानयासायं प्रातर्होदर्शपूर्णमासस्थालीपाकहोमद्रव्यदानं धाजं करिष्य इति संकल्प्य॥आयतनोपलेप
॥ततः शुभदिने अपराह्णे सभार्यो देशकालौ संकीर्त्य नाष्टिक्या द्विसप्तस्याग्नेः पुनः संधानं करिष्य इति संक
कल्प्य॥आयतनोपलेपादि यथामीलितसंभारविधानात् कुर्यात्॥संभाराश्च॥पालाशोदुंबराश्वत्थशमीवैकं
कतांचुतं॥वल्मीकोखरवाराहमूषकोत्खातमृत्तिकाः॥शर्कराः सिकताः सूदाः शेपाध्वस्ततरुत्वचः॥य
थालाभं समाकीर्य पावनाग्निं समुद्धरेत्॥ततः ॐ इदं त एकं पर ऊ त एकं॥पुरमेज्ञानित्रे इति मंत्रेण ॐ भूर्भु
वः स्वरिति अग्निं प्रतिष्ठाप्य॥समिद्द्वयमाधाय पुनर्देशकालौ संकीर्त्य नाष्टिक्या द्विसप्तस्याग्नेः पुनः संधानं

गामृतमन्वाधानं करिष्ये अस्मिन्नन्वाहितेग्नावित्यादि आघारावाज्यभागौ चाज्येनेत्यंतमुक्त्वा ऽत्र प्रधानं ॥ अ
ग्निमग्निं वा रंच अग्निं पवमानं अग्निं पावकं अग्निं शुचिं अग्निं पथिकृतं अग्निं तंतुमंतं चाज्येन शेषेण स्विष्टकृ
तमित्यादि सद्यो यक्ष्य इत्यंतमुक्त्वा समिद्द्वयमग्नावाधाय परिसमूहनाद्याज्यभागांतं कृत्वा स्कंदे वैरोस्के चा
ज्यं चतुर्गृहीत्वा अग्ने स प्रथा असीत्यस्यात्रेयः सुतंभर ऋषिरग्निर्गायत्री ॥ नास्तिक्याद्धि स छाग्नेः पुनः संधानाद्य
होमे वि० ॥ ॐ त्वमग्ने सप्रथा असि० वितन्वते स्वाहा ॥ अग्नय इदं० ॥ यो अग्निमित्यस्य काण्वो मेधातिथिरग्नि
र्गायत्री ॥ विनियोगः पूर्ववत् सर्वत्र ॥ ॐ यो अग्निं देववीतये० मृळयस्वाहा ॥ अग्नय इदं० ॥ तंतुं तन्वन्नित्यस्य
वामदेवोऽग्निर्जगती ॥ ॐ तंतुं तन्वन्रजसो० नेन स्वाहा ॥ अग्नय इदं० ॥ त्वं नो अग्ने तव देवेत्यस्या गिरसो हिरण्य
स्तूपोऽग्निर्जगती ॥ ॐ त्वं नो अग्ने तव देव पायुभिः० तव व्रते स्वाहा ॥ अग्नय इदं० त्वं नो अग्न इत्यस्य गौतमो वा
मदेवोऽग्निर्वरुणौ त्रिष्टुप् ॥ ॐ त्वं नो अग्ने वरुणस्य विद्वान्० प्रमुमुग्ध्यस्मत्स्वाहा ॥ अग्नय इदं० ॥ स त्वं नो अग्ने०

ग्नयइदंनमम॥ॐमनोज्योतिर्जुषस्य गौतमो वामदेवो ऽग्निर्वरुणौ त्रिष्टुप् ॥ ॐ सत्वंनोअग्नेऽवमोभवोती ० नेदिष्ठोस्वा
हा॥अग्नयइदं०॥ॐ मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञं᳚ समिमंदधातु॥याइष्टाउषसोनिम्रुचश्चताःसं
दधामिहविषाघृतेनस्वाहा॥अग्नयइदं०॥ॐ पुनस्त्वादित्यावसवःसमिंधतांपुनर्ब्रह्माणोवसुनीथयज्ञै
॥घृतेनत्वंतनुवोवर्द्धयस्वसत्याःसंतुयजमानस्यकामाःस्वाहा॥अग्नयइदं०॥एतैर्मंत्रैःकृत्वाप्रायश्चित्ताहुति
चतुर्गृहीतेनाज्येनाष्टौवाहुतीर्हुत्वा॥स्रुचैवाग्नावाज्यमादाय॥ॐ अग्नयेपवमानायस्वाहा॥अग्न
येपवमानायइदं०॥ॐ अग्नयेपावकायस्वाहा॥अग्नयेपावकायइदं०॥ॐ अग्नयेशुचयेस्वाहा॥अग्नयेशु
चयइदं०॥ॐ अग्नयेपथिकृतेस्वाहा॥अग्नयेपथिकृतइदं०॥ॐ अग्नयेव्रतभृतेस्वाहा॥अग्नयेव्रतभृत
इदंनममेतिपंचाज्याहुतीर्हुत्वास्विष्टकृदादिहोमशेषंसमाप्याऽहिताग्नयेअनडुहंदक्षिणांदद्यादिति॥
॥ ॥अथायपत्नीकोपासनेप्रयोगः॥ ॥ततःपूर्वंमृताग्नेयपत्न्येदाहायाऽर्धाग्निंदत्वाशिष्टाग्नौपूर्ववन्

प्र०र०
१५०

स्तायंप्रातर्होमौ कुर्यात् ॥ इच्छितः कार्यो न वा ॥ ॥ अथ विवाहोत्तरं दंपत्योर्गृहप्रवेशः ॥ ॥ गृहप्रवेशहो
मदिनादारभ्य दर्शसंक्रांतिव्यतीपातविष्ट्यादिरहिते चतुर्थ्यादौ मौहूर्तिकोक्ते शुभदिने गृहप्रवेशं करिष्यमा
णः श्वशुरगृहे ऽभ्यङ्गस्नातो वारात्रौ स्वदेशाचारानुसारेण नागवल्यादिकं कृत्वा श्वशुरदत्तदो समपर्यंका ऽऽरुयु
तः सुवासिनीकृतनिराजनः श्वशुरादिभ्यो गृहीतबकाशीर्वचनः स्वलंकृतः स्वलंकृतया वध्वा सह विवाह
स्थिं शकटे ऽवस्थाप्य ऽजस्त्रमग्निं नयन् ॥ एषा त्वेत इत्यस्य सूर्या सावित्री सूर्या सावित्री त्रिष्टुप् ॥ वध्वा यानारोह
णे वि० ॥ ॐ एषा त्वेतो नयतु हस्तगृह्य० कं कु १ अनेन यथाविभवं गजाश्वादियानमारोहयेत् ॥ यानेन
प्रयाण एवायं नियमः ॥ यानादन्येन शिबिकादिना प्रयाणे न मंत्रः ॥ स्वग्रामविवाहपक्षे स्वगृहगमने ना
यं मंत्रः ॥ गमने यद्यंतरा नाव्या नदी स्यात्तदा ऽश्मन्वती रीयते इति ऋचो ऽर्धर्चेन वधूं नावमारोहयेत् ॥ अत्रा जहा
मये ऽत्र सन्त्र शेवा इत्युत्तरार्धेनोदकादुत्तारयेत् ॥ नीयमानां वधूं यदि बंधुवियोगादिना रोदिति तदा जीवं रु

राम०
१५०

दंतीति ऋचं जपयेत्॥ अयं विधिः स्वग्रामेपि भवत्यविशेषात्॥ शोभने षु देशात्तरे चतुष्पथेषु मार्गविदन्यरिपंथि
न इति ऋचं जपयेत्॥ वसतौ वसतौ वीक्षकाः संति चेत्ताश्च॥ सुमंगलीरियं वधूरिति चेक्षेत॥ इह प्रियमित्यनया
गृहं प्रवेशयेद्वधूं॥ अयं विधिः स्वग्रामविवाहेपि भवति॥ अत्रायमनुष्ठानक्रमः॥ वरो वधूमुत्तमंवेशाय यथार्हं
यानमारोप्य विवाहाग्निं शकटारोपितमन्तमग्रतो नयन् सुमंगलीसूक्तं पठद्भिर्विप्रैर्बंधुभिः सुवासिनीभि
श्च मंगलसंभृतकदर्पेणा(?)पूर्णकलशकन्याप्रमुखाकृतदीयमालाजैर्मंगलतूर्यनादैश्च सह स्मितच्छत्रयुतः स्व
गृहद्वारे सुवासिनीभिर्नीराजितवधूसहितो वधूं यानादवरोप्य गृहीत्वा प्रभुर्मे तुङ्गेति॥ इह प्रियं प्रजया तदिति स्वगृहं प्रवे
श्य स्वयं च प्रविश्य तंडुलपुंजे चतुष्के कुलदेवता लक्ष्मीं च संपूज्य विप्रैः पुण्याहं वाचयेत्॥ ततः गृहप्रवेशनीय हो
मः कार्यः॥ अस्माभिस्तु लोकाचारानुसारेण पूर्वं कर्तव्यतयोक्तः॥ ततः शुभदिने स्वस्त्यादि वाचयित्वा स्वस्वं कृतः
स्वस्वं कृतां वधूं रात्रावुपगच्छेदिति॥ नागबलिः स्तंभबलिप्रयोगस्तु सर्वदेशेष्वनुष्ठानाभावान्नोक्तः॥ ॥

इति श्रीविद्वन्मुकुटमाणिक्यश्रीरामेश्वरभट्टसूनुनारायणभट्टकृते प्रयोगरत्ने वधूसहितस्य वरस्य गृहप्रवे
शविधिः॥ श्री॥ चतुर्थमध्ये हवनं चेद्विनष्टे संधानमग्नेस्त्वथ लौकिकाग्नौ॥ आपासनात्पूर्वमथापि नष्टे वि
वाहहोमं विधिवच्च कुर्यात्॥ १॥ आ चतुर्थ्यादिवाहाग्नेर्नाशे च द्वे लोरनाहुते॥ कार्यास्ति ईशाभिर्मंत्रैः मत्प्रवे
नुकुर्याद्धुतं १ अयाश्चयं च होताचयश्चाभिराजृति द्वयात्पुनर्मनस्वतीं चैवं महाव्याहृतयश्चतुः २ अर्वा
कृत्रिरात्रात्कुर्याद्यश्चेदास सरात्रा चमनस्वतीं च॥ एकादशाहसंहतं तु मत्याश्वाद्वादशाहं भवेदग्नि
नाशः १ श्रीगणेशाय नमः॥ ॥आश्वलायनमाचार्यं प्रणम्य परमं गुरुं॥ भट्टरामेश्वरसुतो भट्टनाराय
णः सुधीः १ पंचविंशतिसंस्कारेषूक्ताष्टादश संस्कृतीः॥ पाकयज्ञान्सप्त शिष्टान्वक्ष्ये शिष्टतुष्टये
२ तत्र॥ अतः परं द्विजातीनां संस्कृतीर्नियमस्तोच्यते॥ संस्काररहिता येऽत्र तेषां जन्म निरर्थकं ३ पंचविंश
तिसंस्कारैः संस्कृता ये द्विजातयः॥ ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयंत्रिताः ४ गर्भाधानं

नैसक

~~चस्तु स्वयं ॥ स्नानो द्वाहो चाग्र~~ पुंसवनं सीमंतो बलिरेव च ॥ जातकृत्यं नामकर्म निष्क्रमोन्नाशनं परं ॥ ५ चौ
लकर्मोपनयनं व्रतानां च चतुष्टयं ॥ स्नानोद्वाहौ चाग्रयणमष्टका च यथातथं ६ श्रावण्यामाश्वयुज्यां
